॥ श्रीः ॥

तुरीयमीमांसा ।

अनेकदुर्वादिमतपरासनपुरस्सरम् ।

श्रुति-स्मृतीतिहास-पुराणानि पुरस्कृत्य
तानि परिष्कृत्य च

तुरीयाश्रममीमांसनपरा ।

सत्सम्प्रदायाचार्यसर्वतन्त्रस्वतन्त्रपण्डितस्वामि-
श्रीराममिश्रशास्त्रिणा प्रणीता ।

गुणग्रहणप्रवणचेतसा श्रीमता ज्योतिर्विद्राजारामशर्म्म-
पण्डितेन जिज्ञासु-सुजनसौकर्याय मुद्रणं प्रापिता ।

TURÍYAMÍMÁMSÁ

BY

S. S. A. S. T. S. P. S. M. M. RÁMA MISRA SÁSTRI.

काश्याम् ।

ई. जे. लाजरसकम्पिन्याख्येन मेडिकल-हाल-नाम्नि यन्त्रालये
मुद्रयित्वा प्रकाशिता ।

१९५७ वैक्रमाब्दे । १९०१ ईस्वी ॥

Price Rs. 1-8] [मूल्यम् १॥)

॥ श्रीः ॥

तुरीयमीमांसा ।

अनेकदुर्वादिमतपरासनपुरस्सरम् ।

श्रुति-स्मृतीतिहास-पुराणानि पुरस्कृत्य
तानि परिष्कृत्य च

तुरीयाश्रममीमांसनपरा ।

सत्सम्प्रदायाचार्यसर्वतन्त्रस्वतन्त्रपण्डितस्वामि-
श्रीराममिश्रशास्त्रिणा प्रणीता ।

गुणग्रहणप्रवणचेतसा श्रीमता ज्योतिर्विद्राजारामशर्म्म-
पण्डितेन जिज्ञासु-सुजनसौकर्याय मुद्रणं प्रापिता ।

TURÍYAMÍMÁMSÁ

BY

S. S. A. S. T. S. P. S. M. M. RÁMA MIS'RA S'ÁSTRI'.

काश्याम् ।
ई. जे. लाजरसकम्पिन्याख्येन मेडिकल्-हाल्-नाम्नि यन्त्रालये
मुद्रयित्वा प्रकाशिता ।

१९५७ वैक्रमाब्दे । १९०१ ईस्वी ॥

PREFACE.

It is undisputed and admitted by the historians that, in all countries and at all times, the religion, the vernacular language and the vernacular of the Sacred Scriptures of a country, have gradually improved along with its growth.

But the case is quite different with the 'N.-W. P. and Oudh.' Its vernacular language has been so demoralized that it is used only in the private apartments, and no sooner one gets out of them than he begins to use ش and ق like one acquainted with Persian or Arabic.

Some time ago I was invited to attend the Vaiśya Conference at Aligarh to express my views in respect to several religious points connected with the Hindu Sacred Scriptures. Soon after my arrival a gentleman of rank came to see me, and during the course of his conversation he said, "Is mulq meṅ pidri zubán ki taraqqi honi lazim hai." If such is the use of expressions by men of respectable position, how can the expectations for the improvement of the vernacular language be realized?

This method of using expressions is quite tantamount to the ways of living of certain men, who, having put on foreign clothes and adopted foreign modes of living, give lectures in public conferences on the use of native dress only with a view to acquire renown and gain fame.

Previous to the British administration in this country, the darkness of ignorance was spread to such an extent that the intercourse of one nation with

another did not at all exist. Languages differed at the distances of every 24 miles and our Musalman rulers in olden times went so far as to alter even the names of cities and holy places and call them by the names of Musalman fashion. In the royal records Prayag was entered as Allahabad, Kashi—Muhammadabad, and Patna—Najimabad, and so on.

But thanks be to the Almighty that the British Government has now turned India from a barren country into a smiling garden, and united the several petty kingdoms into one sovereignty, which looks as it were like one grand city. A native of Madras keeps correspondence with one of Nepal, and a Bengali with a Peshawari.

Similarly though living apart from one another in different quarters, they meet together to give lectures and hear them as if they were the inhabitants of one town.

Look! only a short time ago the patriotic Governor of the United Provinces, having noticed that even the native Musalmans of these Provinces converse with their female relations and keep their account books in the Hindi language, has introduced Hindi for the convenience and good of the people in general.

It is a deplorable thing that even a learned Pandit can with difficulty express his thoughts accurately in a letter written in the vernacular. The reason is not far to seek. People of this country have not yet set their foot on the right path leading to its prosperity. The cultivation of learning has, however, been begun in it.

The world evinced several improvements in about the latter part of the reign of our late Empress. These

improvements embracing politics, science &c., tended much to increase the welfare of the country. The munificent gift of His Highness the Maharaja of Jaipur to the Famine Fund, with no other motive than that of relieving the poor, is one of the many instances of acts quite unheard of before and sufficient to afford a better stimulus for helping the needy to the other chiefs of India. The high education of H. H. the Maharaja of Durbhanga is another instance of the growth and development of education among the Rajas and Maharajas of India. Similarly the minor Maharaja of Burdwan may be looked upon as an example of a native prince well-worthy of the high position he is shortly to command among the Indian chiefs by dint of his exceptional merits acquired by high education. The success with which H. H. the Maharani Sahiba of Vizianagram has been managing her state is a rare instance on record of that wisdom which characterised a woman under the benign rule of our late lamented Empress. It is hoped that the Maharani will succeed as well in looking after the education of the minor prince as in matters connected with the management of her Raj.

Our N.-W. P. and Oudh also abounds in instances of the above of which I can with certainty mention one here. His Highness the Raja of Bhinga has given his heir apparent that training and education—religious, political and scientific—which may serve as a model to many.

In ancient times the custom of handing over the books by the *guru* to his pupil did not at all exist. Some 400 years ago *Vasudeva Sárvabhauma*, a Bengali Brah-

man, read *Chintamani* with his *guru* in *Mithilá.* Having completed his studies when he was returning home, his *guru* took away the manuscript copy of the work written by him.

By the grace of God it is pleasing to hear that the present Maharaja of *Mithila* has taken in his own hand the difficult task of diffusing knowledge here, and it is hoped that it will reach its perfection to the people's satisfaction.

The backwardness of education in these Provinces, when compared with that of Bengal, Bombay and Madras, may as well be ascribed to the dissimilar use of the Hindu and Musalman languages, and it will no longer exist when there is similarity observed.

The usefulness of giving education in boyhood cannot be denied, for it is serviceable to man during his whole life.

The tendency of man's nature entirely depends on the primary education given to him in his boyhood. There is difference between the patriotic feelings of the English and the Indians, for the former receive their education in their own vernacular and the latter do not. The people of this part of the country look to their vernacular with insignificant eyes, and for this reason they ever remain insignificant. But it is now imagined that the royal road to Hindi so kindly paved by our benevolent Governor will mark the way leading to the advancement of the people.

People receiving their education in their own vernacular will necessarily feel an inclination towards their

religion and its observances and be affected with the feelings of philanthropy and patriotism.

It is worthwhile noticing that when S'ankarácharya Swami saw the deterioration of the Vaidic religion and the people's perversion to Buddhism, he adopted a plan to turn the tide of the people's tendency to its original state.

Having made slight alternations here and there in the philosophies of the Buddhists, he let them remain as they were, but did not simultaneously fail to justify the philosophic principles propounded therein with proofs based on those already laid down in the Vedas. The Buddhists themselves attentively listening to them admired their utility and began to hold even the Vedas as authority.

This state of things gradually led to the performance of ablution and the giving of alms, the offering of sacrifices and obsequial oblations to the Manes and the worshipping of the gods and the *brahmans.* People having abandoned Buddhism began to resume the ancient form of the Vaidic religion: the result being the annihilation of Buddhism and the replacement of the latter on its usual basis throughout India.

But alas! if people are not actually acquainted with the fact that the Vedas announce the world and its Creator to be true and to exist since time immemorial, how can we pronounce them to be false?

It is still more pitiable that if somebody attempts to teach something which is even based on the Sastras, he is regarded to be a foe and envied by most people.

Some time ago when I placed before the public a printed copy of a part of my original work entitled 'Snehapurtti'* I was viewed with jealous eyes. But truth always prevails. The sale of the book has been beyond expectation, and it will now be reprinted in Bombay for public benefit.

It is a rule with the worldly men in succession that in regard to some point they at first come to an undesirable conclusion, but with the lapse of time they by and by consider it to be satisfactory, Verily the publication of the 'Turiya Mímánsá' is based on the foregoing precedent.

When S'ankarácharya saw that he had succeeded in saving the ancient religion of India from the devastation of the Buddhists by composing philosophies similar to theirs, he at the same time devised means for their promulgation. He concluded that, as the Buddhist mendicants existing in numbers endeavoured to spread Buddhism without any cost, why he should not also invent the system of teaching through mendicants in all the quarters.

On this ground, having inculcated the principles of salvation obtained by abstraction, he sent his disciples everywhere for teaching the Vaidic doctrines. Since then has arisen the peculiar religious system of the Sannyásis which is, like Buddism, in every way opposed to the Vaidic doctrines.

When this practice was enforced, several Bauddha Rajas and Maharajas began to adopt his system of religious teaching and by degrees became Vaidics.

* Snehapurtti in 16 parts originally composed by me in big volumes is shortly expected to be printed.

It must be borne in mind that all this was done to convert the Buddhists and not verily to show what he really imbibed. He was in reality the worshipper of Vishṇu and devoted follower of the Supreme Being. Neither did he, like the existing followers of his system of religion, think himself to be Brahma, nor did he own the customary religious observance of his followers the Dandis to be the only object aimed at.

The saddest thing that happened was the premature death of *S'ankarácháryа* at the age of 32 years only. Had he lived a little longer, he himself would have laid open the secret that these interpolations were made to deceive the Buddhists and not to declare his religious beliefs.

The people of this country are not only ignorant of histories but see them with inimical eyes, and hence do not possess any accurate knowledge of the foregoing incidents.

It is a matter worth consideration whether S'ankará-chárya, according to whose tenet, besides Brahma, the whole world is unreal, will ever say that a Sannyásí Brahman alone can attain salvation and none else; that spiritual knowledge can be acquired by the Brahmans only and by none; that a Brahman alone is entitled to become a Sannyásí and not the Kshattriyas and others; that salvation is got by giving up the duties of each order and by no other means; and so on. His mysterious ways are those of politics and not of religion.

But mostly the *brahmans* of the present age accomplish their ends either by uttering ordinances learnt by

rote or listening to the decision of prejudiced arbitrators. They are in the dark as to the purport of S'ankarácharya's tenet, which was intended only to convert the Buddhists to the Vaidic religion. To bring to light that his doctrines and religious observances are not quite different, is the main object of my composing the "Turíya Mimámsá," and it is believed that the people knowing the real meaning of its contents will follow the ancient form of the true religion.

All the Vaidics believe that S'ri Krishṇa has in his *Gítá* taught Arjuna the sum and substance of all the Upanishads, which runs thus——The soul enshrined in the human body must take shelter with the Supreme Being, for no salvation can be attained without doing this. All living beings are sinners. They can obtain final emancipation by the favour of the Supreme Being, which can be gained when the living being actually thinks itself to be divested of all the evils and has recourse to pious devotion. If such is the rule laid down in the *Gítá*, then they cannot be said to be Vaidics who, not in accordance with this precept, think the world to be false and the Supreme Being to be imaginary.

If S'ankarácharya is indeed held to be a Vaidic, then it must be concluded that his religious teachings, though inconsistent with those of the Vedas, were no doubt meant to show some obscure signification and not his real tenet. He had a very great experience. He in fact taught in this manner in order to extirpate Buddhism without bloodshed. His writings did not wound the feelings of the Buddhists who, knowing that their religious views coincided with those of the Vedas, began to

read them, gradually devoted themselves to the worship of the Supreme Being and took shelter with him.

In this treatise I have shown that according to the Vedas and the Hindu Sacred Scriptures, like the Brahmans, the Kshattriyas and men of other castes are also authorised to perform all the duties connected with the worldly affairs down to the attainment of final emancipation.

SWA'MI RA'M MIS'RA S'A'STRI'.

BENARES :
1st March, 1901.

॥ श्रीः ॥

श्रियै नमः

श्रीधराय नमः

श्रीमतेरामानुजाय नमः

भूमिका।

समय के फेर से संसार में सर्वप्रकार से धर्म कर्म का फेर होता जाता है, परन्तु सहसा यह बात नहीं जान पड़ती कि किस दशा से अब हम लोग किस दशा को प्राप्त होगए, एक वह दिन था कि ब्राह्मण क्षत्रियादि चार वर्ण के और ब्रह्मचर्यगृहस्थादि चार आश्रम के धर्म केवल कहेही नहीं जाते थे किन्तु यथा समय यथोचित रीति उनका अनुष्ठान भी होता था, परन्तु अब वह समय नहीं है, और अनुष्ठान की तो बातही क्या कही जाय, जिनके ग्रन्थों से लोग अपने धर्मकर्म का विचार करते हैं वेही ग्रन्थकार बाजे स्थान पर विपरीत लिख बैठते हैं, जैसे कि चातुर्वर्ण्य व्यवस्था पर द्वेष से होय, अथवा अपने अज्ञान से होय, किंवा किसी प्रत्यन्त देश के तात्पर्य से होय, कलि में लोगों ने क्षत्रिय वैश्य वर्ण का अभाव कहा है, इसी तरह संन्यासाश्रम सर्वहा युग में केवल ब्राह्मण वर्ण को है क्षत्रियादि को नहीं, यह भी बड़े बल से लिखा है, और इस विषय की इस देश में अनेक बार पूर्व भी चर्चा हो चुकी है, परन्तु कुछ दृढ़यथार्थ मीमांसा नहीं हुई, जिससे लोगों के चित्त का संशय निवृत्त होय। प्रामाणिक* लोगों से सुना है कि

* यह बात मैंने श्रीसीतारामीय परमहंस श्री५हरिहरप्रसादजी महानुभाव के मुख से सुनी है।

इस विषय पर वैकुण्ठवासी काशी के महाराज श्रीमान् उदितनारायणसिंहजी साहब बहादुर ने उस समय के काशी के अद्वितीय विद्वान् श्रीईशानचन्द्रनारायण तर्कपञ्चानन भट्टाचार्य, सूर्यनारायण शास्त्रीजी, और भैरवमिश्रजी, प्रभृति विद्वज्जनों से निर्णय कराया था परन्तु उस समय में इन महात्मा विद्वज्जनों ने क्या निश्चय किया और कौन ग्रन्थ बनाया इस का कुछ भी पता नहीं लगता, इस हेतु यह बात आज भी अन्धकार के भीतरही है।

यद्यपि इस समय में यह कोई विशेष आवश्यक विषय निर्णेतव्य लोगों को प्रतीयमान न होगा क्योंकि संसार इस समय हैजा, प्लेग, महंगी, युद्ध, विग्रह, कांग्रेस, कान्फरैंस, बाल्यविवाह, विधवाविवाह, विलायतयात्रा, और नाना प्रकार के वेदविरोधी विचित्र समाज इत्यादि जगद्व्यापी प्रश्नों की मीमांसा में लगा है, परन्तु धार्मिक लोग जब यह देखते हैं कि इन सब उपद्रवों का मूल भूत संसार है इस्की निवृत्ति किये बिना हजार सफाई और चतुराई निष्फल है, तो ऐसे लोगों को इस विषय की जिज्ञासा होना कोई आश्चर्य की बात नहीं है, क्योंकि वर्णाश्रम धर्महीं संसार में धर्मार्थ काम मोक्षचार पुरुषार्थ के मूल हैं तत्रापि मन्त्रमीमांसा, व्रात्य संस्कारमीमांसा, उद्वाहसमयमीमांसा इत्यादि अनेक सुनिबन्धों के द्वारा अनेक उपयुक्त विषयलोगों को ज्ञात हो चुके हैं, तो अब संन्यासाश्रमही अन्धकारा वृत क्यों रहै, इस्की भी तुरीयमीमांसा द्वारा मीमांसा होनी उचित है।

विचार करके देखाजाय तो यह तुरीयाश्रम मामांसा बहुतही आवश्यक है, क्योंकि इसपर लोगों के मोक्ष का

निर्भर है और इसमें नाना कक्षा का विवाद है जैसा ब्राह्मणही को संन्यासाधिकार है अन्यवर्ण को नहीं, संन्यासी का ही मोक्ष होता है अन्याश्रमी का नहीं, कर्मानुष्ठान त्याग ही से मोक्ष होता है अन्य प्रकार से नहीं, दण्डग्रहणमात्र ही से मोक्ष होता है और कोई बात आवश्यक नहीं, वैणव एक दण्डही मुख्य है त्रिदण्ड नहीं, अथवा त्रिदण्डही मुख्य है एक दण्ड नहीं, शिखासूत्र और वर्णाश्रम धर्मत्याग ही से मोक्ष होता है प्रकारान्तर से नहीं, निजवर्णाश्रम धर्मानुष्ठान संन्यासी को आवश्यक है, और शिखासूत्र धारण भी आवश्यक है अन्यथा गति नहीं, संन्यासी आप विष्णु है इसे अन्य देवपूजा की आवश्यकता नहीं, संन्यासी किसी देवार्पित भक्ष्यपेयादिक का भक्षणपान न करै, अथवा संन्यासी को अवश्य विष्णुपूजन करना चाहिये और अवश्यही विष्णवर्पित नैवेद्य भोजन करना चाहिये अन्यथा अधोगति है, क्षत्रिय वैश्य की कौन कथा, द्विज स्त्री को भी संन्यासाधिकार है, और क्षत्रिय की आज्ञा से वृद्धावस्था में शूद्र को भी अलिङ्ग संन्यास होता है, इत्यादि नानाविवाद के कारण यह संन्यासाश्रम इस समय पर घोर अन्धकार से आवृत है, इस हेतु इसकी मीमांसा पक्षपात और निज हठ छोड़कर करनी आवश्यक है, यह विचार के अनेक मान्यगण्य राजा, महाराजा, साधु, संन्यासी, गृहस्थ, ब्रह्मचारी, पण्डित, सुजन, लोगों ने मुझसे बहुत समय यह अभ्यर्थना की कि यह कार्य आपही का है, इस हेतु आज मैं तुरीयाश्रममीमांसा विषय पर श्रुतिस्मृतीतिहासपुराण के और व्याकरण ज्यौतिष इत्यादि वेदाङ्गों के वचन द्वारा पूर्वोक्त सर्व विषय की मीमांसा करता हूं, इस ग्रन्थ को जो लोग पढ़ेंगे

उनसे मेरी सविनय प्रार्थना है कि वे लोग इस ग्रन्थ को अपनी वासना के परवश होकर न देखैं किन्तु श्रुतिस्मृत्यादि के प्रमाणानुसार विचार करैं तो उनका तुरीयमीमांसा निरीक्षणसफल होगा।

मोक्ष संन्यासिहीका होता है अन्याश्रमी का नहीं, यह नियम नहीं है किन्तु ज्ञानी का मोक्ष होता है, ब्राह्मण ही को ज्ञान होता है अन्यवर्ण को नहीं, यह भी नहीं है किन्तु सर्वही वर्ण और सर्वही आश्रम में ज्ञान होता है, क्षत्रिय और वैश्य को एक दण्डादि युक्त सलिङ्ग संन्यास होता है अलिङ्ग संन्यास नहीं अलिङ्ग संन्यास शूद्र को होता है, विशिष्टाधिकारी क्षत्रिय को भी त्रिदण्ड संन्यास होता है। क्षत्रियों में तो सुलभा नाम की क्षत्रियकन्या ने त्रिदण्ड ग्रहण करके ज्ञान में मग्न होकर उसका त्याग भी कर दिया यह लिखा है।

क्षत्रियों का मुख्य धर्म प्रजापालन और चातुर्वर्ण्य धर्म रक्षा है वे विनासंन्यास के संन्यासीसे चढबढकर हैं क्योंकि राजा धर्मका षष्ठांशभागी होता है तो यदि ६०० संन्यासी की धर्मरक्षा किईगई तो १०० संन्यासी के तुल्य राजा हो गया। इस हेतु उन्हे तीव्र वैराग्य के विना संन्यास नहीं होता, जिन वचनो में आपाततः क्षत्रिय को संन्यास का निषेध है उनका यही तात्पर्य है। ब्राह्मण को तीव्र वैराग्य के विना भी संन्यास हो सकता है, सर्वही ब्राह्मण संन्यासी को त्रिदण्ड मुख्य है और एकदण्ड तो आपत्काल में होता है, संन्यासी को शिखासूत्र धारण करना चाहिये, शिखासूत्र त्याग तो आपत्काल में होता है, अथवा सिद्धयोगीजनों का कालपरिपाक

से स्वयं हो जाता है, त्रिदण्डी मुख्य परमहंस होते हैं एकदण्डी नहीं, दुर्वासा इत्यादि ऋषि परमहंस थे और उन्हें त्रिदण्ड था यह बात महाभारत हरिवंशादि ग्रन्थों में लिखी है ।

सुभद्राहरण के समय अर्जुन ने और श्रीदेसीतादेवी के प्रतारण के समय राक्षस रावण नें जो वेष बनाया था वह परमहंस का था, क्योंकि वेही संन्यासियों में सर्वश्रेष्ठ होते हैं, श्रेष्ठवेषही के कारण धोखा होता है । और वे दोनों अर्जुन और रावण त्रिदण्डी बनकर धोखा देने आये थे और इसी कारण महाभारत में कहा है कि चार्वाक राक्षस भी शिखीसूत्री त्रिदण्डी बनकर धर्मराज युधिष्ठिर के पास नाना प्रकार के उपदेश करने को आया था क्योंकि धर्मराज शिखीसूत्री त्रिदण्डियों को ही परमहंस जानते थे, व्यङ्ग कलेवर ही उस समय एकदण्डी होते थे। श्वेतकेतु को जो लोग केवल ब्रह्मचारीही कहते हैं उन्हें याज्ञ्यवल्क्य को भी गृहस्थ ही कहना चाहिये, और यदि याज्ञ्यवल्क्य किसी समय गृहस्थ होकर भी शेष में संन्यासी होगये तो उन्हें जानना चाहिये कि श्वेतकेतु भी पीछे से संन्यासी होगये थे। अनेक लोगों ने श्वेतकेतु को केवल ब्रह्मचारी और दुर्वासा को वृत्त्यापरमहंस कहकर अपनी विद्या और विवेकिता को परिचय दिया है, और इसी असिद्ध दृष्टान्त से जड़भरत को अपरमहंस मानकर क्षत्रिय को संन्यासानधिकार कहा है, इत्यादिविषयों परस्थापनीय का स्थापन और खण्डनीय का खण्डन मैंनें इस ग्रन्थ में अति प्रदीप्तवाणी और बड़ी आरभटी से किया है, आप लोग इसे संस्कृत भाग में देखैं।

जब आपको दृढ प्रमाण मिलते हैं तो कल्पतरु परिमल के नामही पर निर्भर न कीजिये किन्तु अपनी बुद्धि के अनुसार युक्ति द्वारा श्रुतिस्मृत्यादि प्रमाणों से काम लीजिये ॥

सन्तुशुभानि वर्द्धमानानि ॥

श्रीमते रामानुजाय नमः ।

तुरीयमीमांसाया विषयसूची ।

श्रीः

शुद्धाशुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	शुद्धम्	अशुद्धम्
१९	७	सर्वेषु वेदेष्वारण्यकमावर्त्तयेत्	सर्वेषु देवेष्वाचरणमावर्त्तयेत्
२०	५	विद्वान्नेतरे केशधारिणः	विद्वा नेतरैःकेशधारणैः
२३	१९	दण्डमना	दण्डग्रहणमना
५७	६	न च याज्ञवल्क्यो गार्हस्थ्यमुवासेति न प्राव्राजीदिति समूहितुं सांप्रतम् इत्यपि निवेशनीयम्	
७३	२३	"अन्धः पङ्गुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः" इत्यप्यत्रनिवेशनीयम्	
११५	७	ब्रह्मण्यम्	ब्राह्मणम्
१२३	४	यतिं पुत्र	यतिः पुत्रम्
१४१	२०	मद	मप

भाषा भूमिका का शोधन ।

पृष्ठ पङ्क्ति

३ १५ इस पङ्क्ति में "चातुर्वर्ण्य के स्थान" सन्यास पर चाहिये ।

,, १६ "व्यवस्था पर" नहीं रहना चाहिये ।

,, १७ इस पङ्क्ति में "कलि में लोगों ने क्षत्रिय वैश्य वर्ण का अभाव कहा है इसी तरह" इतना अधिक पाठ है ।

,, २० "भी" अधिक है ।

५ ७ इस पङ्क्ति में "शिखासूत्र और वर्णाश्रमधर्म त्यागही से मोक्ष होता है प्रकारान्तर से नहीं," इतना अधिक है ।

॥ श्रीः ॥

श्रियै नमः ।

श्रीधराय नमः ।

पूर्वाचार्यचरणनलिनेभ्यो नमः ।

तुरीयमीमांसा ।

श्रीशाङ्घ्रिद्वितयीप्रपित्सुजनतासिद्ध्युत्समीहाविधौ
यस्याः स्वारसिकानवद्यकरुणा जागर्त्यमुचानिशम् ।
स्वाराजत्यतिदुर्गतोऽपि च यया दृष्टो दयातः सकृत्
यत्संबन्धनिबन्धनं भगवतः श्रीमत्त्वमेनां श्रये ॥ १ ॥
तादृक्तच्चियुगप्रपत्तिपरमः संसारपाथोनिधा-
वामज्जज्जनतासमुद्धृतिविधौ सांयात्रिकत्वव्रती ।
यस्तत्त्वत्रितयं चिरन्तनगिरः संव्याचकाराऽऽदिशन्
दिश्याद्देशिकधूर्वहः स नितरां श्रेयस्त्रिवेणुं दधत् ॥ २ ॥
त्रिदण्डिनो महात्मानो येऽपि नन्वेकदण्डिनः ।
तेभ्यो यतिभ्यः सर्वेभ्यो गृहिणो मे नतिः सदा ॥ ३ ॥

अनादिदुर्वासनावासितान्तःकरणा आध्यात्मिकाधिभौतिकाधिदैविकविविधोदर्कदुःखभाजो यथायथं कर्मपरिपाकवशेन देवदेहमारभ्य मानुषपशुपक्षिसरीसृपस्थावरान्ता योनीर्भजमाना नितान्तमलिनमतयो मलिनामलिनमतयो विमलमतयश्च जीवा मातापितृसहस्रेभ्यो ऽप्यधिकतरवात्सल्यशालिभिर्वेदैर्लौकिका*लौकिकोपायसमु-

* पूर्वमीमांसाकुशलैकज्ञेयमिदम् ।

दायसंदर्शनद्वारा पुरुषार्थचतुष्टयमुपदिशद्भिर्भृशमन्वग्राहिषत । ते च वेदा वर्णाश्रमव्यवस्थापुरःसरं वर्णाश्रमिणामनुष्ठेयधर्मानुपदिशन्ति । भगवत्प्रसादोऽपि च सर्वपुरुषार्थनिदानभूतो वर्णाश्रमनियताचारेणैव सिध्यति । यथाऽऽह भगवान् पराशरो वैष्णवपुराणे ।

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥ इति,
अस्ति च तेषामनाश्रमावस्थाननिषेधः ।
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ॥ इति—

ते च ब्रह्मक्षत्रियवैश्यशूद्राश्चत्वारो वर्णाः । तेषां च यथायथं ब्रह्मचर्य—गृहस्थ—वानप्रस्थ—संन्यासाश्चत्वार आश्रमाः । तत्रादिमान् न्यरूपयाम त्रैवर्णिकसर्वस्वे । इति क्रमागतश्चतुर्थ इहाश्रमो निरूप्यते, तत्र केचिद्गार्हस्थ्यव्यतिरिक्तमाश्रमं नेच्छन्ति उदाहरन्ति च तत्र गौतमस्मृतिम् । ऐकाश्रम्यं त्वाचार्य्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्य इति । आचार्य्यास्तु गार्हस्थ्यमेक एवाश्रमो नान्यः कश्चिदस्तीति मन्यन्ते हेतुं चाचक्षते गार्हस्थ्यस्य प्रत्यक्षश्रुतिषु विधानादितरस्य, तदभावात् इति । तथा हि । बह्वृचाः अग्निमीले—इत्यारभ्य मन्त्रब्राह्मणात्मके कृत्स्नेऽपि वेदे होतृकर्त्तव्यमेवामनन्ति । यजुर्वेदिनश्च इषे त्वा इत्यादिना अध्वर्य्युकर्त्तव्यम् । सामगा अपि अग्न आयाहि वीतये इत्यादिनोद्गातृकर्त्तव्यम् । होत्रादयश्च गृहस्था एव । तथा चाधीयमानेषु प्रत्यक्षवेदेषु गृहस्थकर्त्तव्याभिधानेन तदाश्रमविधिः परिकल्प्यते न त्वेवमितराश्रमविधिकल्पकं किञ्चित् पश्यामः । अत एव यावज्जीवमग्निहोत्रं जुहोति—इति श्रुतिः कृत्स्नं पुरुषायुषं गृहिकर्म्मस्वेव विनियुङ्क्ते । श्रुत्य-

न्तरञ्च एतद्वै जरामर्य्यं सत्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यते मृत्युना वा—इति । न चैवं सति कथं ब्रह्मचर्य्याश्रमाङ्गीकार इति शङ्कनीयम् । नैष्ठिकस्य पत्तकोटिनिक्षिप्तत्वादुपकुर्वाणकस्य प्रतिपत्तृत्वेन आश्रमित्वाभावात् यदा कर्म्मित्वेनाभिमतयोर्ब्रह्मचारिवनस्थयोरीदृशी गतिस्तदा कैव कथा कृत्स्न—कर्म्मत्यागिनो यतेः । तस्माद् गार्हस्थ्यमेक एवाश्रमः—इत्याचार्य्याणां पत्तः ।

अत्रोच्यते । अस्ति हि चतुर्णामाश्रमाणां प्रत्यक्षश्रुतिषु विधानम् । तथा च जाबाला आमनन्ति । ब्रह्मचर्य्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत्—इति । आचार्य्यास्तु रागिणमभिप्रेत्य तस्योर्द्ध्वरेतःसु नैष्ठिक—ब्रह्मचर्य्यादिषु त्रिष्वाश्रमेष्वनधिकारं मन्यमाना गार्हस्थ्यमेव वर्णयामासुः । यत्तु कृत्स्नेऽपि वेदे गृहस्थधर्म्मस्यैवाम्नानमित्युक्तम् । तदयुक्तम् । वानप्रस्थस्यापि सदारस्याग्निहोत्रादिसम्भवात् । नैष्ठिकब्रह्मचारिधर्म्मस्तु छन्दोगैः पठ्यते । ब्रह्मचार्य्याचार्य्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्य्यकुलेऽवसादयन्—इति । उपकुर्वाणकधर्म्माः सर्वाशाखासूपनयनप्रकरणेषु प्रसिद्धाः । यतिधर्म्माश्चोपनिषद्भागे । अतो यावज्जीवादि—श्रुतेः कामिविषयत्वेनाश्रमान्तराणि न तथा प्रलपितुं शक्यन्ते । साधिताश्चोत्तरमीमांसायां चत्वार आश्रमाः । तस्मादस्ति संन्यासस्त्रयीशास्त्रसिद्धश्चतुर्थ आश्रमः ॥

तत्र संन्यासो नाम विधितः प्रैषोच्चारणपूर्वकं कर्म्मणां परस्मिन् देवे समर्पणम् । तत्र पूर्वं जन्मान्तरेष्वनुष्ठितानामस्मिन्नपि च जन्मनि संन्यासात्पूर्वमनुष्ठितानां काम्यकर्म्मणां कृष्णकर्म्मणाञ्च भगवति समर्पणमावश्यकम् अन्यथाऽनन्तजन्मार्जितानान्तेषां शुक्ल-

कृष्णकर्म्मणाम्भोगेन एकान्ततः खिलीकर्तुं चेतुञ्चाशक्यतया मोक्षकथैव उदुम्बरपुष्पायिता स्यात् । कर्म्मणां न्यासञ्चाह स्वयम् ।

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ इति,

अत्र जुहोषि ददासीत्यादेः पूर्वं क्रियासामान्यवचनेन करोतिघटितेन यत्करोषीत्यनेन कृष्णकर्म्मसाधारण्येन शुक्लानाम्भगवति न्यासोऽभिधित्सितः । एवमेव तु पाण्डवगीतासु भगवतो वासुदेवस्य स्तुतिमुपक्रममाणेषु पाण्डवेषु कुरुषु च स्वावसरे ।

जानामि धर्म्मं न च मे प्रवृत्तिर्जानामि पापं न च मे निवृत्तिः ।
केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥

इति दुर्योधनः कृष्णानां कर्म्मणां भगवति न्यासमनुतष्ठौ, पापज्ञानपूर्वकं पापे कर्म्मण्यनिवृत्त्याख्यानमुखेन पापकर्म्मप्रसक्तिमभिधाय केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमीत्यनेन, एष एवासाधु कर्म्म कारयति यमधो निनीषतीत्यादिश्रुत्यर्थाभिधानेन भगवति भरन्यासेन पापकर्म्मासंस्पर्शस्याभिप्रेतत्वात् ।

एवञ्चेह कर्म्मसंन्यासस्य गृहस्थेष्वपि मुमुक्षुषु सत्त्वात्तचातिव्याप्तिवारणाय प्रैषोच्चारणपूर्वकमिति सत्यन्तम् । प्रैषोच्चारणमात्रमप्यलक्षणम् । तस्य वासनावल्लोलुपदण्डिसाधारण्यात् अतः कर्म्मणाम्परस्मिन् देवे समर्प्पणमिति विशेष्यदलं, तादृशं च समर्पणं न वासनावत्सु । प्रैषोच्चारणमात्रन्तु जातिब्राह्मण्यमिव न पर्याप्तं लक्षणम् । यथा—

तपःश्रुतञ्च योनिश्चेत्येतद् ब्राह्मणकारकम् ।
तपःश्रुताभ्यां हीनो यो जातिब्राह्मण एव सः ॥ इति

तेन तुल्यं क्रियाचेद्वतिरिति पाणिनीयसूत्रं व्याचक्षाणेन पतञ्जलिना तपःश्रुतहीनस्य जातिमात्रेण ब्राह्मण्यमपर्याप्तम्ब्राह्मण्यमुच्यते ।

एवं प्रैषमात्रमुच्चार्य्य स्वाश्रमनियतकर्म्माण्यननुतिष्ठतो न पर्य्याप्तं चतुर्थाश्रमित्वमित्यपि सुव्यक्तम् । एवञ्च स्वाश्रमनियतकर्म्मणां सञ्चितकर्म्मणाञ्च भगवति न्यासोऽपि चतुर्थाश्रमलक्षणकुक्षिनिक्षिप्तः ।

एतेन संन्यासो नाम विधितो गृहीतानां नित्यनैमित्तिककाम्यश्रौतस्मार्तकर्मणां प्रैषमन्त्रं समुच्चार्य परित्याग इति वासुदेवाश्रमादीनाम्प्राचामेकदण्डिनां संन्यासलक्षणमनुपादेयम् । स्वाश्रमनियतानां वेदान्तश्रवणतन्मीमांसनादीनां नित्यानामनुष्ठानस्य कुटीचकबहूदकयोर्हंसपरमहंसयोरपि चावश्यकतया लक्षणस्यासम्भवग्रस्तत्वात् । यदि तु गृहस्थाद्याश्रमनियतकर्मणां त्याग एवात्र परित्यागशब्देनाभिप्रेत इति मन्यते तर्हि न्यासिनोऽनधिकारादेव तदप्राप्तौ लक्षणे तन्निक्षेपोऽनावश्यक इति लक्षणेनेतरभेदसाधने व्यर्थविशेषणघटितत्वाद् व्याप्यत्वासिद्धिः । यदि तु स्वरूपसङ्कीर्तनमात्रमेवैतत् सर्वकर्मपरित्यागाभिधानं न तु लक्षणकुक्षौ तन्निक्षेप इत्युच्येत तदा प्रैषमात्रोच्चारणं गृहस्थसाधारणं न्यासिनो लक्षणमित्यतिव्याप्तिः । संन्यासविधिना प्रैषोच्चारणञ्चेद्विवक्ष्येत तदा न्यासलक्षणे न्यासः प्रविष्ट इत्यात्माश्रयः, प्रैषमन्त्रं समुच्चार्य्य कर्म्मणां स्वरूपतस्त्यागो लक्षणे प्रविष्ट इत्यप्यनुचितम् उपनिषच्छतरुद्रियपुरुषसूक्तादिधारणस्य प्राणाग्निहोत्रादेश्च भवताऽप्यनुष्ठेयत्वाभिधानात् । यथा च कर्म्मणां स्वरूपतस्त्यागो न गीतादिसच्छास्त्रप्रतिपाद्यो यथा च न शास्त्रान्तरस्यापि तात्पर्यविषयस्तथा इहैवाग्रे पराक्रम्योपपाद-

यिष्यामः स्वावसरे इति तदपि दुर्विवचम् । यदि तु यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयत इति गीतोक्तरीत्या कर्म्मफलत्यागस्त्यागशब्दार्थ इत्युच्यते तदापि विधितो गृहीतानां नित्यनैमित्तिककाम्यश्रौतस्मार्त्तकर्म्मणां त्यागमात्रं न त्यागशब्दार्थः किन्तु पूर्वोक्तरीत्या कृष्णकर्म्मणामपि त्याग आवश्यक इतरथा पुण्यानामिव पापानामपि कर्म्मणां मोक्षविरोधितया स्यादनिर्मोक्ष एव । एवमेव तु तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशाविति भगवान् बादरायणोऽप्यसूचयत् । वस्तुतस्तु यथाविधि प्रैषोच्चारणमात्रमेव संन्यासः इतरत्सर्वं तदाश्रमनिर्वाह्यं कर्म्मजातं न तल्लक्षणे प्रविष्टम् । तस्य सौष्ठवाधानमात्रहेतुत्वात् यथा पाणिग्राहणिकमन्त्रसंस्कारमात्रं विवाहस्तत्कर्त्ता पतिः संस्कार्य्या संस्कारानुयोगिनी पत्नी, यथाह भगवान्मनुः ।

पाणिग्राहणिका मन्त्रा नियतं दारलक्षणम् ॥ इति

एवमिह विवाहन्यायोऽनुसरणीयः । विवाहलक्षणं चास्माभिस्त्रैवर्णिकसर्वस्वे निरूपितमिति ततोऽवधेयम् । मानससंन्यासे शूद्रस्याप्यधिकार इति तत्साधारणं तु विधितो भगवन्नाम–प्रैषान्यतरोच्चारणपूर्वकः कर्मणां भगवति न्यासः संन्यास इति । विधित इत्युक्त्या द्विजस्य अमन्त्रकतया क्रियमाणः, शूद्रस्य च प्रैषेऽनधिकारात् प्रैषेणानुष्ठीयमानोन्यासो न सिध्यति किन्तु द्विजानां प्रैषमन्त्रेण शूद्रस्य च भगवन्नाममात्रेणेति प्रमेयनिरूपणप्रवृत्तानां प्रमाणपल्लवस्पर्शोऽस्यानसंनाह इत्युपरम्यते ऽधिकं तूहनीयं स्वयमेव प्रमाणकुशलैः ।

निरग्निकस्य नात्मसमारोपणम् । स चैवंलक्षितः संन्यासो द्विविधः सलक्षणोऽलक्षणश्च तत्र आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहादित्यादौ पठितमग्निसमारोपणं साग्निकस्यैव न तु निरग्निकस्य

तस्य द्वारलोपेन समारोपणासम्भवात् । अत एव बह्वृचपरिशिष्टम् । अथात्मन्यग्नीन् समारोपयेदेकाग्निमनग्निर्न क्रिञ्चनेति । ततश्च यथा कृष्णले द्वारलोपेन वितुषीकरणं निवर्त्तते एवमिहाग्निसमारोपणमिति शास्त्रतात्पर्यविदः अत एव तु वानप्रस्थमुद्दिश्य—

अग्नीनात्मनि वैतानान् समारोप्य यथाविधि ।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥
ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान् वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥

इति मनुना वैतानाग्निसमारोपणमपि साग्निकवानप्रस्थस्यैवाभिधीयते । एवं चाग्निसमारोपणतद्विरहाभ्यामपि सलक्षणो द्विविधः—तत्र—कमण्डलुदण्डादिलक्षणोपेतः सलक्षणः स च त्रैवर्णिकानाम् । लक्षणापेतः केवलं मानसोऽलक्षणः स च शूद्राणाम् । तत्रापि सलक्षणश्चतुर्विधः कुटीचक—बहूदक—हंस—परमहंस—भेदात् तेऽपि प्रत्येकं द्विविधाः एकदण्डिनस्त्रिदण्डिनश्च । तत्र ब्राह्मणानां त्रिदण्डपक्षो मुख्य एकदण्डस्त्वापदि, क्षत्रियविशोस्त्वेकदण्ड एव मुख्य इति सप्रमाणं परामृष्टमस्माभिरग्रे इति ततोऽवधेयम् ।

विशिष्टाधिकारिणो गृहस्थादेर्न्यासो नावश्यक इति प्रतिपादयितुं स्वप्रतिपाद्यार्थविरोध्युन्मूलनाय शाङ्करपक्षमुपक्षिप्य प्रतिक्षिपति ।

यदपि छान्दोग्योपनिषद्भाष्ये त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति इति ग्रन्थव्याख्यानावसरे सर्वे एते त्रयोऽप्या-

श्रमिणोयथोक्तैर्धर्मैः पुण्यलोका भवन्ति पुण्योलोको येषां ते इमे पुण्यलोका आश्रमिणो भवन्ति अवशिष्टस्त्वनुक्तः परिव्राड् ब्रह्मसंस्थोब्रह्मणि सम्यगवस्थितः सोऽमृतत्वं पुण्यलोकविलक्षणममरणभावमात्यन्तिकमेति नापेक्षिकं देवाद्यमृतत्ववद् यदि च पुण्यलोकातिशयमात्रममृतत्वमभविष्यत्ततः पुण्यलोकत्वाद्विभक्तं नावक्ष्यत्, विभक्तोपदेशत्वादात्यन्तिकममृतत्वमिति गम्यते इति ग्रन्थेन पारिव्राज्यावलम्बनेनैव मोक्षो नान्यथेति । यदपि च तदनुयायिनोऽपरे ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुत्युदिता यस्य ब्रह्मणि संस्था समाप्तिरनन्यव्यापारत्वरूपं तन्निष्ठत्वं तस्य श्रवणादिषु मुख्योऽधिकारः ।

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽथवा ।
न विचारपरं चेतो यस्यासौ मृत उच्यते ॥
आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया ।

इत्यादिस्मृतिषु सर्वदा विचारविधानात्, सा च ब्रह्मणि संस्था विना संन्यासमाश्रमान्तरस्थस्य न सम्भवति स्वस्वाश्रमविहितकर्मानुष्ठानवैयग्र्यादिति बलाद् व्यवस्थापयामासुस्तदिदमत्यल्पसारं, तथा हि किमिह पारिव्राज्येन ब्रह्मसंस्थत्वं, ब्रह्मसंस्थत्वेन पारिव्राज्यं वा विवक्षसि न तत्र प्रथमः, जनकादीनां गार्हस्थ्येऽपि ब्रह्मसांस्थ्यस्य महाभारतादिसच्छास्त्रेष्वसकृदाम्नानात्, अर्थित्वसामर्थ्यादियोगेन तदुपर्यपि बादरायणः सम्भवादित्यधिकरणोक्तरीत्या अपरिव्रजतामपि बृहस्पतीन्द्रादिदेवानां ब्रह्मिष्ठत्वस्य श्रवणाच्च, द्वितीयेऽपि पक्षे ब्रह्मसंस्थत्वेन कर्मस्वरूपत्यागपुरस्सरमेकदण्डलक्षणं पारिव्राज्यं विवक्षस्याहोस्वित् काम्यकर्मत्यागलक्षणं फलत्यागलक्षणं वा, तत्र न प्रथमः पूर्वोक्तयुक्तेः, ब्रह्मसंस्थानामप्यपा-

न्तरतमःप्रभृतिमहर्षीणां स्वयंभासमानसर्ववेदार्थानां कलिद्वापरयोः संधौ कृष्णद्वैपायनभावेनावतारस्मरणाच्च, न हि कृष्णद्वैपायनो ब्रह्मसंस्थोऽपि दण्डं जग्राहेति शृणुमः, कर्माणि वा स्वरूपतः परितत्याजेति, ब्रह्मसंस्थस्य काम्यकर्मत्यागलक्षणसंन्यासे फलत्यागलक्षणसंन्यासे वा नास्माकमीषदपि विप्रतिपत्तिः काम्यानां कर्मणां न्यासं संन्यासं कवयोविदुरिति । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते इति भगवतैव गीतासु भृशमभिहितत्वात्, विदुषां विविदिषावतां वा तादृशसंन्यासश्रवणाच्च । किं च ब्रह्मसंस्थशब्दस्य पङ्कजादिपदस्येव न रूढिः परिव्राजके, किन्तु ब्रह्मणि सम्यगवस्थानं निमित्तीकृत्य प्रवर्तमानोऽयं यौगिकः शब्दो ब्रह्मचारिगृहस्थादिसाधारण इति नास्य शब्दस्याकस्मादेव परिव्राट्सु पक्षपातो युज्यते, अत एव भवति सर्वाश्रमसाधारण इति, तस्मादेव तु आश्रमान् प्रथम–द्वितीय–तृतीयशब्दैरभिदधाना श्रुतिर्भगवती तुरीयं तुरीयत्वेनानभिदधाना प्रथमादिसाधारणीं ब्रह्मसंस्थतां मेने, इतरथा तु चतुर्थाश्रमनैयत्यमेवाभिहितं स्यादिति स्पष्टं सिध्यति, तस्मादेष श्रुत्यक्षराप्रपीडनलभ्योऽर्थः—य एतेषु पुण्येष्वाश्रमेषु चतुर्ष्वपि ब्रह्मसंस्थः सोऽयममृतत्वमात्यन्तिकं मोक्षमेति यस्त्वतथाभूतः परिव्राडपि वा ब्रह्मचारी गृही वानप्रस्थो वा सो ऽयमविकलतत्तदाश्रमधर्मानुष्ठानेन पुण्यलोको भवति । उचितं चैतत् ज्ञानहीनस्य केवलकर्मानुष्ठानेन अक्षयिष्णुफलावाप्तेरसम्भवात् ।

श्रीशङ्कराचार्याः। यदपि त्रयाणां पुण्यलोकोक्त्या तुरीयस्यैवात्यन्तिकदुःखोपरम इति तदतिस्थवीयः न हि ज्ञानहीनानां त्रयाणां पुण्यः क्षयिष्णुर्लोक इति ज्ञानवतां तेषां तल्लोकावाप्तिः, न ह्यनुपनीता द्विजा-

तयो वेदेऽनधिकारिण इति कृतोपनयना अप्यनधिकारिणः, तस्माद् ब्रह्मसंस्थावतो भिक्षोरिव परेषामपि ब्रह्मसंस्थावतां मोक्ष इति सांप्रतं ज्ञानान्वयव्यतिरेकानुविधायित्वात्तस्य, इतरेषामाश्रमिणामभेदज्ञानेनानुन्मथितकषायाणां न ब्रह्मसंस्थासम्भव इति तु कौरैककलनीयं भिक्षोरपि शतरुद्रियावृत्तिप्रणवजपशमदमतितिक्षादेर्वेदान्तविचारादेरन्ततो ब्रह्माहमस्मीति शाश्वतिकानुध्यानस्यैव वा भेदवासनानिबन्धनत्वेन इतराश्रमिसाधारण्यात्, न हि निर्विशेषब्रह्मवादे एतेऽप्यवकाशमाप्नुयुः एतेषां चावकाशे न ह्यपराध्यते गृहस्थादिभिरेव यत्ते मोक्षे नाधिकुर्युः । नापि तदीयकर्माणि मोक्षप्रतिद्वन्द्वीनि भगवदर्पणमुद्रया क्रियमाणकर्मणां वैदिकेन मोक्षविरोधितायाः सम्भावयितुमप्यशक्यत्वात् । जीवननियतकर्मानुष्ठानजनितविक्षेपस्य च सर्वेषाप्याश्रमेषु तुल्यत्वात् प्रत्युतानेकगृहेभ्यो भिक्षासमाहरणादिप्रयत्नजन्यविक्षेपस्तवैवातिरिच्यते । किं च प्रमाणजनिताखण्डवृत्तेरेव त्वयापि जगद्बाधकताया वक्तव्यत्वेन प्रमाणवृत्तेश्च प्रमात्रधीनत्वेन प्रमातृतायाश्च त्वन्मते ऽपि भेदनिबन्धनत्वेन योऽयं भेदावभासस्त्वां शेषकालेऽपि न मुमुक्षति सोऽयं पारिव्राज्ये त्वां त्यजेदिति तवैव व्यामोहमात्रमिति न तेन ते जगन्मोहनं समुचितम् ।

श्रीशङ्कराचार्याः। यदपि अतश्चेदमेवैकं वेदोक्तं पारिव्राज्यं न यज्ञोपवीतत्रिदण्डकमण्डल्वादिपरिग्रहवत् मुण्डोऽपरिग्रहोऽसङ्ग इति च श्रुतिरत्याश्रमिभ्यः परमं पवित्रमित्यादि च श्वेताश्वतरीये न स्तुतिर्न नमस्कार इत्यादिस्मृतिभ्यश्च तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः तस्मादलिङ्गो धर्मज्ञः अव्यक्तलिङ्ग इत्यादिस्मृतिभ्यश्च इत्युपसंजहुस्ते तदप्युपक्रमस्यप्रलापान्नातिशेते त्रिदण्डकमण्डल्वादिसं-

न्यासस्य औपनिषदवाक्य*सिद्धत्वेन तथाऽभिधानस्य स्पष्टं वैदिकाचारविद्वेषनिबन्धनत्वात् मौण्ड्यापरिग्रहादिसंन्यासस्य चाशक्ताधिकारिपरतामातुरसंन्यासिपरतामननुसंहितशरीरपुंस्परतां वा असकृत्तत्र तत्र प्रकरणवशान्निरूपयिष्याम इति न श्रुतिवचनानामनवकाशलक्षणव्याहतिरिति सर्वं चतुरस्रम् । अलिङ्गोऽधर्मज्ञ इत्यादिकं तु मिथ्यात्यागवतामेव प्रतिकूलं स्यादिति नास्माभिर्योजनाक्लेशोऽप्यवलम्ब्यते न स्तुतिर्न नमस्कार इत्यादिकं च भगवन्नारायणव्यतिरिक्तस्तुतिनमस्कारादिनिषेधकमिति गृहस्थानामेव चतुर्थाविरोध्याचारस्य महाभारतादिष्वभिधानेन कैमुतिकसिद्धं तदस्ति न्यासिनामिति अस्माकं यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति न्याय एव नाटितो भवतीति किमु वक्तव्यम् । अत एव तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकमिति तादृशयागस्याविधिविहितत्वमाह वेदपूरुषः स्वयम् । यदपि ।

गच्छतस्तिष्ठतोवाऽपि जाग्रतः स्वपतोऽथवा ।
न विचारपरं चेतो यस्यासौ मृत उच्यते ॥

इत्यादिना सातत्तिकब्रह्मानुध्यानावश्यकत्वप्रदर्शनम् । आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तयेत्यादिकं च तत्तूचितमेव अनावृतज्ञानस्य संसारमूलानुच्छेदकत्वात् अत एव आवृत्तिरसकृदुपदेशादिति भगवान् कृष्णद्वैपायनोऽप्यसूचयत् तच्च भिक्षुगृहस्थादिसाधारणमिति किं तेन ते, एवमेव तु ।

यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ।
सा हानिस्तन्महच्छिद्रं स दोषः साऽधमा गतिः ॥

* औपनिषदवाक्यान्यग्रे स्वावसरे उपन्यस्य साधु व्याख्यास्यामः ।

इति पुराणाचार्याः । तस्मात् स्थिरसुखासनन्यायेनाश्रमविशेषानियमाद् गृहस्थावस्थायामपि कस्यचित्पुरुषधौरेयस्याविकलज्ञानसम्भवान्मुक्तियुक्तेति वृथैव ते संन्यासव्यवधानवर्णनवैयग्र्यम् । अत एव जनकादयो गृहस्थाः सन्त एव सनकादयो ब्रह्मचर्यस्थाः सन्त एव, परे च तपःसमृद्धा ज्ञानस्य परां काष्ठामवाप्य वानप्रस्थाः सन्त एव जीवन्मुक्ता इति पौराणिकानुस्मरणमप्यनुगृह्यते । जन्मान्तरसाधारणसंन्यासस्य मोक्षौपयिकत्वाङ्गीकारे तु जन्मान्तरसाधारणस्य न्यायव्याकरणादिज्ञानस्य नायिकाभेदनिरूपणपरशास्त्रज्ञानस्यायुर्वेदशास्त्रज्ञानस्यापि च मोक्षहेतुत्वे न नो द्वेषः । एतेषु सर्वेष्वपि शास्त्रेषु कस्यचित्तत्त्वमस्यादिवाक्यार्थज्ञाननिदानव्युत्पत्त्याधायकत्वेन परस्य परम्परया नायिकानीतिरीतितत्त्वज्ञानौपयिकतया तासामवहेलनीयत्वज्ञानसंपादकतया, परस्य च हितमितमेध्याशिन एव विद्यासंपत्तिसम्भवेन हिताशनज्ञानहेतुत्वेन ब्रह्मविद्याहेतुत्वावश्यम्भावात् । सति चैवमर्थव्यवस्थाने केषांचिद् निसर्गसिद्धसांसारिकयावदर्थवैराग्यभाजां पक्वकषायाणां महात्मनां ब्रह्मचर्यादेव गार्हस्थ्यादेव वानप्रस्थ्याद्वा संन्यासावलम्बनम् । अयमेव चार्थः ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वेति श्रुत्या कषायपरिपाकक्रममनुरुन्धत्याऽनुरुध्यते केषां चित्तु अतीतविवाहवयस्कानां वैधुर्ये तादृशावस्थाननिषेधेन संन्यासे प्रवृत्तिः गृहस्थाद्यवस्थासु ब्रह्मानुचिन्तनसामग्रीवैकल्ये वेति संन्यासोऽपि नानवकाशः । एतेन मोक्षस्य सर्वाश्रमसाधारण्ये बह्वायाससाध्येतिकर्तव्यताकेषु ज्येष्ठाश्रमेषु पुंसां प्रवृत्त्युपपत्तिरपि समाहिता भवति संन्यासे प्रवृत्तियोग्यतया निदर्शितत्वात् । एवं चैकाश्रम्यपक्षमारभ्य चातुराश्रम्यपर्यन्ताः सर्वे पक्षा यथायथं लब्धावकाशा इति न तद्बोधकवचनकल-

हसम्भावनाऽपि, ततश्च यत्र सर्वथाऽनवरुद्धद्वारे ज्ञाने ज्ञानफले वा शबरीगोपिकादीनां स्त्रीणां, सर्ववर्णाश्रमरहितानां व्याधगुहादीनां, तिरश्चां गजगृध्रादीनामवकाशस्तत्र किमु वक्तव्यमितरेऽधिकुर्युरिति एवं च संन्यासरहितानां ब्राह्मणानां क्षत्रियवैश्यानां च न मुख्यं वेदान्तश्रवणं तत एव नापि साक्षान्मोक्षयोग्यतेति प्रलापजातं केषांचिदमीषामबहुश्रुतानामबहुश्रुतप्रतारितानामनादेयम्। अधिकं चात्र-त्यनिरूपणीयं निरूपितमस्माभिरस्मदीये स्नेहपूर्तिमहानिबन्ध इति तत्तत्र द्रष्टव्यमधिकं जिज्ञासमानैः। प्रकृतमनुसरामः अलक्षणसंन्यासोऽपि द्विविधः भैक्ष्यचर्यादिसहितस्तद्रहितश्च। तत्र* शूद्राणां भिक्षाचर्यासहितोरहितश्चेति द्विविधोऽपि, द्विजानां तु भिक्षाचर्यानियत एव। तत्र द्विजेषु भिक्षूणां। चातुर्विध्यं हारीतेनोक्तम्।

चतुर्विधा भिक्षवस्तु प्रोक्ताः सामान्य†लिङ्गिनः।
तेषां पृथक्पृथग्ज्ञानं वृत्तिभेदात् कृतं च तत्॥
कुटीचको बहूदकोहंसश्चैव तृतीयकः।
चतुर्थः परमहंसश्च संज्ञाभेदैः प्रकीर्तिताः॥ इति,

अस्ति चात्राधिकारविशेषः पुराणप्रमाणकस्तथा हि।

विरक्तिर्द्विविधा प्रोक्ता तीव्रा तीव्रतरेति च।
सत्यामेव तु तीव्रायां न्यसेद् योगी कुटीचकः॥
शक्तोबहूदके तीव्रतरायां हंससंज्ञितो।
मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधने॥ इति,

तत्र कुटीचकस्य वृत्तिविशेषमाह प्रजापतिः।

* शूद्राणां गृहेऽपि भिक्षाचर्यस्य पुराणेष्वाम्नानात्।
† त्रिदण्डलक्षणतुल्यधर्मवन्त इत्यर्थः।

नाम

कुटीचको नाम स्वगृहे वर्तमानः शुचिरकलुषः आहिताग्निषु भिक्षां भुञ्जानोऽपगतकामक्रोधलोभमोहोऽहङ्कारवर्जित आत्मानुग्रहं कुरुते । वृद्धपराशरोऽपि ।

कुटीचका नाम पुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमोहमदमात्सर्यादीन् हित्वा विधिवत्संन्यासं कृत्वा त्रिदण्डजलपवित्रकाषायवस्त्रधारिणः शौचाचमनजपस्वाध्यायब्रह्मचर्यध्यानतत्पराः पुत्रादेरेव भिक्षाकालेऽन्नयाचामात्रमुपभुञ्जानास्तस्यां कुट्यां नित्यं वसन्तः आत्मानं मोक्षयन्ति । इति ॥ स्कान्देऽपि ।

कुटीचकस्तु संन्यस्य स्वेस्वे सद्मनि नित्यशः ।
भिक्षामादाय भुञ्जीत स्वबन्धूनां गृहेऽथवा ॥
शिखी यज्ञोपवीती स्यात् त्रिदण्डी सकमण्डलुः ।

अस्य गृहवासोऽशक्तत्वादनुमन्यते न तु विधेयोऽपि सः । यथोक्तं बौधायनेन ।

कुटीचकाः परिव्रज्य स्वेस्वे वेश्मनि नित्यशः ।
भिक्षां बन्धुभ्य आदाय भुञ्जते शक्तिसंक्षयात् ॥ इति,

बहूदकस्यापि वृत्तिविशेषोऽभिहितः स्कान्दे ।

बहूदकस्तु संन्यस्य बन्धुपुत्रादिवर्जितः ।
सप्तागारं चरेद् भैक्ष्यमेकान्नं च परित्यजेत् ॥
गोबालरज्जुसंबद्धं त्रिदण्डं शिक्यमुद्धृतम् ।
जलपात्रं पवित्रं च खनित्रं च कृपाणिकाम् ॥
शिखां यज्ञोपवीतं च देवताऽऽराधनं चरेत् । इति,

वृद्धपाराशरोऽपि ।

तत्र बहूदका नाम त्रिदण्डकमण्डलुपवित्रपात्रकाषायवस्त्र-

धारिणो वेदान्तार्थावबोधकाः साधुवृत्तेषु ब्राह्मणगृहेषु भैक्षचर्यां चरन्त आत्मानं मोक्षयन्ति ॥ इति ।

पितामहोऽपि ।

बहूदकः स विज्ञेयः सर्वसङ्गविवर्जितः ।
बन्धुवर्गे न भिक्षेत स्वभूमौ नैव संवसेत् ॥
निश्चलः स्थाणुभूतश्च सदा मोक्षपरायणः ।
न कुट्यां नोदके सङ्गं कुर्याद्वस्त्रे च चेतसा ॥
नागारे नासने नान्ने नास्तरे नाचिदण्डके ।
स्वमात्रायां न कुर्याद्वै रागं दण्डादिके यतिः ॥ इति,

हंसवृत्तिः स्कान्देऽभिहिता—

हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैव च ।
कन्थां कौपीनमाच्छाद्यमङ्गवस्त्रं बहिः पटम् ॥
एकं* तु वैणवं दण्डं धारयेन्नित्यमादरात् ।
देवतानामभेदेन कुर्याद् ध्यानं समर्चयेत् ॥

विष्णुरपि तथा ।

यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम् ।
तावान् परिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः ॥ इति,

पितामहश्च ।

हंसस्तृतीयो विज्ञेयो भिक्षुर्मोक्षपरायणः ।
नित्यं त्रिषवणस्नायी त्वार्द्रवासा भवेत्सदा ॥
चान्द्रायणेन वर्तेत यतिधर्मानुशासनात् ।
वृक्षमूले वसेन्नित्यं गुहायां वा सरित्तटे ॥ इति,

* वक्ष्यमाणव्यवस्थया त्रिदण्डालाभे ।

बौधायनोऽपि ।

हंसाः कमण्डलुं शिक्यं दण्डपात्राणि बिभ्रतः ।
ग्रामतीर्थैकरात्राश्च नगरे पञ्चरात्रकाः ॥
त्रिषड्रात्रोपवासाश्च पक्षमासोपवासिनः ।
कृच्छ्रसान्तपनाद्यैश्च यज्ञैः कृशवपुर्धराः ॥ इति,

परमहंसवृत्तिरपि स्कन्दपुराणे प्रदर्शिता ।

कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम् ।
अक्षमालां च गृह्णीयाद् वैणवं दण्डमव्रणम् ॥
माधूकरमथैकान्नं परहंसः समाचरेत् ।
परहंसस्त्रिदण्डं च रज्जुं गोबालनिर्मिताम् ॥
शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत् । इति,

अत्र शिखां यज्ञोपवीतमिति द्वितीयान्तद्वयस्य त्रिदण्डं गोबालनिर्मितां रज्जुमिति द्वितीयान्तद्वयस्येव गृह्णीयादिति पूर्वेणान्वयः । न तु त्यजेदित्यनेन शिखायज्ञोपवीतादेर्नित्यत्वात् । त्यागोऽपि चावैधस्य मोक्षविरोधिनः कर्मण एव वैधस्य त्रिदण्डमाधूकरादेरिहैव विधानेन तस्य कर्मसामान्यत्यागपरताया वक्तुमप्यशक्यत्वात् । आपाततः शिखायज्ञोपवीतादित्यागपरत्वेन प्रतीयमानानां श्रुतिस्मृतिपुराणवचनानां तु न त्यागविधायकत्वं किन्तु येषां भरतरैवतकनिदाघप्रभृतीनां जन्मान्तरसुकृतपरिपाकमहिम्ना भगवत्साक्षात्कारप्राकट्येन सर्वथा आत्मसंमुखीना वृत्तिस्तेषां कर्मस्वनधिकारतःसिद्धे प्रवृत्तिविरहे कर्मत्यागवाक्यान्यनुवादमात्ररूपाणि यानि न तु विधायकानि । वस्तुतस्तु शुचितत्कालजीविकर्मसंबन्धनिबन्धनदेहात्मप्रतीतिमतामेव कर्मस्वधिकाराभरतादीनां कर्मण्यनधिकार इति नान्तरित्वेऽगिनश्चतव्यः

इतिवन्नित्यानुवादरूपाणि तानीत्येव तत्त्वम् ।

अत एव जाबालश्रुतिः तत्र परमहंसा नाम संवर्त्तकारुणि-श्वेतकेतु–दुर्वासऋभुनिदाघ–जडभरत–दत्तात्रेय–रैवतक–प्रभृतयो-ऽव्यक्तलिङ्गाऽव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्ति ॥ इति ।

अत्रोन्मत्तवदाचरन्तीत्यभिदधाना कर्मस्वनधिकारं सकारणकं ख्यापयन्ती अनुन्मत्ता इति च वदन्ती सततं तेषामात्मस्थतां ख्यापयतीत्यतादृशानां नैष्कर्म्ये नाधिकारः । अत एव त्विह उन्मत्तवदाचरन्तीति न त्वाचरेदिति, क्वाचित्कं विधिलिङ्गं तु वि-धिच्छायमिति पूर्वमेव समगरिष्महि । अत एव । जावलश्रुतौ जन-कयाज्ञवल्क्यसंवादरूपेण शरीराननुसंधानेन आत्मानुध्यानमूलकोपे-क्षामात्रमेव यज्ञोपवीतेऽभिहितम् । तथा हि पृच्छामि त्वां याज्ञव-ल्क्य अयज्ञोपवीती कथं ब्राह्मण इति स होवाच याज्ञवल्क्य इद-मेवास्य यज्ञोपवीतं य आत्मेति । तस्मादात्मनिष्ठानां यज्ञोपवीता-दिषूपेक्षामात्रमेव त्यागो न त्वाहत्य त्यागोऽपि त्यागपदार्थस्तथा सति तस्याप्यनुष्ठेयत्वेनात्मसांमुख्यभङ्गप्रसङ्गात् ।

एवमेव तु दण्डं कमण्डलुं शिक्यं पात्रं जलपवित्रकं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूःस्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छन् यथारूपधरो निर्द्वन्द्वो निष्परिग्रहः तत्त्वब्रह्ममार्गे सम्यक्संपन्नः शुद्ध-मानसः प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो भैक्ष्यमाचरन् करपात्रेण लाभालाभयोः समो भूत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूल-कुलालशालाऽग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डि-लेष्वकेतवानप्रयत्नो निर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठोऽशुद्धक-र्मनिर्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसो नाम ।

इति जाबालश्रुतौ यथारूपधरः निर्द्वन्द्वः निष्परिग्रहः आत्मध्यानपरायणः । इत्यादिविशेषणोपसंदानेन ज्ञानमयशिखायज्ञोपवीतवेणवादिधारिणः किमेतैर्नश्वरैः शिखायज्ञोपवीतवेणवादिभिरिति सूचयन् देहानुसंधानवतां यादृच्छिकोऽपि कर्मत्यागो वा शिखासूत्रादित्यागो वा न शास्त्रीय इत्यभिप्रैति । अत एवास्य समन्त्रकत्वमब*धिकरणकत्वं च श्रुत्या चोद्यते ये कदाचिदपि आत्मानुसंधानात् च्यवन्ते क्षत्रियादयस्तान्प्रति । ये तु सततात्मनिष्ठास्ते पुनर्नानुयुज्यन्ते विधिषु प्रतिषेधेषु वेति वर्तुलार्थः ।

नैतावता यस्य कस्याप्युदरभरणपरायणस्य व्यवहारप्रसक्तस्य शिखासूत्रादित्यागः शास्त्रीय इति सिध्यति ॥

अत एव श्रीमद्भागवते भगवान् व्यासः ।

न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ।
शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ इति,
मौनानीहानिलायामा दण्डा वाग्देहचेतसाम् ।
न ह्येते यस्य सन्त्यङ्ग वेणुभिर्न भवेद्यतिः ॥ इति च,

आन्तरैर्विना बाह्येष्वनास्थामेवाख्याति न तु बाह्यानां चिह्नानां दण्डादीनामधार्यत्वं कर्मत्यागं वेति निगूढमवगच्छन्तु पक्षपातं मात्सर्यं चापहाय सन्तः । पारमहंस्यमुपक्रम्य आरुणिश्रुतावपि ।

आरुणिः प्रजापतेर्लोकं जगाम तङ्गत्वोवाच केन भगवन् कर्माण्यशेषतो विसृजानीति स होवाच प्रजापतिः तव पुत्रान् भ्रातृन् बन्ध्वादीन् शिखायज्ञोपवीते यागं सूत्रं स्वाध्यायं च भूर्लोकं

* अपोऽधिकरणं यस्येति विग्रहः ।

भुवर्लोकं स्वर्लोकं जनलोकं तपोलोकं सत्यलोकं चातलवितलसुतलतलातलमहातलरसातलपातालं ब्रह्माण्डं च विसृजेत् । दण्डमाच्छादनं कौपीनं परिगृहेत् शेषं विसृजेत् । ब्रह्मचारी गृहस्थो वानप्रस्थो वा लौकिकाग्नीनुदराग्नौ समारोपयेत् । गायत्रीं च शरीराग्नौ समारोपयेत् । उपवीतं भूमौ वा ऽप्सु वा विसृजेत् । दण्डान् लोकाग्नीन् विसृजेदिति होवाच । अत ऊर्द्ध्वममन्त्रवदाचरेदूर्द्ध्वं गमनं विसृजेत् । त्रिसन्ध्यादौ स्नानमाचरेत् । सर्वेषु देवेष्वाचरणमावर्तयेदुपनिषदमावर्त्तयेत् । इति, ।

नैतदपि कर्माधिकारिणां शिखायज्ञोपवीतादित्यागे मानं परं तु पूर्वोक्तरीत्या सर्वथाऽऽत्मनिष्ठानां ब्रह्माण्डत्यागिनां स्वतःसिद्धं कर्माभावमनुवदत्येव न तु विधित्सति । सिद्धेऽर्थे विधिव्यापारासम्भवात् ।

अत एव पिप्पलादशाखिनः ।

सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः ।
यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ॥
सूचनात्सूत्रमित्याहुः सूत्रं नाम परं पदम् ।
तत्सूत्रं विदितं येन स विप्रो वेदपारगः ॥
येन सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।
तत्सूत्रं धारयेद्योगी योगवित्तत्त्वदर्शिवान् ॥
बहिःसूत्रं त्यजेद्विद्वान् योगसूत्रं समास्थितः ।
ब्रह्मभावमिदं सूत्रं धारयेद्यः स चेतनः ॥
धारणादस्य सूत्रस्य नोच्छिष्टो नाशुचिर्भवेत् ।
सूत्रमन्तर्गतं येषां ज्ञानयज्ञोपवीतिनाम् ॥

ते वै सूत्रविदो लोके ते च यज्ञोपवीतिनः ।
ज्ञानशिखा ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ॥
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते ।
अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा ॥
स शिखीत्युच्यते विद्वान्नेतरैः केशधारणैः ।
कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः ।
एभिर्धार्यमिदं सूत्रं क्रियाङ्गं तद्धि वै स्मृतम् ॥
शिखा ज्ञानमयी यस्य उपवीतं च तन्मयम् ।
ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः ॥
इदं यज्ञोपवीतं तु परमं यत्परायणम् ।
विद्वान् यज्ञोपवीती स्याद् यज्ञास्तं यज्वनं विदुः ॥ इति,

स्पष्टमिह ज्ञानमयशिखायज्ञोपवीतानामात्मनिष्ठानामेव यतीनां वाह्यं शिखायज्ञोपवीतादि नावश्यकं, ये तु पुनर्व्यवहारिणो दण्डिनस्तेषां त्वकारणं दम्भमात्रेण त्यजतां भवेदेव भ्रंशः । एवमेव विशिष्टाधिकारिणमुद्दिश्य विश्वामित्रः । अथापरं परिव्राजकलिङ्गं सर्वतः परिमोक्षमेके सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत् । शिखायज्ञोपवीतकमण्डलुकपालानां त्यागी—इति, अमुमेवार्थं संवदति बौधायनोऽपि अत ऊर्ध्वं यज्ञोपवीतं मन्त्रमाच्छादनं यष्ट्यः शिक्यं जलपवित्रं कमण्डलुं पात्रमित्येतानि वर्जयित्वा । वैणवं दण्डमादत्ते सखा मे गोपाय ॥ इति, व्यासस्मृतावपि ।

यज्ञोपवीतं कर्माङ्गं वदन्त्युत्तमबुद्धयः ।
उपकुर्वाणकात्पूर्वं यतो लोके न दृश्यते ॥

यावत्कर्माणि कुरुते तावदेवास्य धारणम् ।
तस्मादस्य परित्यागः क्रियते कर्मभिः सह ॥
अग्निहोत्रविनाशे तु जुह्वादीनि यथा त्यजेत् ।
यथा च मेखलादीनि गृहस्थाश्रमवाञ्छया ॥
पत्नीयोक्त्रं यथेष्ट्यन्ते सोमान्ते च यथा ग्रहान् ।
तद्वद्यज्ञोपवीतस्य त्यागमिच्छन्ति योगिनः ॥ इति,

तदिदं वचनजातं पूर्वोपदर्शितश्रुतिस्मृतिपुराणवाक्यानुरोधेन वक्ष्यमाणश्रुतिस्मृत्यनुरोधेन च क्षत्रियादिपरं वा ऋभुजडभरतदत्तात्रेयाद्यात्मनिष्ठविशिष्टाधिकारिपरं वेति लोकवञ्चनाय वा अज्ञानेन वाऽऽलस्येन वा शिखायज्ञोपवीतादित्यागो नाशायैव केवलमिति वैदिकः पन्थाः। वस्तुतस्तु जडभरतादेरपि यज्ञोपवीतमभूदित्यग्रे वदिष्यामः। इदमप्यत्रावधेयं चतुर्ष्वप्याश्रमेषु यथाधिकारं वेदानां तत्तदंशावृत्तिरावश्यकीति तस्या उपवीताचमनादिपूर्वकतया यज्ञोपवीतं न्यासिनोऽप्यावश्यकं त्यागवचनानां तु ज्ञाननिष्ठा ज्ञानशिखा ज्ञानयज्ञोपवीतिनः इति पैप्पलादश्रुत्याद्यनुसारेण विशिष्टाधिकारिपरतया वा ज्ञानप्रशंसामात्रपरतया वोपपत्तौ नार्थानुष्ठापकता अत एव स्मृतिः।

यदा तु विदितं तत्स्यात् परं ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य उपवीतं शिखां त्यजेत् ॥

इति ब्रह्मनिष्ठस्यैव उत्सृष्टसर्वव्यवहारस्य विशिष्टाचारं बोधयति न तु साधनावस्थस्य। यज्ञोपवीतं नाच्छादनं चरति परमहंसः। अयज्ञोपवीती शौचनिष्ठः काममेकं वैणवं दण्डमादधीत इति श्रुत्योस्तु।

किमस्य यज्ञोपवीतं का शिखा कथं चास्योपस्पर्शनम् ।

इदमेवास्य यज्ञोपवीतं यदात्मध्यानं विद्या शिखा इति कौषीतकिब्राह्मणे प्रश्नोत्तररूपेणाम्नाततया तदेकवाक्यत्वेन स्फुटमेवार्थवादरूपतेत्यतिस्वच्छम् ।

अयमत्र स्फुटार्थसंग्रहः—येषु वाक्येषु वेणुवेणुकदण्डधारणमुक्तं तत्र तेषां वाक्यानां क्षत्रियवैश्यपरत्वं तेषां ब्रह्माण्डपुराणे वेणुवैकदण्डधारणस्य धर्म्यत्वाभिधानात् । यत्र शिखायज्ञोपवीतादित्याग उच्यते तत्र प्रशंसायै ज्ञानशिखत्वं ज्ञानयज्ञोपवीतत्वं चोद्यते कदाचित्तु यज्ञोपवीतत्यागवचनानां पुरातनयज्ञोपवीतत्यागतात्पर्यकत्वं यथाऽऽह स्मृतिः । नखानि निकृत्य पुराणं वस्त्रं यज्ञोपवीतं कमण्डलुं त्यक्त्वा नवानि गृहीत्वा ग्रामं प्रविशेत् ॥ इति,

अत एव तु—हारीतः—

चत्वार आश्रमा ह्येते संध्यावन्दनवर्जिताः ।
ब्राह्मण्यादेव हीयन्ते यद्यप्युग्रतपोधनाः ॥

एवमेव स्मृत्यन्तरम् ।

सायं प्रातः सदा संध्यां ये विप्रा नो उपासते ।
कामं तान् धार्मिको राजा शूद्रकर्मसु योजयेत् ॥ इति,

बौधायनश्च—

अनागतां तु ये पूर्वामनतीतां तु पश्चिमाम् ।
संध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः ॥ इति,

अत्रिश्च—

यज्ञोपवीतं सर्वेषां द्विजानां मुक्तिसाधनम् ।
परित्यजन्ति ये मोहान्नरा निरयगामिनः ॥

पाद्मेऽपि ।

शिखायज्ञोपवीतेन त्यक्तेनासौ कथं द्विजः ॥ इति,

मनुश्च—

सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः । इति, यच्च नैष्कर्म्ये प्रतीयते तत्र जडभरतादीनां महाभागवतानामनवरतब्रह्मचिन्तानां स्वतः सिद्धकर्माभावानुवादमात्रं न तु तत्तात्पर्यकत्वं तस्येति, तदिदमग्रे विवेचयिष्यामः । प्रकृतमनुसरामः । एकदण्ड—त्रिदण्डभेदेन पूर्वं द्वैविध्यमभ्यधायि न्यासिनां तत्र त्रिदण्डपक्षो मुख्यो ब्राह्मणानामेकदण्डस्त्वनुकल्पो यथाह मेधातिथिः ।

यावन्न स्युस्त्रिदण्डास्तु तावदेकेन पर्यटेत् ॥ इति,

हारीतश्च तथा ।

नष्टे जलप्रविष्टे वा त्रिदण्डे वा प्रमादतः ।
एकं तु वैणवं दण्डं पालाशं वैल्वमेव वा ॥
गृहीत्वा विचरेत्तावद् यावल्लभ्येत् त्रिदण्डकम् ॥ इति,

एतेन त्रिदण्डविधायकवाक्यानां परमहंसव्यतिरिक्तबहूदकादिपरत्वं व्यवस्थापयन्तो माधवाचार्याः प्रत्युक्ताः ।

शिखिनस्तु श्रुताः केचित् केचिन्मुण्डाश्च भिक्षुकाः ।
चतुर्धा भिक्षुकाः प्रोक्ताः सर्वे चैव त्रिदण्डिनः ॥

इत्यत्रिणा, सर्वेषामाश्रमिणां क्रमेण लक्षणमभिदधता । त्रिदण्डेन यतिश्चैव इति त्रिदण्डं यतिलक्षणं पुरस्कृत्य यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाश्रमी इति प्रायश्चित्तमुखमेकदण्डमनाश्रमिताप्रयोजकमित्याचक्षाणेन दक्षेण च स्पष्टं त्रिदण्डपक्षस्यैव पारमहंस्येऽपि पुरस्कृतत्वात् । अत एव त्वेकमुख्येन हारीतदत्तात्रेयपितामहाः कुटीचकादींश्चतुरोऽप्युपन्यस्य बाह्यान्तरवृत्तिभेदेन परस्परं भिन्नानामपि तेषां सर्वेषां त्रिदण्डग्रहणमेव साधारणं लिङ्गमामनन्ति ॥

वृत्तिभेदेन भिन्नाश्च नैव लिङ्गेन ते द्विजाः ।
लिङ्गं तु वैणवं तेषां त्रिदण्डं सपवित्रकम् ॥ इति,

यदप्यत्र बहूदकस्यैव वैविध्यमाख्याय तत्परत्वेन त्रिदण्ड-ग्रहणव्यवस्थापनं माधवाचार्याणां तदपि रभसादेव शिखिनौ कुटीचकबहूदकौ, मुण्डौ हंसपरमहंसौ चाभिप्रेत्य विदधत्सु ।

शिखिनस्तु स्मृताः केचित्केचिन्मुण्डाश्च भिक्षुकाः ।
चतुर्धा भिक्षुकाः प्रोक्ताः सर्वे चैव त्रिदण्डिनः ॥

इत्यादिवचनेषु कुटीचकबहूदकहंसपरमहंसभेदभिन्नानां सर्वेषां त्रिदण्डधारणस्याम्नातत्वेन मेधातिथिहारीताभ्यामेकदण्डस्य त्रिदण्डालाभपरत्वेन कण्ठत आख्यानाच्च त्रिदण्डवचनानां सामान्यपराणां कुटीचकबहूदकमात्रपरत्वव्यवस्थापनस्य सर्वथा अन्याय्यत्वात् अत एव तु ।

परः परमहंसस्तु तुर्याख्यः श्रुतिरब्रवीत् ।
यमैश्च नियमैर्युक्तो विष्णुरूपी त्रिदण्डभृत् ॥ इति

स्पष्टं परमहंसस्य दण्डत्रयधारणाभिधानम् । यथा चेह । दण्डत्रयपदेन वाग्दण्डादित्रयमभिप्रेतुं न शक्यं तथा पूर्वमेवाब्रूमहि पराक्रमिष्यामश्चामुं विषयमवष्टभ्य हंसडिम्भकोपाख्यानप्रकरणनिर्णयावसरे यत्र दुर्वासःप्रभृतिपरमहंसानां वैणवत्रिदण्डधारणं सुव्यक्तमुक्तमावेदयिष्यते । एतेन यो हि बहूदक एव सन् ग्रामैकरात्रादिकां हंसवृत्तिमाचरति स स्ववृत्तितो हंसो भवति वेदान्तश्रवणादिकां परमहंसवृत्तिं चेदाश्रयति तदा वृत्तितः परमहंसो भवति तेषां हंसादीनां त्रिदण्डमेव लिङ्गम् अनेनैवाभिप्रायेण वृत्तिभेदेन भिन्नाश्च नैव लिङ्गेन ते द्विजाः इति, अन्यथा मुख्ययोर्हंसयोरेकदण्डविधायकान्युदाहृतानि वचनानि निर्विषयाणि स्युः तस्मादेक एव दण्डः परमहंसस्य इति

तु पराशरमाधवीयमसांप्रतम् । वृत्तिभेदेन बहूदकवैविध्यस्यावाचनिकत्वेन तथोपकल्प्य वचनकदर्थनस्यान्याय्यत्वात्, न हि वृत्तिभेदेन बहूदक एकोभिन्द्यान्नेतरे इति माद्दीयनियमः । ततश्च वृत्तिभेदभिन्नत्वं चतुर्विधमित्युपाधारणमिति । नैव लिङ्गेन ते द्विजाः । इति सावधारणमेकलिङ्गमनुमन्यमाना सर्वेषां परमहंसपर्यन्तानां चिदण्डिनां सुव्यक्तमवगमयतीति नाव्यक्तं मीमांसकानाम् । परमहंसमुद्दिश्यैकदण्डधारणधर्म्यत्वाभिधानपरश्रुतिस्मृतिवाक्यानां तु ज्ञानात्मकैकदण्डपरत्वमिति सुव्यक्तम् । ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते । इति ज्ञानशिखा ज्ञाननिष्ठा* ज्ञानयज्ञोपवीतिनः इत्यादिपैप्पलादश्रुतौ च ज्ञानस्यैव श्रेष्ठाधिकारिणः सर्वात्मकत्वाभिधानेन ज्ञानात्मकैकदण्डपरत्वात् । अत एव तु भगवान् व्यासः ।

चिदण्डस्य परित्याग एकदण्डस्य धारणम् ।
एकस्मिन् दृश्यते वाक्ये तस्मादस्य प्रधानता ॥ इति

स्पष्टं वैणवचिदण्डापेक्षया ज्ञानात्मकैकदण्डेऽभ्यर्हितत्वमभिदधौ । न चेह वैणवचिदण्डापेक्षया वैणवैकदण्डेऽभ्यर्हितत्वबुबोधयिषया तथाऽभिधानमेकदण्डस्यानेकस्मृतिष्वनुकल्पतायाः पूर्वमेवावेदितत्वात् ।

यदपि सर्वे चैव चिदण्डिनः इति वाग्दण्डादिविषयं न तु यष्टित्रयाभिप्रायम् । तथा च मनुः ।

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ।
यस्यैते नियता बुद्धौ चिदण्डीति स उच्यते ॥

* ज्ञानस्य चास्ति सर्वकर्मापेक्षं प्राशस्त्यं किमु त त्रिदण्डमपेक्ष्य यथाह भगवान् प्रयम् । सर्वं कर्माऽखिलं पार्थ ज्ञाने परिसमाप्यते । इति ।

चिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः ।
कामक्रोधौ तु संयम्य ततः सिद्धिं निगच्छति ॥ इति,

दक्षोऽपि ।

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ।
यस्यैते नियता दण्डास्त्रिदण्डीति स उच्यते ॥

एतेषां च त्रयाणां दण्डानां स्वरूपं स एवाह ।

वाग्दण्डो मौनता प्रोक्ता कर्मदण्डस्त्वनीहता ।
मानसस्य तु दण्डस्य प्राणायामो विधीयते ॥ इति,

माधवाचार्यः । तदिदमप्यनवद्यायाभिधानम् ।

शिखिनस्तु श्रुताः केचित् केचिन्मुण्डाश्च भिक्षुकाः ।
चतुर्द्धा भिक्षुकाः प्रोक्ताः सर्वे चैव त्रिदण्डिनः ॥

इति स्मृतौ शिखित्वमुण्डित्वादिलक्षणबाह्यभेदभिन्नानां तेषां चतुर्णां बाह्येनैव वैणवत्रिदण्डलक्षणधर्मेण साम्यस्य सर्वे चैव त्रिदण्डिनः इत्यनेन विवक्षितुमुचितत्वात् ।

अत एव चतुर्णामपि न्यासिनां वैणवत्रिदण्डलक्षणसामान्यलिङ्गवत्तामभिप्रयन् हारीतः ।

चतुर्विधा भिक्षवस्तु प्रोक्ताः सामान्यलिङ्गिनः ।
तेषां पृथक्पृथग्ज्ञानं वृत्तिभेदात्कृतं च तत् ॥
कुटीचको बहूदको हंसश्चैव तृतीयकः ।
चतुर्थः परमहंसो योयः पश्चात् स उत्तमः ॥ इति

वैणवत्रिदण्डलक्षणसामान्यलिङ्गवत्त्वेऽपि तेषां पार्थक्येन ज्ञानहेतुं वृत्तिभेदमाह तत्कृतमेव च तेषां न्यूनाधिकभावमभिप्रैति

न त्वेकयष्टित्रियष्टिधारणमात्रप्रयुक्तं माधवोदितं तेषां ज्येष्ठकनिष्ठभावं पुरश्चिकीर्षतीति किमिहास्थाने सिंहविक्रान्तेन ।

मैत्रायणीयश्रुतौ तु परमहंसमुपक्रम्य

इन्द्रस्य वज्रोऽसीति त्रीन् वैणवान् दण्डान् दक्षिणपाणौ धारयेदेकं वा यदोक्तं तदा सशिखं वपनं कृत्वा विसृज्य यज्ञोपवीतम् । इति स्पष्टमेव वैणवत्रिदण्डग्रहणमाम्नायते । एकदण्डस्तु त्रिदण्डालाभलक्षणापदीति पूर्वमेव स्मृतिं पुरस्कृत्य व्यवातिष्ठिपाम ।

न च कुटीचकादि तात्पर्येण त्रिदण्डो विधीयते एकदण्डस्तु परमहंसमभिप्रेत्य अत एव तु व्यवस्थार्थवापदोपादानमिति वाच्यम् । अत्र श्रुतौ यदोक्तं तदा इति पदोपसंदानमाहात्म्येन एकस्यैव परमहंसस्योपकरणसंपत्तद्विरहलक्षणापत्कालभेदेन त्रिदण्डैकदण्डधारणतात्पर्यकताया एव युक्तत्वादितरथा कुटीचकादेस्त्रिदण्डाधिकारित्वे परमहंसस्य चैकदण्डधारित्वे पृथग्बुबोधयिषिते उभयोर्व्याप्यवृत्तित्वेन कालिकाव्याप्यवृत्तित्वार्थकदाप्रत्ययघटिततदापदोपसंहितस्य यदोक्तं तदा सशिखं वपनं कृत्वा इत्याद्यभिधानस्य सर्वथाऽसांगत्यापत्तेः । यदि तु दण्डित्वसामान्यावच्छिन्नस्योभयाधिकारित्वेनाव्याप्यवृत्तितया दाप्रत्ययघटितप्रयोगयोग इति वदसि तदाऽपि त्रिदण्डैकदण्डाधिकारितावच्छेदकरूपभेदेन नैकौ द्वयमर्हतीति तद्दोषतादवस्थ्यमिति श्रुत्यक्षरस्वारस्याभिज्ञाः । वापदं तु व्यवस्थार्थकम् ।

त्रिदण्डपक्षस्य मुख्यत्वं ज्योतिर्विदामप्यविप्रतिपन्नमत एव वह्निष्ठशिरोमणेः सुरगुरोर्योगेन त्रिदण्डग्रहणलक्षणन्यासं ते वदन्ति यथा हि वृहज्जातकभट्टोत्पल्यां सत्याचार्याः ।

तेष्वधिकबली जीवस्त्रिदण्डिनं भार्गवश्चरकमुख्यम् ।
नग्नश्रमणं सौरो बुधस्तदाजीविकाचार्यम् ॥ इति,

केचित्तु पल्लवावलम्बिनः त्रिदण्डैकदण्डपक्षयोर्वैकल्पिकत्वमाहुः प्रमाणयन्ति च स्मृतिवचनानि, यथाऽऽह व्यासः ।

त्रिदण्डमेकदण्डं वा व्रतमास्थाय तत्त्ववित् ।
पर्यटेत्पृथिवीं नित्यं वर्षाकाले स्थिरीभवेत् ॥ इति,

शौनकश्च अथ काषायवासाः सखा मा गोपायेति ।
त्रिदण्डमेकदण्डं वा गृह्णाति ॥ इति,

आश्वमेधिके भगवान् कृष्णः ।

एकदण्डी त्रिदण्डी वा शिखी मुण्डित एव वा ।
काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिर ! इति,

विष्णुबौधायनावपि ।

एकदण्डी भवेद्वापि त्रिदण्डो वा मुनिर्भवेत् ॥ इति,

तदिदमप्यनवहितैकचोद्यम् । स्मृतिकारैरेवैकदण्डग्रहणस्य त्रिदण्डालाभलक्षणापदि व्यवस्थापनेन प्रमाणपरतन्त्राणां तथैवार्थव्यवस्थापनस्य युक्ततया त्रिदण्डैकदण्डपक्षयोर्वैकल्पिकतायाः शङ्कितुमप्यशक्यत्वात् । तस्मादस्मदुक्तव्यवस्थैव साधीयसी ।

अत्रेदमप्यवधेयं त्रिकर्मणां भूमिहारद्विजानां क्षत्रियविशां चैकदण्ड एव मुख्यः क्षत्रियकुमारिकायाः सुलभायाः स्त्रियोऽपि यौ त्रिदण्डग्रहण–तत्परित्यागौ भारते आम्नातौ तौ तु युगान्तरे स्त्रीणामप्याश्रमान्तराधिकारितया तस्याश्च सर्वथा विशिष्टब्राह्मणतुल्यतयेत्यनुदाहरणमेतत् । आमनन्ति च स्मृतिकारा युगान्तरे स्त्रीणां मौञ्जीबन्धनं स्वगृहे भिक्षां शाश्वतिकं ब्रह्मचर्यं चेति, न चैतत्कलौ–

न च कलिवर्ज्येषु संन्यासस्याप्याम्नाततया कथं तन्मीमांसनारम्भ इति वाच्यम् ।

> यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
> अग्निहोत्रं च संन्यासं तावत्कुर्यात्कलौ युगे ॥

इति विशिष्याग्निहोत्रसंन्यासयोर्विधानात् ।

इदानीमपि तेषु तेषु पुण्यदेशेषु ब्राह्मणक्षत्रियवैश्यशूद्रादिविभागस्य कथंचिदपि स्वशाखामात्रस्य वा तदेकदेशस्य संहितादेर्वाऽध्ययनमपीति संन्यासः समुचित एव । केचित्तु कलौ संन्यासनिषेधवाक्यानां त्रिदण्डसंन्यासनिषेधपरत्वमेव कथयन्ति । युक्तं चैतत्तस्यैव मुख्यत्वेन निषेधशास्त्रतात्पर्यविषयताया युक्तत्वात् । परं तु मुख्यस्य त्रिदण्डपक्षस्य यथा निषेधशास्त्रविषयता कैश्चिन्मुख्यत्वेन व्यवस्थापिता तथा तत एव हेतोः अग्निहोत्रं च संन्यासं तावत्कुर्यात्कलाविति शास्त्रेण मुख्यस्य विधेयता ऽपि युक्तेति जन्मान्तरसहस्रसमनुष्ठितज्ञाताज्ञातशुभकर्मविपाकभाजां केषांचिदमीषां भगवति न्यस्तसमस्तभराणां बलवति कलावपि न्यासविधिर्युज्यत इति किं चित्रम् ॥

किं च विविदिषासंन्यासस्य कलौ वर्जनसंभवेऽपि विद्वत्संन्यासो वैदुष्यनिमित्तक इति निमित्तसमवधाने स नैव निषेद्धुं शक्यते ।

अत एव तु यदहरेव विरजेत् तदहरेव प्रव्रजेदिति श्रुतिर्वैराग्ययोगे अहर्मात्रावकाशदानेऽपि न संचुकोच किं पुनर्युगकालावकाशप्रतीक्षा, स च श्रोतव्यः श्रुतिवाक्येभ्य इत्युक्तप्रकारेण श्रवणमनननिदिध्यासनानि सम्यगनुष्ठाय प्राप्तपरर्द्धिना विदुषाऽनुष्ठितः संन्यासो विद्वत्संन्यासो यथा महर्षेर्याज्ञवल्क्यस्य, स हि मैत्रेयीमुपदिदिक्षुस्त्वर-

मागास्तां त्वरयितुं स्वकर्त्तव्यं संन्यासं प्रतिजज्ञे तद्यथा अथाह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन्मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा ऽऽहमस्मात् स्थानादस्मीति एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति अत्र इति होक्त्वा प्रवव्राजेत्युक्त्या अव्यवधानेन कथनप्रव्रजनयोः पौर्वापर्याम्नानान्मध्ये विदुषोऽनुष्ठेयान्तरं वारयतीति विविदिषासंन्यासे यथा श्राद्धाष्टकाद्यनुष्ठानं न तथा विद्वत्संन्यासे, ततश्च प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेदित्युक्तरीत्या तत्र प्रैषोच्चारणमात्रेण संन्याससिद्धिरित्यवगन्तव्यम् ।

अत एव ब्रह्मचारिगृहस्थादीनां प्रैषाभ्यासस्तथाऽऽवश्यको यथा सत्यां तात्कालिक्यां चौरव्याघ्राद्युत्थभीतौ तत्समुत्थायां संन्यसिषायामुपदेष्ट्रन्तरनैरपेक्ष्येण स्वयमेव प्रैषमावर्त्य प्रव्रजितुं पर्याप्नुयात् । तथा हि महाभारतम् ।

उत्पन्ने सङ्कटे घोरे चौरव्याघ्रादिसङ्कटे ।
भयभीतस्य संन्यासमङ्गिरामुनिरब्रवीत् ॥
आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् ॥

अत्र श्राद्धादिविधिमविधाय प्रैषोच्चारणमात्रस्य संन्यासपूरकत्वोक्त्या उपदेष्टृनैरपेक्ष्यं स्पष्टं सिध्यति, एवं च यदि गृहस्थादेः प्रैषमन्त्रोनोपस्थितिगोचरः स्यात्स्याच्चोपदेष्ट्राऽप्यपेक्षितः कथमवकल्पेत स्वयं संन्यासपूर्तिः । अङ्गिरा अप्याह—

संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया ।
प्रव्रजत्यकृतोद्वाहः परं वैराग्यमाश्रितः ॥
प्रव्रजेद् ब्रह्मचर्येण प्रव्रजेच्च गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाऽथ दुःखितः ॥

इति, आतुरोऽतिसंनिहितमृत्युः, दुःखितः आगामिदुःखजन्यज्ञानवान्, भयभीतस्य संन्यासमङ्गिरामुनिरब्रवीदिति भारतोपवृंहणवाक्येन तादृशार्थस्योचितत्वादिति स्मृतितत्त्वविदः ॥

त्रिदण्डैकधारणपक्षयोर्मुख्यत्वामुख्यत्वविषये विप्रवदन्ते वादिनः प्रकारान्तरेणापि । निर्णयामः ।

तत्र दक्षः ।

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव* च ।
यस्यैते नियता बुद्धौ त्रिदण्डीति स उच्यते ॥
वाग्दण्डो मौनमातिष्ठेत्कर्मदण्डस्त्वनीहता ।
मानसस्य तु दण्डस्य प्राणायामो विधीयते ॥

इत्येवमान्तरमावश्यकं यतिधर्ममभिधाय, आश्रमचतुष्टयपरिचयार्थं वाह्यलिङ्गैस्ताँल्लिलक्षयिषुः स एव ।

मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते ।
गृहस्थो यष्टिवेदाद्यैर्नखरोमैर्वनाश्रितः ॥
त्रिदण्डेन यतिश्चैव लक्षणानि पृथक्पृथक् ।
यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाश्रमी ॥ इत्याह ।

ततश्च पूर्वोक्तवाह्याभ्यन्तरलक्षणशून्यानामनाश्रमित्वाभिधानेन यतीनामान्तरत्रिदण्डधारणपूर्वकं वाह्यत्रिदण्डधारणमावश्यकमितरथा तु पुनरनाश्रमित्वमिति युक्तमेव । अत्र ब्रह्मचारी गृहस्थो वनाश्रितो यतिरिति प्रत्येकमेकवचनोपादानेन शृङ्गग्राहिकया प्रत्येकतत्तद्व्यक्तौ तत्तल्लक्षणसत्त्वमभिप्रेतमिति कुटीचकादिषु चतुर्ष्वपि वाह्याभ्यन्तरत्रिदण्डसत्त्वमुक्तं भवति । अत एव तु लक्षणानि

* कर्मदण्डश्च ते त्रय इति पाठान्तरम् ।

पृथक्पृथगित्युक्तिरितरथा तु एकदण्डस्य ब्रह्मचारिसाधारण्यादलक्षणतैवापद्येत । मेखलाजिनसहितस्यैकदण्डस्य ब्रह्मचारिधार्यतया मेखलाजिनरहितस्यैकदण्डस्य च यतिधार्यतया तस्यापि यतिलक्षणत्वसमूहनं तु मूढधियामेव तथा सति मेखलामात्रस्य लक्षणत्वसंभवे शेषवैयर्थ्यप्रसङ्गेन मेखलादीनां प्रत्येकमेव ब्रह्मचारिलक्षणत्वेन एकदण्डमात्रस्यापि च ब्रह्मचारिलक्षणत्वेनाभिमततया यतेरपि चैकदण्डत्वेऽभिमते पार्थक्येन यतिलक्षणत्वानुपपत्त्या स्मृतिस्थस्य लक्षणानि पृथक्पृथगित्यस्यासङ्गत्यापत्तेः ।

अत एव त्वत्रिः ।

शिखिनस्तु स्मृताः केचित् केचिन्मुण्डाश्च भिक्षुकाः ।
चतुर्धा भिक्षुकाः प्रोक्ताः सर्वे चैव त्रिदण्डिनः ॥ इति,

न च वैणवत्रिदण्डिनां मौण्ड्यासम्भवादिह त्रिदण्डपदेनान्तरत्रिदण्ड एव ग्राह्यो न तु वाह्योऽपीति वाच्यम् । जरसा जीर्यच्छरीराणां कर्मानुष्ठानाशक्तावगत्या वैणवत्रिदण्डिनामपि मौण्ड्यावलम्बनाचारस्य सम्भवात्, यथा हि शिखिनां त्रिदण्डानां गृहस्थवानप्रस्थाद्यपेक्षयाऽधिकः शौचाचारभारो न तथा मुण्डानाम् अत एव तु त्रिदण्डिनां समाचारे सर्वथा अशक्तानातुरान् वृद्धांश्चानुगृह्णती श्रुतिर्भगवती त्रिदण्डमपहाय एकदण्डग्रहणमपि सहते एकदण्डधारणस्य त्रिदण्डापेक्षयाऽभ्यर्हितत्त्वे तु वैणवत्रिदण्डग्रहणसमर्थस्य वैणवैकदण्डग्रहणं त्रिदण्डनान्तरीयकमिति कः पुमान् वैणवत्रिदण्डं सर्वकर्मानुष्ठानभारभूतं ग्रहीतुमुपक्रमेतापि । तस्मात्कर्मानुष्ठानाशक्तयो वृद्धा वा आतुरा वा अलसा वा मौण्ड्यैकदण्डकर्मत्यागादिना श्रुत्याऽन्वग्राहिषत । मौण्ड्यमनुतिष्ठतां कर्मानुष्ठानानर्हतया त्रिदण्डस्यापि धारयितुमशक्यत्वमभिमत्यैव भगवान् व्यासः ।

त्रिदण्डस्य परित्याग एकदण्डस्य धारणम् ।
एकस्मिन् दृश्यते वाक्ये तस्मादस्य प्रधानता ॥

इति वदन् त्रिदण्डधारणसमनियतधर्मानुष्ठानासमर्थस्याप्येकदण्डधारणमावश्यकमित्यावश्यकत्वलक्षणप्राधान्यमाचचक्षे ।

अत एव महाभारते सुलभा—जनकसंवादादौ पुराणान्तरेषु चाभिधीयमानं वैणववैष्णवत्रिदण्डस्य तद्वतां च एकदण्डापेक्षया माहात्म्यमपि व्यासस्य सङ्गच्छते इति विवेचकाः ।

एवमेव तु त्रिदण्डस्याभ्यर्हितत्वेन क्षत्रियविशोर्वैष्णवलिङ्गधारणनिषेधादनुकल्पे एकदण्डेऽभ्यनुज्ञानं पुराणाचार्याणां श्रुतीनां च, एवमेव तु मन्वाना हारीत—दत्तात्रेय—पितामहाः कुटीचकादींश्चतुरोऽपि न्यासिन उपन्यस्य ।

वृत्तिभेदेन भिन्नाश्च नैव लिङ्गेन ते द्विजाः ।
लिङ्गं तु वैणवं तेषां त्रिदण्डं सपवित्रकम् ॥

इत्यैककण्ठ्येन वैणववैष्णवत्रिदण्डस्य अच्छिद्रक्षवच्च परमहंसान्तानां चतुर्णामपि लक्षणत्वमाचक्षते । परमहंसस्यैकदण्डप्रतिपादनपरश्रुतीनां स्मृतीतिहासपुराणानां च ब्राह्मणे*तरपरत्वं पूर्वोपदर्शितार्थपरत्वमापत्परत्वं वेति तु भृशमभ्यधायीति नाम्रेडितुमवसरः । अत एव इन्द्रस्य वज्रोऽसीति त्रीन् वैणवान् दण्डान् दक्षिणे पाणौ धारयेदेकं वा यदैकं तदा सशिखं वपनं कृत्वा यज्ञोपवीतं त्यजेदिति मैत्रायणीयश्रुतिरपि परमहंसस्य त्रिदण्डं मुख्यमवबोध्य कर्मानुष्ठानासमर्थस्य तस्यैव शिखादेरनावश्यकतया तदंशेऽभ्यनुज्ञा-

* ब्राह्मणेतरस्य सलिङ्गसंन्यासासम्भवाभिधानं त्वपर्यालोचितशास्त्राणामेवेति सर्वमन्यत्र निरूपितमिति द्रष्टव्यम् ।

नतो एकदण्डधारणं गौणतयाऽवबोधयति, अत एव त्वनुकल्पता-सूचकं वा-पदम् ।

तस्मादिह महाप्रयाससाध्येतिकर्त्तव्यताकस्य त्रिदण्डधारणस्य अत्यल्पेतिकर्त्तव्यताकस्यैकदण्डधारणस्य च न समविकल्पोऽनतरां कुटीचकादिविषयं त्रिदण्डधारणं परमहंसविषयं चैकदण्डधारणमित्यप्यवकल्पते कल्पः, वेदप्रतारणभिया परतन्त्रप्रज्ञानामुपबृंहणानुरोधेनैव श्रुत्यर्थस्यावधार्यतया यत्राचारविषये स्मृतीनां स्वातन्त्र्येणापि प्रामाण्यं तत्र सन्दिग्धे श्रौतेऽर्थे शाखान्तरश्रुत्यनुमते चार्थनिर्णायकतया विवेचकेनावश्यमङ्गीकरणीयतया अत्रि–दक्ष–हारीत–दत्तात्रेय–पितामहैरपरैश्च स्मृतिकारैरैकस्वर्येण पारमहंस्येऽपि त्रिदण्डानुस्मरणान्मैत्रायणीयश्रुतौ स्पष्टं पारमहंस्ये त्रिदण्डधारणस्य चोद्यमानतया एकदण्डस्य चानुकल्परूपतया विधानात् । परमहंसस्य त्रिदण्डधारणसिद्धेर्निरुक्तरीत्याऽप्यावश्यकत्वाच्च ।

नतमामेकदण्डस्य मुख्याधिकारिकत्वं त्रिदण्डस्य चाधमाधिकारिकत्वमिति सुकल्पं त्रिदण्डं धारयत एकदण्डस्यावश्यमुपनततया बह्वायाससाध्ये त्रिदण्डे कस्याप्यप्रवृत्त्या शास्त्रस्याननुष्ठापकत्वलक्षणाप्रामाण्यापत्तेः । एकदण्डैकवस्त्रपरिग्रहमुखेन शिखायज्ञोपवीतत्रिदण्डशिक्यजलपात्रादित्यागेन मोक्षजननौपयिकमदृष्टमुत्पद्यते इति तु स्वमतानभिज्ञानकृतमुच्छृङ्खलतामात्रम् । सत्यानृतधर्माधर्मादिसम्बन्धशून्यत्वेनाभिधीयमानस्याधिकारिणोऽदृष्टविशेषार्जिजिषया शिखायज्ञोपवीतादित्यागे वा एकदण्डादिपरिग्रहे वा प्रवृत्त्यनुपपत्त्या तथाऽभिधानस्य दुरभिनिवेशवशंवदतैकप्रयोज्यत्वादिति सत्यं सनातनं सनातनतनं कल्पतरुमाश्रिता अमलमतयः ।

कल्पतरुपरिमल-पक्षद्वयम् । कल्पितं कल्पतरुमाश्रिताः परिमलमतयस्तु देहात्माभिमानेन तृणीकृतजगत्त्रया दम्भाहङ्कारमदमानादिवशीकृतसर्ववृत्तयो नैष्कर्म्यसिद्धिमुखेन शिखासूत्रदण्डत्यागं पुरस्कृत्य नैष्कर्म्यसिद्धये यतमाना वयमिति शब्दमात्रं प्रयुञ्जाना विपरीताः कर्मतो निरीक्ष्यन्ते । तथा हि कल्पतरौ ।

त्रिदण्डं कुण्डिकां चैव सूत्रं चाथ कपालिकाम् ।
जन्तूनां वारणं वस्त्रं सर्वं भिक्षुः परित्यजेत् ॥
कौपीनाच्छादनार्थन्तु वासोऽर्द्धस्य परिग्रहम् ।
कुर्यात्परमहंसस्तु दण्डमेकं तथैव च ॥ इति विष्णुः ॥

काण्वायनाश्च ।

तत्र परमहंसा नाम त्रिदण्डकमण्डलुशिक्यजलपात्रपवित्रपादुकासनशिखायज्ञोपवीतकपालानां त्यागिनो न तेषां धर्माधर्मौ न सत्यं नापि चानृतं सर्वसहाः सर्वसमाः समलोष्टाश्मकाञ्चना यथोपपन्नभैक्षाहाराश्चातुर्वर्ण्यं भैक्षचर्यं चरन्त आत्मानं मोक्षयन्ते ।

इति स्मृतिद्वयं पुरस्कृत्य एनयोश्च स्मृत्योर्दृढं प्रामाण्यं संसाध्य स्वप्रतिपिपादयिषितोऽर्थः साधितः । तत्र समलोष्टाश्मकाञ्चनानां सर्वसहानां सर्वसमानां समीकृतसत्यानृतधर्माधर्माणां सर्वदा सर्वतो भातात्मतत्त्वानां कर्मण्यनधिकारात्सर्वत्यागिनां संनिहितत्रिदण्डकमण्डल्वादित्यागः शरीरात्मत्वाननुसन्धानकृतोऽनूद्यत इति नेतरेषामनधिकारिणां रागद्वेषादिभाजां स धर्म्य इति सिध्यति अत एव तु काण्वायनवाक्ये त्यागिन इति त्यागशीलास्त्यागधर्माणस्त्यागसाधुकारिणो वा बोध्यन्ते आक्वेस्तच्छीलतद्धर्मतत्साधुकारिष्वित्यधिकारस्थेन संपृचानुराधाङिति पाणिनीयानुशासनेन घिनुणि

तादृशार्थस्य लाभात् । अथवा प्रशंसार्थकतद्धितेन्प्रत्ययान्तस्त्यागिशब्द उभयथाऽपि तु स्वभावसिद्धसर्वत्यागवतां त्यागोऽनूद्यत एव युक्तं चैतत् ।

न हि चिदग्डैकदग्डधारणत्यागादिकं महाभागवता जडभरतादयोऽकार्षुरिति क्वचिच्छ्रूयते । न वा गङ्गागोदावर्यादिपुण्यतमनदीषु त्रिषवणं, कुरुक्षेत्रप्रभासद्वारकादिपुण्यपीठनिषेवणं वाऽनुतष्ठुरिति क्वचिदुपलभ्यते । उपलभ्यमानं भवदपि वा परस्योदाहरणीयतामाप्नोति । तेषामतिक्रान्तसर्वविधिनिषेधभूमिकत्वात्, तेषां हि सततात्मसंमुखीनवृत्तीनां यदृच्छासंजातत्याग–परिग्रहादिकं विटपिनामृतुषु स्वभावसिद्धपत्रोद्गमनस्थितिनिपतनवदेव नेष्टद्विष्टसाधनताज्ञानकृतं किमपि पृथग्जनस्येव दोषदूषितचेतसः । अत एव व्यापकीभूतवासनाविरहादेव तेषां धर्माधर्मसंबन्धविरहः काग्वायनैः स्मर्यते ।

ततश्च यत्रै*काग्र्यन्यायेन यथासुखं ब्रह्मचिन्तनजुषां यथा न देशकालवयोजात्याभिजात्यासनादिनियमो न तथा चिदग्डैकदग्डशिखाशिक्ययज्ञोपवीतजलपात्रादिनियमोऽपीति किं नश्छिन्नम् ।

यच्च मन्त्रविशेषाम्नानमुखेन शिखायज्ञोपवीतादित्यागवचनजातं तत्तूपवीतद्वयवतामेकस्योपवीतस्य, अनेकशिखानां चैकशिखायास्त्यागबोधकमित्यादिकमिहैव ग्रन्थेऽन्यत्र निरूपितमिति तत्तत्रैव द्रष्टव्यम् ।

एतेनेदमपि प्रतिक्षिप्तं वेदितव्यम् । मोक्षे श्रौतस्मार्ततत्तदाश्रमकर्मानुष्ठानजनितातिशयानामिव शिखाशिक्यचिदग्डयज्ञोपवी-

* यत्रैकाग्रता तत्राविशेषादिति ब्रह्मसूत्रोक्तन्यायेनेत्यर्थः ।

तत्त्यागजनितातिशयस्याप्यपेक्षणीयत्वेन शिखासूत्रादित्यागस्यावश्य-कत्वमिति धर्माधर्मसंबन्धविरहिण एव सर्वथाऽऽत्मारामस्याभातस-र्वार्थस्य त्यागाधिकारितायाः स्मृतिपूक्तया शिखासूत्रादित्यागज-न्यातिशयाधानार्थं त्यागप्रवृत्तेर्दुर्वचत्वात् । अत एव त्विहैव स्मृतौ न तेषां धर्माधर्माविति पठ्यते ।

तदेवं कात्यायनस्मृत्यर्थनिरूपणनयेन विष्णुस्मृतिरपि व्या-ख्येया । विष्णुस्मृत्युक्त एकदण्डस्तु प्रकरणानुग्रहेण सर्वं त्यजतो ज्ञानरूपैकदण्डात्मेत्युचितमेवेति किं बहुना ऽभिहितेन वाग्विग्ला-पनस्वरूपेण । यदपि भगवतो व्यासस्य ।

यज्ञोपवीतं कर्माङ्गं वदन्त्युत्तमबुद्धयः ।
उपकुर्वाणकात्पूर्वं यतो लोके न दृश्यते ॥
यावत्कर्माणि कुरुते तावदस्यैव धारणा ।
तस्मादस्य परित्यागः क्रियते कर्मभिः सह ॥
अग्निहोत्रविनाशे तु जुह्वादीनि यथा त्यजेत् ।
यथा च मेखलादीनि गृहस्थाश्रमवाञ्छया ॥
पर्वीयोक्तं यथेष्यन्ते सोमान्ते च यथा ग्रहान् ।
तद्वद्यज्ञोपवीतस्य त्यागमिच्छन्ति योगिनः ॥ इति,

स्मरणं न तदप्ययोगिनमधिकृत्य, स्पष्टमेव तद्वद्यज्ञोपवी-तस्य त्यागमिच्छन्ति योगिनः इतीहैवाधिकार्युक्तेः, न हि शतं सहस्राणि वा वर्षाणि समाध्यारूढस्य कश्चिदपि स्नानसंध्याद्यननुष्ठाना-त्प्रायश्चित्तमातिष्ठते । स्मर्यते च पुराणेषु सुदीर्घं तपश्चरतां वल्मी-काद्युपच्छन्नदेहत्वमिति तादृशां स्वत एव कालपरिपाकमहिम्ना शिखासूत्रादिकं स्वकारणमपिय*त्पृथिव्यादिभूतभावमाप्नोतीत्यत्र क-

* स्वकारणे लयमापद्यमानम् ।

स्यात्तस्य विवादसम्भवो ऽपि, यत्त्वेतैरेव वचनैरयोगिनां देहात्मभानवतां शिखासूत्रादित्यागकथनं तदेव वैदिकमर्यादाधिरूढानां नो द्वेष्यम् । तदेवं कल्पतरोः प्रतारणमात्रमयोगिनां निस्सूत्रत्वादिव्यवस्थापनमिति ।

योऽपि महाभारतेऽपि ।

एकदण्डी त्रिदण्डी वा शिखी मुण्डित एव वा ।
काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिर ! ॥
तथा, जटाऽजिनधराश्चान्ये पङ्कदिग्धा जितेन्द्रियाः ।
मुण्डानिस्तन्तवश्चापि वसन्त्यर्थार्थिनः पृथक् ॥ इति

समुद्योगोऽशिखत्वासूत्रत्वादिसमर्थनस्य सोऽपि न स्थाने अत्र ह्युत्तममध्यमाधमाधिकारिभेदेन आचारत्रयवतो दण्डिनोऽभिप्रेत्य भगवतः कृष्णस्य युधिष्ठिरं प्रति पूज्यत्वोपदेशः । तत्र त्रिदण्डिनः शिखिनो मुख्यत्वेन पूज्याः, भगवद्गीतासु ।

कर्मफलत्यागिनामेवोपक्रमोपसंहारादिना त्यागित्वस्याभिधानेन तादृशाचारस्य च परमभागवतेषु शिखिषु त्रिदण्डिष्वेव सम्भवात् ।

एकदण्डिनो मुण्डिनो मध्यमाः । तादृशाचारस्यानुकल्परूपत्वात् । त्रिदण्डालाभ एवैकदण्डविधेः कर्मानुष्ठानाशक्तावेव मैाण्ड्यावलम्बनाच्च ।

सर्वलक्षणशून्याः काषायमात्रग्राहिणस्त्रिदण्डैकदण्डरहिताः काषायमात्रसारास्तेऽधमास्तथाऽपि ते पूज्याश्चतुर्थाश्रमचिह्नत्वात्काषायधारणस्येति, अत एव त्विह काषायमात्रसारोऽपीत्यपि—कारस्वारस्यमपि नोपहन्यते इति भगवतो गीताशास्त्राचार्यस्य तात्पर्यम् ।

अत्र परिमलमतय: । शिखी त्रिदण्डीति बहूदकादिविषयं, मुण्डित एकदण्डीति परमहंसविषयं, काषायमात्रधारिण इति यो मुख्यपरमहंसो दण्डमप्यनिच्छन् पामरजनसङ्कोचपरिहाराय कौपीनाच्छादनमात्रं धारयति तद्विषयम् इति व्यवस्थापयामासुस्तदिदं मन्दमनीषितं, न हि परमोत्तमाधिकारितात्पर्येण काषायमात्रसारत्वाभिधानं समुन्मिषति तस्य बाह्याभ्यन्तरत: सारस्वरूपत्वेन काषायमात्रसारत्वाभिधानासङ्गते:, न ह्येतादृशविशिष्टाधिकारिणां चिह्नितत्वमपेक्ष्यते । यच्चोत्तमाधिकारिण: पामरजनसङ्कोचेन काषायधारणाभिधानं तदप्यनवधानानिबन्धनं श्रुतिषूत्तमाधिकारिण उद्दिश्य अनुन्मत्ता उन्मत्तवदाचरन्त: । इत्यभिहितत्वेन ये तृणीकृतजगत्त्रया महेन्द्रादिभ्योऽपि न संचुकुचुर्ब्रह्मिष्ठास्तेषां पामरजनसङ्कोचस्य सर्वथाऽशङ्कनीयत्वात् । यच्च,

जटाऽजिनधराश्चान्ये पङ्कदिग्धा जितेन्द्रिया: ।
मुण्डा निस्तन्तवश्चापि वसन्त्यर्थार्थिन: पृथक् ॥

इति राजधर्मप्रशंसार्थं वचनं तदपि संन्यासिनो मौण्ड्यनि:सूत्रत्वाद्यवगमयदुत्तमाधिकारिणां नि:शिखत्वासूत्रत्वादिसमर्थकं तेषां महाभारते तादृग्धर्म्याभिधानादिति कल्पतर्वभिधानं तदपि कल्पनामात्रं प्रकरणत: श्लोकाक्षरैश्च तादृशार्थस्यालाभात् । यथा हि महाभारतारम्भे क्लैब्यसमाविष्टचेतसा ममताऽऽकुलमानसेन स्वधर्मात्प्रच्योष्यमाणेन धनञ्जयेन कर्मानुष्ठानपराङ्मुखवृत्तिता बहुधाऽऽवेदिता तावताऽपि भगवांल्लोकगुरुर्गीतार्थोपदेशापदेशेन जगदुद्दिधीर्षुराश्रितवत्सलो भागवतप्रिय: सखायमर्जुनं याथातथ्येन* वेदा-

* अत एव, नष्टो मोह: स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ।
स्थितोऽस्मि गतसंदेह: करिष्ये वचनं तव ॥

र्थमजिग्रहत् अचूचुदच्च भागवतधर्मेषु, तथैव युद्धान्ते कश्मलवृत्तितां गतो युधिष्ठिरः प्रजापालनलक्षणस्वधर्मात्प्रच्युतचेताः स्वयमच्युतेन भ्रातृभिर्द्रौपद्या परैश्च तत्त्वार्थवेदिभिः स्निग्धैरुपदिष्टश्चेतसः शान्तिं न लेभे न च प्रससाद राज्यमादातुं तदाऽवसाने भीष्मं स्वदर्शनेनानुजिघृक्षुर्भागवतधर्मान् भागवतादेव शिक्षयिषुर्युधिष्ठिरमादाय स्वयमाजगाम भीष्मसन्निधौ भगवान् कृष्णः, स च वरलब्धाव्याहतदृष्टिर्याथातथ्येन सर्वधर्मानुपदिदेश ततश्चैवं प्रवृत्तेऽस्मिन् श्लोके ।

जटाऽजिनधराश्चान्ये पङ्कदिग्धा जितेन्द्रियाः ।

इत्यादिमेनार्द्धभागेन अत्याश्रमिणां निर्देशः । अवशिष्टेन च कपटवेषाणां निर्देशो न त्वेकदण्डिनां शिष्टानाम्, अत एव त्विह वसन्त्यर्थार्थिनः पृथक् इति स्पष्टं तेषां मौण्ड्यं निःसूचतां चावलम्बमानानामपि अर्थार्थितया कपटमाचमेतदिति तात्पर्यम् । अत्र अन्ये पृथगिति पदद्वयस्वारस्यं गमकं, ततश्च सुकुमारस्य राज्ञो भवतो नाधिकारोऽत्याश्रमे तस्य दुष्करत्वात् ।

परस्य च कुहककारणकतया न ते न्यासे कथमपि प्रवृत्तिः श्रेयसे इति राजधर्मनिषेवणमेव न्याय्यमित्युपदिदिक्षितोऽर्थः ।

अत एव त्विह वसन्त्यर्थार्थिनः पृथगिति वदन् कपटकाषायाणां निर्जनवासोऽप्यर्थार्थिताप्रयुक्त इति व्यञ्जयन्न तेषामनुकरणं विरक्तस्य ते युक्तमिति बोध्यते । तस्मादिह त्वत्सिषाधयिषितार्थस्य न लवेनाप्यनुप्रवेशसम्भावनेति न स्थाने विजयसंनाहः ।

यदपि लिङ्गेऽपि पुराणे ।

निकृत्य सशिखान् केशानुपवीतं विसृज्य च ।
पञ्चभिर्जुहुयादप्सु भूःस्वाहेति च वा क्रमात् ॥

इत्यधिमतयाथातथ्यः प्रववृते कर्मणि ।

इति दिग्वाससां स्वगोष्ठीष्वेव प्रसह्य लिङ्गसंदर्शनं तदपि तेषामेव लज्जावहम् । नानोपवीतानां नानाशिखानाञ्च पुंसामेकैकशिखायज्ञोपवीतत्यागपराणामेषां वचसां परेण सिषाधयिषितेऽर्थे प्रामाण्यविरहात् ।

यदपि पद्मपुराणेऽपि ।

ततो व्रतानां परमहंसव्रतमनुत्तमम् ।
तेभ्यो ददौ दिवौकोभ्यः सतामप्यविरोधि यत् ॥
पठ्यते यज्ञशाखायां महत्यैतामहं व्रतम् ।
परं ब्रह्मोदितं तद्वदागमाचारचेष्टितम् ॥
ब्रह्माराधनमुख्यानां व्रतिनां तीव्रतेजसाम् ।
भृगुरध्यापयामास वेदोक्तं परमं हि तत् ॥
एवं व्रतधराः सर्वे वसन्ति स्माऽमरेश्वराः ।
हंसव्रतधरा भूत्वा ध्यायमानाः परं पदम् ॥
हित्वा शिखां सोपवीतां विधिना परमेण ते ।
कालेन महता ध्यानादेवं ज्ञानात्मतां गताः ॥
हंसव्रतिनो ये चात्र नियताः संयतेन्द्रियाः ।
एवं भिक्षां तु भुञ्जाना ध्यायमानाः परं पदम् ॥
दण्डहस्तास्तु सञ्जाता भिक्षाव्रतसमन्विताः ।
त्यक्त्वा शिखां सोपवीतां दण्ड एकः करे धृतः ॥
हंसव्रतं परं प्रोक्तं पुरा चीर्णं मया चिरम् ।
व्रतानां परमं गुह्यं पवित्रं पापनाशनम् ॥
हंसव्रतं द्विषेन्मोहात्पापेनाच्छादितो नरः ।
न स मुच्येत पापेन कल्पकोटिशतैरपि ॥

तस्माद्धंसव्रतानां तु न हन्यान्न च दूषयेत् ।
भिक्षां परमहंसानां यतीनां यः प्रयच्छति ॥
विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयात् ।
शिखां यज्ञोपवीतं च त्यक्त्वा चरति यो व्रतम् ॥
हंसव्रती स विज्ञेयो मोक्षकामी भवेच्च सः ।
शिखायज्ञोपवीतेन त्यक्तेनासौ कथं द्विजः ॥
निन्द्यते देवलोकेषु पूजितो देवदानवैः ।
दुष्टं विशिष्टमथवा हंसव्रतधरं नरम् ॥
न स्पृशेदङ्गमङ्गेन देवरूपः स वै द्विजः ।

इति कल्पतरुः, तदिदमपि न तस्यार्थसाधकं प्रत्युत सिद्धान्तिनोऽनुकूलं 'देवेषु ब्रह्मा बृहस्पतिः क्षत्र इन्द्रो विशो मरुतः' इत्यादिना ब्राह्मणेन ब्रह्म–क्षत्रिय–वैश्य–विभागसद्भावव्यवस्थापनेन तत्र क्षत्रियवैश्ययोः शिखासूत्रत्यागपुरस्सरमेकदण्डाधिकारस्य स्थापितत्वेन क्षत्रविड्जातीयदेवानामन्येषां चैकदण्डाधिकारितादृशां निर्जरसां प्रागुक्तैकदण्डशिखासूत्रादित्यागलक्षणसंन्यासस्य समुचितत्वात्, प्रायो हि देवानां भोग्यभोगोपकरणदृढतरकलेवरपटुतमेन्द्रियनिर्जरवयोऽप्सरःसौलभ्यादिना नानुकूल्यं परमपुरुषार्थसाधनसामग्रीष्विति निष्कामकर्मानुष्ठानपराङ्मुखवृत्तीनां तेषां त्रिदण्डधारणानधिकारितया अरुन्धतीतारकानुप्रदर्शनन्यायेन मुख्यमार्गे प्रवृत्तिमासादयितुमेकदण्डग्रहणमनुमन्यते । एवमेव तु भगवतो व्यासस्य । तदुपर्यपि बादरायणः सम्भवादिति सूत्रेण साम्भविकत्वाभिधानसूचितं देवानामनिर्विण्णानां दुःखबहुलमानुषापेक्षया मोक्षेऽधमाधिकारित्वाभिधानम् । एवमेव त्विह हंसव्रतं परं प्रोक्तं पुरा चीर्णं मया चिरमिति

जन्मान्तरानुष्ठितैकदण्डग्रहणेन चिरं चीर्णेनापि मोक्षो नाभूत् किन्तु पापनाशनमात्रमेव अत एवाग्रे पवित्रं पापनाशनमित्युच्यते, ततश्च त्रिदण्डस्येव नैकदण्डस्य अन्तरङ्गोपायतेति प्रघट्टकार्थ इति न तिरोहितं तीक्ष्णधियाम् । अत एव त्विह पुराणाचार्यैः सतामप्यविरोधि यदित्यूचे । अयमर्थः ब्राह्मणानां हि वैणववैष्णवत्रिदण्डधारणं मुख्यं यत्क्षत्रियवैश्ययोर्निषिद्धं परं त्वापत्काले सतां सत्त्वप्रधानानां ब्राह्मणानामपि यन्न विरुध्यते । अवस्थाविशेषे ब्राह्मणानामपि तथाऽवस्यानुज्ञातत्वात् वलीपलितसमाक्रान्तास्त्रिदण्डसमनियताचाराशक्ता जरसाऽभिभूतवर्ष्माणो ब्राह्मणा अपि मौण्ड्यैकदण्डधारणाधिकारिण इत्यब्रूमहि ।

अत एव महाभारते ।

> जरया च परिद्यूनो व्याधिना च प्रपीडितः ।
> चतुर्थे चायुषः शेषे वानप्रस्थाश्रमं त्यजेत् ॥

इत्यारभ्य ।

> केशलोमनखान् वाप्य वानप्रस्थो मुनिस्ततः ।
> आश्रमादाश्रमं पुण्यं पूतो गच्छति कर्मभिः ॥

इत्यादिना जराऽभिभूतदेहस्य चतुर्थाधिकारिताऽभिहिता । यत्तु सतामप्यविरोधि यदित्यस्य सन्तो ब्रह्मसाक्षात्कारवन्तः । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति श्रुतेस्तेषामद्वितीयब्रह्मसाक्षात्कारनिरस्तसमस्तकर्तृकर्मक्रियादिभेदप्रपञ्चानामप्यविरोधि नैष्कर्म्यादित्यर्थोपवर्णनं तत्तु वचनस्वारस्याज्ञानकृतं तथा सति सतां परमनुकूलमेकदण्डधारणमभिप्रेत्य अविरोधित्वाख्यानस्यासङ्गत्यापत्तेः । न हि सचेतसामनुकूले सुखे अविरोधित्वाख्यानं किन्तूदासीने उपे-

चाहं तृणादावित्यकिंचिदिदम् । अत्रासन्त इत्यादिक्रमपपाठमुपकल्प्य तदर्थान्वाख्यानं तु प्रायोऽशुद्धमभिधाय कुचोद्यतुल्यमित्युपेक्ष्यते ।

केचित्तु केशनखलोमवापनपदेन पुराणशिखादित्यागेन नूतनशिखादिस्थापनमभिप्रयन्ति उदाहरन्ति च स्मृतिवचनानि । नखानि निकृत्य पुराणं वस्त्रं यज्ञोपवीतं कमण्डलुं त्यक्त्वा नवानि गृहीत्वा ग्रामं प्रविशेदित्यादीनि । प्रदर्शयन्तु नाम ते तावताऽपि अधिकारिविशेषे व्यवस्थितं स्पष्टमभिहितं मौण्ड्यैकदण्डधारणं न नो द्वेषविषयो यथाऽधिकारं सर्वस्यापि व्यवस्थापनीयत्वात् । तस्माद्वैष्णवं वैष्णवचिदण्डममुख्यमामनतां केषांचिदमीषां जन्मान्तरोपचितदुरभिनिवेशादृते न किंचित्प्रमाणमिति प्रमाणपरायणाः ।

यदपि केचन वैष्णववैष्णवचिदण्डं द्विषन्तः युधिष्ठिरधनञ्जययोस्त्रिदण्डपरिव्राजकवेषग्रहणे यज्ञोपवीतादिसद्भावो राजगृहेषु चिरनिवासार्थितया कुटीचकाद्यनुकरणाद् यज्ञोपवीताद्यत्यागेन कुटीचकाद्यनुकरणे सम्भवति स्वाश्रमविरुद्धेन तत्त्यागेन परमहंसानुकरणानौचित्यात् । एवं दशाननस्यापि कुटीचकाद्यनुकरणादेव यज्ञोपवीतादिसद्भावः ।

इत्याहुः परिमलमतयस्तदिदमप्यमलमतीनां हासास्पदम् । लोको हि स्वार्थसाधनतत्परः सर्वथा तं वेषमनुकरोति येन स्वात्मगोपनपुरस्सरमवश्यमर्थसिद्धिनिश्चयस्ततश्च दशाननस्य रक्षोजातीयस्य कामक्रोधभयाकुलचेतसः शिखासूत्रादेरनावश्यकतया मौण्ड्यैकदण्डधारण एव प्रवृत्तिरुचिता स्याद्यदि चेतायां पारमहंस्यं मौण्ड्यैकधारणेनैव व्यक्तीकृतं स्यात् उत्तमाश्रमानुकरणेन कार्यसिद्धेरसंशयं सम्भाव्यमानत्वात् । न हि रक्षसां रूपवेषादिनियमः शिखासूत्रा-

दिनियमो वा, नियमे वा कामरूपाणामिच्छानुरूपसर्वकार्याणां तेषां शिखासूत्रादित्यागतद्ग्रहणयोर्न कश्चिदायासः प्रत्यवायो वा । अत एव दशाननभगिन्या शूर्पणखया दिव्यं विग्रहमास्थाय श्रीरामो लक्ष्मणश्च यथानुक्रमं पतिभावेनाभ्यर्थितः, एवं च सति दशाननस्य तदधिकसामर्थ्यस्य मौण्ड्यैकदण्डधारणादिकमपि सुकरमवश्यमनुष्ठेयमेवाभविष्यद्यदि त्रेतायां त्रिदण्डापेक्षया तत्र बहुमानास्पदता समभावयिष्यत् । न च त्रेतायुगसम्भवाः स्वाभाविकसत्त्वोत्कर्षशालिनः पुरुषा मौण्ड्यैकदण्डधारणशिखासूत्रादित्यागे बहुमानभाजोऽभूवन्निति दशाननस्य न तथाऽनुकरणम् । अत एव महाभारते समरानन्तरमनुष्ठितौर्ध्वदैहिके शोकाकुलमानसे राज्यपराङ्मुखचेतसि युधिष्ठिरे तं कृच्छ्रलब्धाद्राज्यसुखाद् भ्रंशयितुं क्षत्रियस्य स्वधर्मभूतेऽपि रणेऽश्रद्धामभिव्यङ्क्तुं च समागतेन चार्वाकेण शिखासूत्रादिषु अलौकिकसाधनेषु सर्वथा विश्वासविरहिणाऽपि त्रिदण्डसंन्यास एवान्वकारि न त्वेकदण्डसंन्यासस्तत्र तदानीन्तनानां बहुमानविरहात् । प्रत्युत कर्मवैमुख्येन मौण्ड्यस्य सतां विद्वेष्यत्वाच्च, तथा हि ।

महाभारते शान्तिपर्वणि राजधर्मानुशासने ।

> राजानं ब्राह्मणच्छद्मा चार्वाको राक्षसोऽब्रवीत् ।
> तत्र दुर्योधनसखा भिक्षुरूपेण संवृतः ॥
> साक्षः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः ।
> वृतः सर्वैस्तथा विप्रैराशीर्वादं विवक्षुभिः ॥ इति,

स्पष्टमिदमेतेन यत्तत्तच्छिखित्वत्रिदण्डित्वाद्यनुकरणं तेषांतेषां स्वात्मगूहनाय बहुमानलाभाय च, ब्राह्मणानां त्रिदण्डसंन्यासस्यैव युगान्तरे शिष्टैः पुरस्कृतत्वान्मोक्षमुख्योपायभावेनाभ्यर्हितत्वेन ताद्धर्म्यस्यैवानुकरणीयत्वाच्च, युधिष्ठिरधनञ्जययोस्तु क्षत्रिययोः सर्वथा

स्वजात्याभिजात्यादिकं निजुन्हूषमाणयोरक्षत्रियेण ब्राह्मणेनैव धार्यस्य त्रिदण्डसंन्यासस्य ग्रहणं परमसमञ्जसमितरथा क्षत्रियत्वादिपरिचयक्रमेण कदाचित्पाण्डवत्वतत्तद्व्यक्तित्वादिप्रकारकज्ञानस्यापि सम्भवत्सामग्रीकत्वेन कार्यविपत्तिरेवापद्येत । भगवतः श्रीकृष्णस्य लीलामानवस्य ज्येष्ठतयाऽपेक्षणीयेन श्रीबलरामेण स्वस्वसुः सुभद्रायाः सुयोधनाय दातुमभिप्रेततया संन्यासस्य कथमप्यैदम्पर्यज्ञाने कार्यविपत्तेः स्ववधृतत्वात् । एकदण्डधारणादिलक्षणसंन्यासस्य च क्षत्रियेषु सम्भावितत्वाद् बहुमानानास्पदत्वाच्च ।

एकं दण्डं समाश्रित्य जीवन्ति बहवो नराः ।
नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते ॥

इति स्मार्तप्रसिद्धैकदण्डसमाश्रयणे चिरं क्षत्रियोचितकर्मणां त्यागस्य वास्तवसर्वाश्रमविरुद्धस्य निरन्तरनिरयनिदानस्यापत्तिप्रसङ्गाच्चाननुष्ठानं धनञ्जयादेः । किंच मौण्ड्यैकदण्डलक्षणसंन्यासस्य क्षत्रियेषु सम्भवान्नैकदण्डधारणं तथा गुप्तयेऽर्जुनस्य यथा त्रिदण्डसंन्यासस्तस्य परमोत्तमाधिकारिकत्वेन रजःप्रकृतिकक्षत्रियादेरनधिकारादित्यसकृदबूबुधाम । किंच विधिविहितानां कर्मणां त्यागो न कदाचिदपि कस्यापि भुञ्जानस्य शयानस्येष्टद्विष्टसाधनताज्ञानवत ईषदपि शरीरप्रत्ययवतो विहित इति तस्यान्ध*बधिरातुराचिकित्स्यरोगार्त्तेष्वेव न्याय्यत्वेन देवकन्याकमनीयातिक्रान्तकायस्य महाबाहोर्भ्रूप्रान्तविश्रान्तविशालारविन्दनेत्रस्य वज्रसंहननदेहस्य राजकुमारस्य स्वात्मानं सर्वथा अपजुन्हूषमाणस्यापि धनञ्जयस्यातिक्रान्तं

* यथोक्तं महाभारते ।

उत्पन्ने सङ्कटे घोरे चौरव्याघ्रादिसङ्कटे ।
भयभीतस्य संन्यासमङ्गिरा मुनिरब्रवीत् ॥ इति,

वपुर्न निह्नोतुं शक्यमिति तेनानधिकारिणैकदण्डलक्षणसंन्यासोऽवलम्बितो दुष्प्रत्ययायैवोपकल्पितः स्याद् धर्ममर्माभिज्ञस्य द्वारकाजनिस्य, न हि तदानीन्तना द्वारकावासिन इदानीन्तनपृथग्जना इव उचिताचारानभिज्ञाः सुवञ्चनाः । इदानीन्तना द्वारकावासिनः कदाचित्कस्मिँश्चिद् धूर्तेऽपि शास्त्रविधुराचारेऽतिकपटकौशलकौडिकया सुप्रत्ययमादध्युरनध्ययनाच्छास्त्राणामसंसर्गाच्च धीमतामिति सम्भाव्येतापि, न त्वेवमीषदपि तदानीन्तनेष्विति धनञ्जयस्य त्रिदण्डधारणलक्षणाचारस्तदानीन्तनचर्याविद्यवृद्धानां परमहंसमहात्मनां भागवतानां सर्वथा सर्वस्य द्वारकावासिनो जनजातस्य विश्वासभाजनत्वेन तेषामनुचिकीर्षयैव न तु गृहस्थैः स्वनुकरणस्य कुटीचकाचारस्यानुचिकीर्षया, न हि कुटीचकादेराचारो गृहस्थसविधवृत्तिर्यज्ञोपवीतादिलक्षण इति पार्थस्य त्रिदण्डग्रहणं, कुटीचकस्यैकयज्ञोपवीतत्वेन गृहस्थस्य चोपवीतद्वयवत्त्वेन एकोपवीतत्यागमात्रेण पार्थस्य प्रत्यवायसंस्पर्शात् । न ह्येको द्वौ द्वौ वा एक इत्यणुरपि विशेषोऽध्यवसायकर इति न्यायानुकूल्यसम्भावनाऽपि परपक्षे, तस्माद् वृथैव धनञ्जयादेस्त्रिदण्डलक्षणसंन्यासस्य स्वपक्षे मिथ्या षण्ढ*कन्यायेन आनुकूल्याभिधानम् । एवं च त्रिदण्डिचार्वाकन्यायेनैव जनानां सार्वजनीनबहुमानभाजनत्वपरमविश्वासभूमित्वात्मसंमुखीनवृत्तिमत्त्वादिलक्षणत्रिदण्डसहचरितताद्धर्म्यानुचिकीर्षयैव धनञ्जय–दशाननादेस्त्रिदण्डधारणानुकार इति परीक्षन्तां विचक्षणाः परिमलोक्तीर्मालिन्यनिबन्धनाः परिविहस्येति किमत्राल्पे विषये बहुनेति विरमामः ॥

* परस्परं भगिन्योः सत्योर्वोढारौ भवतः पुरुषौ परस्परं षण्ढकौ, ततश्चैकेनातिदरिद्रेण कश्चन धनिकस्त्वद्गृहे चूर्णीकरणसाधनचक्रिका यत्पर्वतपाषाणनिर्मिता मद्गृहे गृहिणी तत्पर्वतासन्नग्रामसम्भवेत्यावां षण्ढकाविति विरचय्य चातुरीं मिथ्यासंग्रन्थयोजनप्रयत्नोद्योगः कृतः केनचित्तत्तुल्यमित्यर्थः ।

परिमलमतोन्मूलनम्

यदपि पुनः परिमलमतयोऽप्ययदीक्षिताः । ननु जाबालोपनिषदि परमहंसा नाम संवर्तारुणिश्वेतकेतुदुर्वासऋभुनिदाघजडभरत–दत्तात्रेयरैवतकप्रभृतयः । इति दुर्वाससः परमहंसेषु परिगणनं कृतं तस्य च हंसडिम्भकोपाख्याने ताभ्यां छिन्नाः शिक्यादयो वर्णिताः । अतः शिक्यतत्सहचरितत्रिदण्डपवित्रादिकं परमहंसस्याप्यस्तीत्यत्रसीयते इत्याशङ्क्याह । पराक्रान्तं चेति । इत्यवतार्य, अयमाशयः तस्मिन्नुपाख्याने हंसाः परमहंसाश्चेति दुर्वाससमनुवर्तमाना हंसादयोऽपि यतयो वर्णितास्तदीयशिक्यादिविषयं भविष्यति शिक्यच्छेदादिवचनम् । किं च श्वेतकेतुप्रभृतयोऽपि जाबालोपनिषदि परमहंसेषु परिगणिताः, न च तेषामाश्रमेण पारमहंस्यमस्ति ब्रह्मचर्यादिश्रवणात् । अतस्तत्त्वसाक्षात्कारवत्त्वेन वृत्त्या पारमहंस्यमुपपादनीयम्, एवमेव दुर्वाससोऽपि भविष्यति । अत एव तस्य तत्रतत्र राजगृहादिषु चिरनिवासोऽपि पुराणेषु प्रतिपाद्यते इत्यादिपरिहार उन्नेयः । इति कपोलकल्पनया कल्पतरुं परिरक्षुः । तदेतदहमहमिकानिबन्धनं निर्विषस्यापि सर्पस्य फटाटोपो भयङ्कर इति न्यायेन अद्वैधानशिष्येष्वारभटीप्रपञ्चनमल्पज्ञानां वञ्चनमात्रमाहोपुरुषिकाप्रयुक्तं हंसडिम्भकोपाख्यानग्रन्थस्याक्षरतोऽर्थतश्चाज्ञानकृतं च तद्यथा महाभारते खिलेषु हरिवंशे सप्ताधिकशततमाध्याये जनार्दनो विप्रकुमारको हंसडिम्भकौ च भ्रातरौ क्षत्रियकुमारकौ एते त्रयोऽपि परस्परं स्नेहपात्रतामुपयाता आसन्न भिन्नशरीराः सहचराः कदाचित्तु ते त्रयोऽपि प्रयोजनवशेन पुष्करस्योत्तरतीरस्थितं परमहंसं महामुनिं दुर्वाससमुपसेदिवांसः स च महामुनिरासीच्छिष्यैः परिवृतः । यथोक्तम् ।

तर्कनिश्चिततत्त्वार्था ज्ञाननिर्मलचेतसः ।
हंसाः परमहंसाश्च शिष्या दुर्वाससः प्रभो ॥

गत्वा तत्र महात्मानौ तौ दृष्ट्वा तूर्द्ध्वरेतसम् ।
दुर्वाससं महाबुद्धिं विचिन्वानं परं पदम् ॥
क्रुद्धो यदि स दुर्वासा दग्धुं लोकानिमान् क्षमः ।
देवा अपि च यं द्रष्टुं क्रुद्धं वै न क्षमाः सदा ॥
रोषमूर्तिः सदा यस्तु रुद्रात्मा विश्वरूपधृक् ।
रक्तकौपीनवसनो हंसः परम एव च ॥ इति,

अत्र शिष्याणां हंसपरमहंसत्वाख्यानात्स्पष्टं दुर्वाससः परमहंसत्वं, न हि ब्रह्मचारिगृहस्थादेः परमहंसाः शिष्या इति शास्त्रतो लोकतो वा युज्यते । अत एव त्विह रक्तकौपीनधारित्वेन आश्रमतः पारमहंस्यमाविष्कर्तुं रक्तकौपीनवसनो हंसः परम एव चेति स्पष्टमगौणमर्थत आश्रमिकं पारमहंस्यं दुर्वाससं उच्यते, तदनन्तरं बलदृप्तयोर्हंसडिम्भकयोः परमहंसे दुर्वाससि चक्षुःपथमुपयाते तादृशी दुर्मतिः समुत्पन्ना यतौ चतुर्थमाश्रममेव समूलमुन्मूलयितुकामौ आश्रममेव भृशं निनिन्दतुः । उपसेदिवांसौ च तौ दुरात्मानौ ऊचतुः ।

ज्ञानलेशाद् विहीनात्मन्! किं ते व्यवसितं द्विज!
कश्चायमाश्रमो विप्र! भवता यः समाश्रितः ॥
गृहमेधं परित्यज्य किं त्वया साधितं पदम् ।
दम्भ एव भवान् व्यक्तं शङ्के नास्त्यत्र कारणम् ॥
लोकाँश्चेमान् सदा मूढ! नाशयिष्यसि निर्वृतः ।
एतान् सर्वान् विनेतासि नरके पातयिष्यसि ॥

इत्याद्याकुलदुरुक्तिसंमिश्रं बाधमानार्थवाक्यकलापं, ततश्च तयोर्नैसर्गिकशुभाकाङ्क्षी जनार्दनो हंसडिम्भकौ मा मैवं ब्रवाथामित्याह ।

उवाच च यतिं दृष्ट्वा प्रणम्यासौ सुनीतवत् ।
मा ब्रूतामीदृशं वाक्यं राजानौ मन्दतेजसौ ॥ इति,

अत्रापि च यतिमित्युक्त्या स्पष्टं चतुर्थाश्रमित्वं दुर्वाससः । पुनरपि च जनार्दनः ।

एते हि यतयः शुद्धा ज्ञानदीपितचेतसः ।
ज्ञानाग्निदग्धकर्माणः प्राणान् प्राणेषु जुह्वति ॥

इति स्पष्टं यतित्वमाचष्टे ।

तेषामग्र्यश्चतुर्थोऽयमाश्रमो भिक्षुकः स्मृतः ।
आस्ते तस्मिन् महाबुद्धिः स हि पुण्यतरः स्मृतः ॥

इति च भगवन्तं दुर्वाससमेवोद्दिश्य, ततश्च जनार्दनेनोपशमितोऽपि रुद्रांशसम्भवो दुर्वासाश्चुक्रोध ताभ्यामुवाच च ।

इतोगच्छत राजानौ किं विलम्बत मा चिरम् ।
न वां वचनसम्भूतं रोषं धारयितुं क्षमे ॥ इति,

हंसडिम्भकौ तु कुपिताद्दुर्वाससो न बिभ्यतुर्नापि निर्जग्मतुः स्थानात्तदा कोपाकुलमानसो मुनिरेवोत्थातुमुपचक्रमे तदपि च तौ न विषेहाते किन्तूद्युयुजाते संन्यासचिह्नादाहत्यैव प्रच्यावयितुं भगवन्तं दुर्वाससम् । यथाऽऽह ।

तत उत्थाय धर्मात्मा गन्तुमैच्छ*द्यतीश्वरः ।
ततो निषेद्धुं हंसस्तं यतते स्म यतीश्वरम् ॥
तस्य बाहुं समादाय हंसो नृपवरोत्तमः ।
कौपीनं चिच्छिदे क्रूरः कृतान्त इव सत्तम ! ॥

अत्रापि यतीश्वर इति, यतीश्वरमिति च स्पष्टयति पारमहंस्यम् । ततश्च परमहंसगुरोर्दुर्वाससः क्षत्रियहस्तेन तां तादृशीं

* कौपीनकर्त्तनेन संन्यासधर्मादपाक्रष्टुमिति भारतभावदीपिका ।

दुर्गतिमवेत्य हंसानां परमहंसानां च सा सर्वाऽपि संहतिर्दिशोविदिशश्च पलायाञ्चक्रे । अन्यथा गुरोरिव सर्वस्यापि संन्यासिनः परमहंसादेर्हस्तं धृत्वा कौपीनशिक्यपूजापात्रविदण्डादेश्छेदे संन्यासस्य दुर्गतिरेवापद्येत । जपोपवाससमुन्यन्नाशनभूमिशयनविषयानिषेवणादिना तनूकृतदेहाः सत्त्वप्रकृतयो भिक्षुका हि खड्गकूर्माद्यामिषाशनपरिपुष्टदेहान् मृगयाव्यसनलघूकृतसर्वाङ्गान् सततशरासनव्यसनविहितकरकौशलान् राजकुमारकान् राजसप्रकृतीन् कथमतीत्य वर्त्तेरन्निति युक्तमेवापदि पलायनम् । तदेतदुक्तम् ।

यतयोऽन्ये पलायन्ति दिशो दश विचेतसः । इति,

दुर्वासास्तु शापेन सर्वानमूँल्लोकान् दग्धुं क्षमोऽपि तस्मिन्नवसरे न शशाप यतस्तौ परेण हन्तव्यौ अत एवेहोक्तम् ।

दुर्वासाः सत्यधर्मस्तु हन्तुमीशोऽपि तं ततः ।
मन्दंमन्दमुवाचेदं हंसं डिम्भकमेव च ॥
शापेनाहं समर्थोऽपि हन्तुं राजकुलाधमौ ! ।
तथाऽपि न करोम्यन्तं यतयो ह्यत्र ते* वयम् ॥
यो हि देवो जगन्नाथः केशवो यादवेश्वरः ।
शङ्खचक्रगदापाणिर्गर्वं वां व्यपनेष्यति ॥ इति,

एतेन स्पष्टमिदं सिध्यति यद् दुर्वाससि हंसेन बाहौ बलाद् गृहीते डिम्भकोऽपि नान्यान् यतीनन्वधावत् किन्तु हंससाहाय्यमेवाकरोत् । अत एव स्पष्टमिहोच्यते हंसं डिम्भकं च मन्दंमन्दमुवाचेति । मन्दोक्त्या हंसडिम्भकयोः सांनिध्यं सिध्यति । तेन वक्ष्यमाणशिक्यहरणादिकमन्येषां हंसकुटीचकादीनामभिप्रेयते न तु दुर्वासस

* ते इति सर्वथा दूरे पलायितानां मुनीनां निर्देशः ।

इत्युत्प्रेक्षमाणाः सर्वथा प्रतारकाः शास्त्रमर्मार्थास्पृश इत्यवधेयं, यतो दुर्वाससि वाहौ गृहीते एवान्ये यतयो दिशो विदिशश्चान्वधावन् डिम्भकोऽपि चानन्यव्यापारो हंसस्यैव साहाय्यमनुतष्ठौ, दुर्वासाश्च तयोरनन्यसंमुखीनतामवलोक्य समुत्पन्नात्याश्चर्यो मन्दंमन्दमुवाचेति कालबिलम्बे जाते न तावन्येषु यतिषु हंसेषु परमहंसेषु वा भयाद् द्रवमाणेषु किमपि विप्रकृतमाचेरतुरित्यपामरेण वक्तुं पार्यते । किंच दुर्वाससो हंसडिम्भकमिषेण ब्राह्मणकुमारकेणापि संवादो जातः, जातश्च जनार्दनस्यापि ताभ्यां सह संवादः ।

एवं च महति कालबिलम्बे धर्मलोपभयाद् भीता यतयो मृगवेगमनुकुर्वाणा नैव ताभ्यां प्राप्ताः, येन तौ तदीयशिक्यादिकमच्छैत्तामिति कल्पयितुं शक्येत, एवं च सति ।

ततस्तौ हंसडिम्भकौ क्रुद्धौ कालेन चोदितौ ।
शिक्यं कमण्डलुं चैव द्विदलं दारुमेव च ॥
दण्डान् पात्रविशेषाँश्च छित्त्वा भित्त्वा च सर्वशः ।
तस्मिन् देशे महाराज! व्याधैर्मांसान्यदीदहन् ॥

इति दशा परमहंसस्य हंसपरमहंसगुरोश्च दुर्वासस एवाभूदिति विदुषां सुनिश्चितम् । शिक्यं कमण्डलुः इत्येते प्रसिद्धे, द्विदलदारुपदेन गोकर्णाकारं भोजनपात्रमुच्यते, दारुमिति पुंस्त्वमार्षम् । पात्रविशेषपदेन पूजापात्रादि, भारतभावदीपिकायामप्ययमेवार्थोऽभिहितः, तेषामर्घ्याचमनीयादिभेदेन बहुत्वाद्बहुवचनम् । दण्डानिति तु बहुवचनं वैणवचिदण्डाभिप्रायम् । अत एव द्वारकामध्यास्य भगवतः श्रीकृष्णस्य निकटे हंसडिम्भकापराधनिदर्शनावसरे शिक्यं च दारवं पात्रं द्विदलान् वेणुकान् वहूनिति स्वयमावेदयामास

वेणुबहुत्वं दुर्वासाः, वेणुकानित्यत्र क-प्रत्ययो ह्रस्वार्थः। ततश्च त्रिदण्डस्य छेदनेन एकैकस्य दण्डस्यानेकभावे जातेऽपि तेऽभूवन् प्रकृत्या त्रय इत्यावेदयितुं वेणुकान् बहूनित्युक्तमन्यथा वेणुकानित्युक्त्यैव बहुत्वे लब्धे बहूनिति वृथैव स्यात्। ततश्चैवं महामुनिर्दुर्वासाः स्वस्य त्रिदण्डधारित्वेन मुख्यं यतित्वमबूबुधदिति हंसडिम्भकापराधगौरवमपि भवति भगवते निवेदितम्। इदं च त्रिदण्डशिक्यद्विदलकर्पटपूजापात्रकमण्डल्वादिसर्वं दुर्वाससः एव विवक्षितं नान्येषां तदनुयायिनामच।

छिन्नं ताभ्यां समादाय शिक्यं दारुमयं तथा।
द्विदलं कर्पटं चैव कौपीनमथ वल्कलम्॥
कमण्डलुं तथा राजन्नर्द्धप्रोतकपालकम्।
एतानन्यान् समादाय द्रष्टुं केशवमाययुः॥

इत्यस्मिन्नेव प्रकरणे दशाधिकशततमाध्यायेऽभिधाय एकादशाधिकशततमाध्याये।

वृष्णिपः पुण्डरीकाक्षः सात्यकिर्बलभद्रकः।
बसुदेवस्तथाऽक्रूर उग्रसेनस्तथा नृप!
अन्ये च यादवाः सर्वे संभ्रमं प्रतिपेदिरे।
इदं किमिदमित्येवं व्याशङ्कमनसो ऽभवन्॥
पृष्ठतोऽप्यनुगच्छन्ति दिधक्षन्तं जगत्त्रयम्।
अर्द्धकौपीनवसनं स्मरन्तं कमपि द्विजम्॥
अन्तस्तापसमायुक्तं छिन्नदण्डधरं यतिम्।
अन्तर्ज्वलन्तं रोषेण हंसासादितकल्मषम्॥
नेत्रोत्थितमहावह्निं प्रेक्षन्तं यादवेश्वरम्।
दुर्वाससं ते ददृशुर्भीता यादवसत्तमाः॥

इत्यभिधानमेव प्रमाणम् । अत्र ह्यद्रुकौपीनवसनत्वोक्तिर्हंसकृतदुर्वाससः कौपीनकर्तनाभिप्राया, छिन्नदण्डधरत्वोक्तिरपि हंसकृतत्रिदण्डभेदनाभिप्राया । न च दुर्वाससाऽभ्यर्थिता यतयस्ताभ्यां छिन्नानि शिक्यदारुमयद्विदलकर्पटकौपीनकमण्डल्वादिकान्यादाय द्वारकां केशवदर्शनार्थं केशवाय तयोर्दुश्चरितमावेदयितुं च निर्जग्मुरिति हरिवंशे दशाधिकशततमेऽध्यायेऽभिहितत्वेन शिक्यादिषु परेषां यतीनां संबन्धसिद्ध्या न तेषु दौर्वाससत्वसिद्धिरिति सर्वं सिकताकूपविशरणायितप्रायम् । यथोक्तं तत्र दुर्वाससा यतीन् प्रति ।

> इदमद्य त्रमं विप्रा ! यानमद्य विधीयताम् ।
> साहसं यत्कृतं ताभ्यां पात्रभेदादिसत्तमाः ! ॥
> एतत्सर्वमशेषेण दर्शयाम जनार्दनम् ।
> तथेति ते प्रतिज्ञाय यतयो ज्ञानचक्षुषः ॥
> छिन्नं ताभ्यां समादाय द्रष्टुं केशवमाययुः । इति,

अत्र तथेति प्रतिज्ञाय यतयो हंसादिना छिन्नं सामग्रीजातमादाय केशवं द्रष्टुमाययुरिति दर्शनादानागमनक्रियाणामेककर्तृकत्वभानेन शिक्यादिषु यतीनां संबन्धसिद्ध्या अकिंचिदेतदिति वाच्यम् । प्रकरणानुग्रहेण स्पष्टं शिक्यादिषु दौर्वाससत्वसिद्ध्या छेदनानन्तरं छिन्नं शिक्यादिकं धर्मकार्यानुपयुक्तं केवलं भारायमाणमिति मार्गे शिष्येष्वन्ययतिषु कुलपतिना दुर्वाससा समर्पितमित्येतावतैव केशवदर्शनशिक्याद्यादानद्वारकाऽऽगमनक्रियाणामेककर्तृकत्वोपपत्तौ शिक्यादिष्वन्यसंबन्धासिद्ध्या दौर्वाससत्वसिद्धेरवर्जनीयत्वात् । युक्तं चैतत् महान्तो हि शिष्येष्वनुग्रहबुद्ध्या सर्वदा यत्यादिना धारयितुमनावश्यकं शिक्यपूजापात्रादिकं शिष्येभ्योऽर्पयन्तीत्युभयलोकसा-

सिक्कं, सर्वदा धार्यं कौपीनत्रिदण्डकमण्डल्वादिकं तु स्वयमेव संकटेष्वपि बिभ्रति । अयमिह वर्तुलार्थः, पञ्चसहस्राणि स्वानुगतयतीनादायावस्थिते दुर्वाससि कालचोदितौ हंसडिम्भकौ तत्रागत्य विलक्षणवेषरूपादिशालिनां दुर्वाससोऽवेत्य तादृशाचारे वैदिकाचारविरोधमुद्भावयन्तौ तपस्विनं भृशमदूदुषतां, तच्चावधार्य धैर्यं विधार्य तूष्णीमवस्थितस्ततो निर्गन्तुकामौ बाहूपरुद्धौ मुनिश्छिन्नकौपीनतां नीतौ भर्त्सितवांस्तौ भ्रातरौ तदा तौ तस्मै चुक्रुधतुरथ प्रववृताते तस्यैव त्रिदण्डशिक्यादिभेदने । यथोक्तमिह ।

ततस्तौ हंसडिम्भकौ क्रुद्धौ कालेन चोदितौ ।
शिक्यं कमण्डलुं चैव द्विदलं दारुमेव च ॥
दण्डान् पात्रविशेषांश्च छित्त्वा भित्त्वा च सर्वशः । इति ।

एवं चेह नान्येषां शिक्यादिचोटनानुप्रवेशसम्भवोऽपि पलायितानां यतीनां, तस्मादिह दण्डानिति बहुवचनमन्येषां यतीनां दण्डाभिप्रायकमित्यपि दुर्भणम् । अत एव द्वारकायां यादवाः ।

अर्द्धकौपीनवसनं स्मरन्तं कमपि द्विजम् ।
अन्तस्तापसमायुक्तं छिन्नदण्डधरं यतिम् ॥

अद्राक्षुरित्युक्तं, न हि तत्र बहवश्छिन्नदण्डधरा ददृशिरे यतयो द्वारकायाम् । पूर्वसंजातां दुर्दशां स्मरन्तमत एवान्तस्तापसमायुक्तम् इत्युक्तम् । अन्ये तु दुर्वाससोऽनुगा यतयो नाभूवन्नेतादृशास्तेषां शिक्यकमण्डल्वादेस्त्रिदण्डादेर्वाऽभ्रंशादत एव द्वारकानुप्रवेशसमयेऽभूवँस्ते सुमनसो यथोक्तमिह प्रकरणे ।

यतयो दीर्घतपसः पुरस्कृत्य तपोधनम् ।
दुर्वाससं सुमनसो ददृशुर्यादवेश्वरम् ॥ इति,

अत एव तु श्रीकृष्णाभ्यर्थनया आसनेष्वासनसमयेऽपि दुर्वाससो दौर्मनस्यं परेषां च यतीनां सौमनस्यं श्रूयते यथोक्तमिह ।

ततः किंचिद्दिवासीन आसने यतिविग्रहः ।
आसने संस्थिते तस्मिन् यतयो वीतमत्सराः ॥
आसनानि यथायोगं भेजिरे निर्वृताः किल । इति,

अत्र यतिविग्रह इत्यनेन व्रतोपवासशीर्णशरीरत्वेन शरीरेणैव यतिरिति विज्ञातुं शक्यो न तु चिह्नैस्तेषामशेषेण प्रभ्रष्टत्वादिति तात्पर्यम् । अन्ये यतयस्तु न तथा भूताः किंतु निर्वृताः सुस्थचित्ताः स्वासनानि यथायोगं भेजिरे प्रतिपेदिरे इति स्फुटमुपपादिते दौर्मनस्यसौम*नस्ये दुर्वासस एव चिदण्डशिक्यादिभङ्गं साधयत इति कृतमिह स्वतःप्रकरणस्वरससिद्धेऽर्थे सूपपादनकौशलकौतुकेन ।

प्रकृतमनुसरामः छिन्नदण्डधरं यतिम् । अत्रत्यदण्डपदं चिदण्डपरमत्र तु दशाधिकशततमाध्याये पठितम् ।

ततस्तौ हंसडिम्भकौ क्रुद्धौ कालेन चोदितौ ।
शिक्यं कमण्डलुं चैव द्विदलं दारुमेव च ॥
दण्डान् पात्रविशेषांश्च छित्त्वा भित्त्वा च सर्वशः । इति,

दण्डानिति बहुवचनमेव प्रमाणम् । दुर्वाससा द्वारकायां श्रीकृष्णसंदर्शनसमये स्वयमभिहितं वेणुकान् बहूनिति च । पूर्वमेव समगंसिषि, एवं च सप्ताधिकशततमाध्याये इहैव हरिवंशग्रन्थे रक्तकौपीनवसनो हंसः परम एव चेति वचनेन जाबालोपनिषदि जड भरतनिदाघरैवतकादिपरमहंसपङ्क्तौ दुर्वाससः सह पाठाच्च मुख्यपारमहंस्यसिद्धौ श्वेतकेत्वादिदृष्टान्तेन दुर्वाससो गौणपारमहंस्योपपादन-

* दुर्वाससो दौर्मनस्यमन्येषां च सौमनस्यमित्यर्थः ।

मप्यत्यन्तानभिज्ञतानिबन्धनमज्ञजन वञ्चनमात्रं कल्पतरु—परिमलादिकृताम् । यदपि श्वेतुकेतुदृष्टान्तेन दार्ष्टान्तिकार्थसमर्थनं तदपि खपुष्पसमर्थनेन वन्ध्यापुत्रललाममालालम्बनम् । न हि छान्दोग्यादौ श्वेतकेतुर्ब्रह्मचर्यमुवासेत्युक्तमित्येतावता क्रमेण गार्हस्थ्यवानप्रस्थ्ये नोपवस्तुं चक्रमे । नापि न संन्यास्यदिति प्राज्ञ उत्सहेतापि वक्तुम् । आश्रमाणां प्रातिलोम्यनिषेधेऽपि आनुलोम्यस्यानुमतत्वेन श्वेतकेतोः क्रमिकाणां ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाश्रमाणां सम्भवात् । एवं च छान्दोग्योदितब्रह्मचर्यस्येव जाबालोदितपारमहंस्यस्यापि मुख्यस्यैव सम्भवेन श्वेतकेतोर्गौणपारमहंस्याभिधानं श्रुतिसतीशरीरप्रपीडनकरं नृशंसैककृत्यमिति सुव्यक्तम् । न हि कृष्णा गौः पालनीयेति धूमलायामसिक्षेपः समुचितः । छान्दोग्यजाबालवाक्ययोः प्रामाण्याविशेषे छान्दोग्यानुरोधेन श्वेतकेतोर्ब्रह्मचर्यस्य सिद्धौ तदनन्तरं जाबालानुरोधेन पारमहंस्यस्यापि समावेष्टुमुचितत्वेन लक्षणाबीजानवतारे गौणपारमहंस्योपवर्णनमनवधाननिबन्धनमिति नाव्यक्तं विदुषाम् । एवं च श्वेतकेतुदृष्टान्तावष्टम्भेन दुर्वाससो गौणपारमहंस्याभिधानं जलस्य स्वाभाविकोष्णास्पर्शत्वेन करकाया उष्णस्पर्शसाधनायितमिति विरम्यते । दुर्वासःप्रभृतीनां राजगृहेषु चिरं निवासः पुराणेषु श्रूयते इति तस्याश्रमविरुद्धत्वेन दुर्वासःप्रभृतयो नाश्रमेण परमहंसाः किन्तु गुणत इत्यप्यभिधानं द्रविडपुङ्गवस्य हासायैव, प्रत्यग्दृष्टयो हि वृत्त्या परमहंसाः समलोष्टाश्मकाञ्चना उन्मत्तवदाचरन्तः कस्य हेतो राजगृहेषु निवसेयुर्न हीष्टद्विष्टविरहिणां तेषां किञ्चिदुपादित्सितं परिजिहीर्षितमिष्टमनिष्टं वा यत्ते निविवत्सेयुर्जनावासेषु अपहाय विविक्तान् नदीप्रस्रवणदेवखातगिरिगुहामहारण्यप्रदेशान् । प्रत्युत वृत्त्या अतथाभूता

लिङ्गिन एव प्रायो राजगृहाण्याहत्यावृणवन्तीति सर्वलोकप्रसिद्धम् । तस्माद् वृत्त्या पारमहंस्यं न राजगृहनिवासौपयिकं प्रत्युत तद्विरुद्धमिति अप्पय्यदीक्षितस्य साधुपाण्डित्यनिदर्शनम् । एवं चाधिकारिका दुर्वासःप्रभृतयो महर्षय इति तेषामधिकारसिद्धकार्यकरणे राजगृहनिवासो न प्रत्यवायाय नाप्याश्चर्याय प्रेक्षावताम् । यावदधिकारमवस्थितिराधिकारिकाणामित्युक्तन्यायेन आधिकारिकाणामधिकारनियकार्येषु इतरपुरुषापेक्षया वैलक्षण्यस्य सर्वसम्मतत्वात् । एवमेव तु बादरायणस्य दासीगर्भे विदुरोत्पादनं संगच्छते । एवं च पारमहंस्येऽपि स्वाश्रमविरुद्धानि राजगृहवासद्रौपदीमन्त्रदानादिकार्याणि दुर्वाससः सम्यगवकल्पन्ते । तदेवं सर्वोऽप्येष हंसडिम्भकोपाख्यानग्रन्थः परस्य सर्वथा विरुद्धोऽस्माकं तूक्तरीत्योपक्रमोपसंहाराभ्यासादिलक्षणतात्पर्यग्राहकयावल्लिङ्गोपेतस्त्रिदण्डशिक्यकमण्डलुकौपीनकन्थाभगवन्नारायणपूजापात्रादिस्वरूपायाः परमश्रद्धेयपरमहंसयत्यपेक्षितसर्वसामग्र्याः साधक इति कृतमिह स्वमुखेन निजविजयपटहकोलाहलाडम्बरप्रायेणानेन दैवहतेषु क्षते क्षारक्षोदक्षपणायितेन क्षणिकामोदहेतुना परपराजयपरेण । शास्त्रविचारकौतुकेन भगवद्दास्यसुखास्वादिनां नः ॥

इदमप्यत्र मीमांसामहे, परमहंसयत्यपेक्षितसर्वसम्भारवर्णने ब्रह्मसूत्रमुपेक्षितं हरिवंशाचार्य इति त्रिदण्डादिसिद्धावपि हरिवंशतः परमहंसस्योपवीतं सिध्यति न वेति । तत्र हरिवंशग्रन्थे उपवीतानुक्तिरेव दुर्वासस उपवीतसाधिकेति प्रमाणमर्मज्ञाः । तथा हि हंसडिम्भकौ कदाचिदपि चतुर्थाश्रमधर्मान् नाश्रौष्टां नाप्यद्राष्टां परमहंसानिति तेषां हंसपरमहंसयूथदर्शने गृहस्थावस्थपुरुषापेक्षयाऽतिवैलक्ष-

ण्यदर्शने दुरदृष्टवशाद्रागः समुत्पेदे, स च रागो गृहस्थविलक्षणचिह्नच्युत्यैव प्राप शान्तिमिति शिक्यत्रिदण्डादिकमेव अपदध्वंसाते, ब्रह्मसूत्रं तु दुर्वाससो रक्षायै समभवत्तस्य गृहस्थसाधारण्यात् । यद्यपि गृहस्थन्यासिनोः सूत्रेऽप्यस्ति संख्याकृतो विशेषस्तथाऽपि क्रोधाविष्टयोर्हंसडिम्भकयोर्नाभूत्स लक्ष्य इति ब्रह्मसूत्रं तौ नाभाङ्क्तामित्येव न किन्तु गृहस्थसाधारण्यज्ञानान्नास्प्राष्टाम् । तस्मादेवात्र प्रकरणे ब्रह्मसूत्रविषये हरिवंशाचार्य उदासाञ्चक्रे, अत एव श्रीमद्भागवते पुराणाचार्यः परमहंसानामुपवीतं निरूपयाञ्चक्रे इत्यन्यच्च निरूपितमस्माभिः । परंतु तस्मिन् दौर्वाससे न्यासियूथे सर्वे त्रिदण्डिनः सर्वे सशिखा ब्रह्मसूत्रवन्त इति न ज्ञायतां यथाऽधिकारमेकदण्डिनिःशिखनिःसूत्राणामपि तत्र सद्भावस्य तत्रत्याक्षरस्वरसेन लभ्यत्वान्न हि युगान्तरेऽपि सर्वो जनस्त्रिदण्डाधिकारीत्यवकल्पते सत्त्वरजस्तमःप्रकृतिकत्वेन सर्वदैव विश्वस्य वैश्वरूप्यात् । अत एव त्विह दशाधिकशततमाध्याये ।

अहोरात्रेण ते सर्वे द्वारकां कृष्णपालिताम् ।
ययुर्दान्ता महात्मानोऽलोमशाः केशवर्जिताः ॥

इति सशिखसर्वकेशधारिणस्त्रिदण्डिनो महात्मान एकदण्डिनश्च निष्केशा इति स्पष्टं, ततश्च त्रिदण्डैकदण्डयोरस्मदुक्तव्यवस्थैव सिध्यतीति निभृतमीक्ष्यतां प्रमाणपरतन्त्रैः ॥

यत्तु मदनपारिजाते चतुर्थाश्रमाधिकारमुद्दिश्य तत्र छन्दोगसूत्रकारः त्रयाणामधिकृतिः ।

ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ।

धर्मविवृतावपि ।

ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्वनं कृती ।
संन्यसेद्वासनाशान्तः सर्वभूतदयापरः ॥

इति त्रैवर्णिकस्याधिकारमेतानि वाक्यानि विदधति । अतस्त्रैवर्णिकानामपि तुर्याश्रमेऽस्त्येवाधिकारः । या तु जाबालश्रुतिः । ब्राह्मणाः प्रव्रजन्तीति तस्येयं गतिः ब्राह्मणशब्दः प्रदर्श*नार्थः । अतः क्षत्रियवैश्यावप्युपलक्षयति तेन न विरोध इति । अथ ब्रह्म वेदस्तन्निष्ठस्तदधीतवान् ब्राह्मण इति व्युत्पत्त्या ब्राह्मणशब्दो वर्णत्रयपरः । एतेन ।

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ।

इत्यादिमन्वादिवचनान्यपि व्याख्यातानि ।

यच्च दत्तात्रेयवचनम् ।

मुखजानामयं धर्म्मो यद्विष्णोर्लिङ्गधारणम् ।

बाहुजातोरुजातानामयं धर्म्मो न विद्यते ॥ इति,

तथा—

गतिस्तुर्य्याश्रमे नास्ति बाहुजोरुजयोः क्वचित् ।

तुर्य्याश्रमे गतिः प्रोक्ता मुखजानां स्वयम्भुवा ॥ इति,

एतच्च वचनद्वयं वस्तुतो न विरुध्यते । मुखजाः ब्राह्मणाः । बाहुजाः क्षत्रियाः । ऊरुजाः वैश्याः एतेषामयं धर्म्मो लिङ्गधारणात्मको न विद्यते । लिङ्गं लक्षणं चिह्नं त्रिदण्डैकदण्डरूपम् ।

तथा च दक्षः ।

मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते ।

गृहस्थोयष्टिवेदाद्यैर्नखरोमैर्वनाश्रितः ॥

त्रिदण्डेन यतिश्चैव लक्षणानि पृथक्पृथक् ॥ इति,

---

* ब्राह्मणबोधनार्थो नेतरनिषेधार्थस्तेन वचनान्तरानुग्रहमहिम्ना क्षत्रियवैश्यावप्युपगृहीतोभवतइति भावः ।

चिदण्डग्रहणमेकदण्डस्यापि प्रदर्शनार्थम् एवंविधं क्षत्रियवैश्ययोर्नेति दण्डधारणनिषेध एव नाश्रमनिषेधः । तथा च गतिस्तुर्य्याश्रमे नास्तीत्यस्याप्ययमर्थः । गतिर्ज्ञानम् सर्वे गत्यर्था ज्ञानार्था इति स्मरणात्, ज्ञानं च ज्ञापकनिष्पाद्यमत एव ज्ञापककार्य्यं तत्, तेन ज्ञापकरूपेण कार्य्येण कारणं लक्ष्यते, तथा चैतदुक्तं भवति क्षत्रियवैश्ययोर्ज्ञापकं दण्डधारणं नास्तीति लिङ्गनिषेध एव न त्वाश्रमनिषेध इति दण्डधारणं बहिरङ्गविषयं विराग एव मुख्यः विरागाभावे अधिकाराभावात्, यच्च धर्म्मविवृतावेष वचनान्तरम् ।

संन्यसेद्ब्राह्मणः सम्यग् वानप्रस्थो भवेन्नृपः ।
वानप्रस्थो भवेद्वैश्य एवं वर्णक्रमः स्मृतः ॥ इति,

अत्रापि ब्राह्मणः सम्यक् न्यसेदिति सम्यक्शब्दोपादानात् ब्राह्मणस्य बहिरङ्गभूतदण्डधारणोपेत एव संन्यासो न तु तद्रहित इति गम्यते । तथा च क्षत्रियवैश्ययोस्तद्रहित आश्रमोभवतीत्यर्थादुक्तम्भवति अन्यथा छन्दोगसूत्रकारादिवचनविरोधापत्तेः । अयं च तात्पर्य्यार्थः । अबाधेनोपपत्तौ बाधो न न्याय्य इति न्यायेन श्रुतिस्मृतिवाक्यविरोधपरिहाराय विधिवाक्यानामाश्रमस्वरूपविधौ तात्पर्य्यम् । निषेधवाक्यानान्तु दण्डग्रहणमात्रनिषेधे तात्पर्य्यं, तस्मात् क्षत्रियवैश्ययोर्दण्डग्रहणमात्रनिषेधो न त्वाश्रमनिषेध इति एवं प्राप्तेऽभिधीयते ।

श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी । इति,

अतः श्रुत्यनुसारेण व्यवस्थाऽत्र विधीयते, ब्राह्मणाः प्रव्रजन्तीति श्रूयते अत्र ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिर्वाच्योऽर्थः । ब्राह्मणोद्देशेन च प्रव्रज्या अभिधीयते उद्देश्यविशेषणमेव विवक्षितं

हविरुभयत्रवदुद्देश्यमविवक्षितम् । तस्मादिह ब्राह्मणोद्देशेन संन्यासविधानादुद्देश्यस्य ब्राह्मणत्वस्येह विवक्षितत्वात्तस्यैव प्रव्रज्याधिकारो नान्यस्य, ननु यदि भवेद् ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिर्वाच्यार्थः तर्हि तस्योद्देश्यत्वेन विवक्षितत्वात् क्षत्रियवैश्ययोः प्रव्रज्यायां मा भूदधिकारः । न च तथा ब्राह्मणत्वं जातिरर्थः अपि तु ब्रह्मवेदस्तन्निष्ठास्तदध्ययनवन्तो ब्राह्मणा इति वेदाध्ययनवत्त्वमेकोऽनुगतोधर्मः । स च ब्राह्मणशब्दस्यार्थः । तथा च वेदाध्ययनवत्त्वरूपेणैकेनोपाधिना ब्राह्मणक्षत्रियवैश्यास्त्रयोऽपि क्रोडीभूता भवेयुः । एवं च ब्राह्मणोद्देशेन प्रव्रज्याविधानात् त्रयाणामपि वर्णानां तत्राऽधिकारोऽस्त्विति चेन्नैवम् । यथा क्षत्रियशब्दस्य क्षत्रियत्वमर्थः । वैश्यशब्दस्य वैश्यत्वं गोशब्दस्य च गोत्वमर्थः तथा ब्राह्मणशब्दस्यापि ब्राह्मणत्वमेवार्थ इति शेषे जैमिनिबादरायणादिभिरङ्गीकृतं तद् व्याहन्येत, तथोक्तव्याघातभयात् ब्राह्मणशब्दस्य-ब्राह्मणत्वं वेदाध्ययनवत्त्वं वोभयमिति वाच्यत्वेन परिकल्प्येत । तदन्याय्या चानेकार्थता इति तान्त्रिकैरनेकार्थत्वमेकशब्दस्य निषिद्धं तेन न्यायेन सह विरोधः प्रसज्यते । अथैवं ब्रूषे अन्याय्यं चानेकार्थत्वमिति न्याये जाग्रत्यपि गवादिशब्दानां यथाऽनेकार्थत्वमेवं ब्राह्मणशब्दस्यापि अनेकार्थत्वमस्त्विति न चैतदुचितमगतिका हीयं गतिर्यदनेकशक्तिपरिकल्पनयाऽनेकार्थत्वस्वीकरणं शब्दार्थज्ञाने हि वृद्धव्यवहारः प्रमाणम् । वृद्धाश्च गवादिशब्दानामनेकशक्तिकल्पनयाऽप्यनेकार्थत्वमङ्गीकुर्वते न ब्राह्मणशब्दस्य अत एवाभिधानकारैरपि गवादिशब्दा अनेकार्थवर्गे परिगणितास्तेषामपि व्यवहारः शब्दश्लेषादिष्वेव शास्त्रं निर्णीय, शास्त्रार्थपरिज्ञाने तु प्रसिद्धस्यैव ग्रहणं नेतरस्य इतरस्यापि ग्रहणे

गोपशुविधायकवाक्येऽपि सास्नाद्युपेतगोपिण्डव्यतिरिक्तस्यापि ग्रहणं स्यान्न च गृह्यते। तच्छास्त्रार्थनिर्णयेषु प्रसिद्धार्थस्यैव ग्रहणं युक्तम्। विपरीतार्थद्योतकवाक्यशेषाभावादतोऽनेकार्थशक्तिकल्पनादोषभयाद् ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिरेवार्थः। ननु च जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवाञ्जायते इत्यत्र ब्राह्मणशब्दो यथा वर्णत्रयपर एवमत्राप्यस्त्विति चेन्नैवम्, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्तथा हि ब्रह्मचर्य्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः इति वाक्यशेषे ब्रह्मचर्य्यादिभिर्ऋष्याद्यृणत्रयापाकरणप्रतीतेर्ब्रह्मचर्य्यादिषु च त्रैवर्णिकस्याधिकारात् फलचमसवन्मुख्यान्तरेण जायमानो वै ब्राह्मण इत्यत्रापि त्रैवर्णिकानुप्रवेशाद्युज्यते तत्र त्रैवर्णिकपरत्वम्। प्रकृते तु वाक्यशेषाद्यभावात्तत्रैवान्यो ब्राह्मणशब्देन प्रत्याख्यास्यते ततः पूर्वमेव लब्धार्थिकाया रूढेः प्राबल्यादनुपपत्त्यभावाच्च रूढ्या ब्राह्मणत्वमेव प्रत्याय्यते॥

अतश्च प्रथमप्रतीतब्राह्मणोद्देशेन प्रव्रज्याविधेश्चरितार्थत्वात् न चरमप्रतीतयौगिकार्थस्वीकरणमुचितं ततश्च औदुम्बरीं स्पृष्ट्वोद्गायेदिति श्रुत्या विरुद्धमौदुम्बरी सर्वा वेष्टयितव्येति स्मृतिवचनं यथा विरोधाधिकरणे अप्रमाणमित्युक्तम्। एवं ब्राह्मणाः प्रव्रजन्तीति जाबालश्रुतिविरुद्धं तत्र त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इत्यादिकं स्मार्तवचनजातमप्रमाणमेव स्मार्तवचननिचयस्य सर्वथा प्रामाण्यपरिजिहीर्षया श्रुत्यनुकूल एवार्थः परिकल्पनीयः, त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति छन्दोगसूत्रस्यायमर्थः त्रयाणां वर्णानां यथोचितं चत्वार आश्रमा इति, औचित्यं च श्रुतिविरोधाद् ब्राह्मणस्यैव तुर्य्याश्रमाधिकारविधौ नान्यथा।

वैराग्येकानां संन्यासो विद्यते नात्र संशयः ।
शिखायज्ञोपवीतानां त्यागपूर्वैकदण्डयुक् ॥ इति

ब्रह्माण्डपुराणवचनमपि छन्दोगसूत्रेण समानार्थम् । यच्च ब्रह्मवैवर्त्तवचनम् ।

वैराग्योत्पत्तिमानेव संन्यासे परियुज्यते ।
रागवान्न तु विप्रोऽपि वेदवेदाङ्गवित्तमः ॥ इति,

वेदवेदाङ्गवित्तमोऽपि विप्रो रागवांश्चेत्संन्यासे न परियुज्यत इत्यन्वयः, एवं च विप्रस्य विरक्तस्यैवाधिकारोऽभिहितो भवेन्न क्षत्रियादेः । यच्च स्मृत्यन्तरम् ।

ऋणत्रयमपाकृत्य निर्म्ममो निरहङ्कृतिः ।
ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद्गृहात् ॥

इत्यस्यायमभिप्रायः गृहात्प्रव्रजेत् वानप्रस्थाश्रमङ्गच्छेत् । प्रव्रज्या-शब्दो यद्यपि संन्यासे रूढस्तथापि श्रुतिविरोधपरिहारार्थमत्र तृतीयाश्रमपरः । अस्यापि वैराग्यहेतुकत्वात्, यद्वा ब्राह्मणः स्ववृत्तावजीवन् क्षत्रियवृत्तिमाश्रितः । तयाऽप्यजीवन् वैश्यवृत्तिं ततश्च तामापदं निस्तीर्य्यापि न वर्णान्तरवृत्तिं परित्यजति किन्तु तत्रैव वृत्ताववस्थितस्तदा तत्तत्क्षत्रियादिवृत्तिः क्षत्रिय इति वैश्य इति च व्यपदिश्यते शास्त्रानभ्यनुज्ञानकालेऽपि क्षत्रियादिवृत्तिनिरतत्वात् ततः सोऽपि प्रव्रजेद्गृहादिति प्रव्रज्याधिकारं दर्शयति ।

अत एव ।

ब्राह्मणः क्षत्रियो वा ऽथ वैश्यो वा प्रव्रजेद्गृहात् ।

इत्यथ-शब्द उपात्तः ब्राह्मण एव अनन्तरं क्षत्रवृत्त्याश्रयणात् क्षत्रियः, अथ वैश्य इत्यानन्तर्य्यप्रतिपादनादयमर्थो गम्यत इत्यर्थः । एतेन ।

ब्राह्मणः क्षत्रियोवैश्यस्ततो गच्छेद्वनकृती ।
संन्यसेद्वाश्रमाद्यन्तः, इत्येतदपि व्याख्यातम् ॥
एवञ्च मनुदत्तात्रेयादिवचनान्यप्यानुकूल्यं नेयानि ।
यश्च जडभरतम्प्रत्युपदेशः पैङ्गिरहस्ये ।

यदि मृत्योः परं शान्तमनामयं शाश्वतं पदमिच्छुरसि तत्परमहंसो भवेति, अत्रेदं चिन्त्यं किं जडभरतं प्रत्येवोपदेश उत लक्षणया क्षत्रियमात्रम्प्रति आद्ये जडभरतस्यैवेति नेतरक्षत्रियप्राप्तिः । किञ्च जडभरतोऽपि प्रैषोच्चारणपूर्वकमाश्रमं गृहीतवान् इति न क्वापि श्रूयते, ततो ब्राह्मणाः प्रव्रजन्ति इत्येतदनुरोधात्परमहंसो भवेत्यस्यायमर्थः परमहंस इव निर्म्ममो भवेति, नापि द्वितीयः, तत्र हि लक्षणा सा च न युक्ता न विधौ लक्षणेति भट्टगुरुप्रभृतिभिर्विधौ लक्षणानिषेधात् । विधिरिति वदन् वादी प्रष्टव्यः किं विशिष्टविधिः उत प्राप्ते कर्मण्यधिकारविधिरिति ।

पक्षद्वयेऽपि लक्षणाप्रसक्तिर्दुर्वारा । ननूद्देश्ये लक्षणा न विध्यंशे अतो न दोष इति चेत्तर्हि लक्षणोद्देश्येऽपि न युक्तेति ब्रूमः । तथा हि सम्बन्धानुपपत्तिभ्यां हि लक्षणा न चानुपपत्तिः पूर्वोक्तरीत्या वाक्यस्यार्थान्तरपरतयाऽप्युपपत्तेः ।

या च जाबालश्रुतिर्जनकयाज्ञवल्क्यसंवादे तत्र परमहंसानाम संवर्तकारुणिश्वेतकेतुदुर्व्वासोऽ[*]ऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतय इति अत्रापि विधायकप्रत्ययाभावात् परमहंससदृशधर्म्मवन्त इति अहङ्कारममतयोरभावात्परमहंसा इति व्यपदिश्यन्ते । तस्मात्सिद्धो ब्राह्मणस्यैवाधिकार इति ।

[*] क्वेपुचिदादर्शेषु दुर्वासर्भुनिदाघ इति पाठः ।

इत्येवमन्तेन ग्रन्थेन क्षत्रियवैश्ययोरलिङ्गसंन्यासं पूर्वपक्षतयोपन्यस्य महतीमारभटीमारचय्य सर्वथा चतुर्थाश्रमानधिकार उपपादितस्तत्र क्षत्रियवैश्ययोः सलिङ्गसंन्यासबोधकश्रुतिस्मृतिसूत्रेतिहासपुराणानां दर्शितत्वादकिंचिदिदमिति ब्रूमहे, तथा हि पैङ्गिरहस्यब्राह्मणे यदि मृत्योः परं शान्तमनामयं शाश्वतं पदमिच्छुरसि तत्परमहंसो भवेति, अत्र भवेतिविधिप्रत्ययघटिततादृशवाक्येन स्मृतिसूत्रेतिहासाद्युपबृंहितेन क्षत्रियस्य पारमहंस्यविधानादञ्जसैव तुरीयाधिकारः सिध्यति । न च जडभरतमुद्दिश्याभिहितस्य परमहंसो भवेति वाक्यस्य क्षत्रियमात्रस्याधिकारबोधकत्वाङ्गीकारे लक्षणैव शरणं न च तद्युज्यते गुरुभट्टप्रभृतिभिर्विधौ लक्षणानभ्युगमात् । लक्षणानभ्युपगमे च पूर्वोक्तवाक्याज्जडभरतस्यैवाधिकारसिद्धिरिति न किंचिदेतदिति वाच्यम्, जाबालश्रुतौ निदाघरैवतकप्रभृतीनां परेषामपि क्षत्रियाणां पारमहंस्याभिधानाल्लक्षणाया आवश्यकत्वेन तस्या अत्र दोषत्वानङ्गीकारात् । न हि लक्षणेत्येव दोषस्तथा सति तस्या वृत्तित्वोच्छेदप्रसङ्गात् किन्तु तात्पर्याविषयार्थबोधकत्व एव तस्या दोषत्वं, प्रकृते च जाबालोदितनिदाघप्रभृतिक्षत्रियाणां पारमहंस्यस्यावयोरुभयोरेवाङ्गीकरणीयतया तस्य च लक्षणामन्तरेण निर्वोढुमशक्यतया तस्या बुबोधयिषितार्थबोधकत्वेन दोषत्वानङ्गीकारात् । विध्यंशे लक्षणाया दोषत्वेऽपि प्रकृते उद्देश्यांशे तस्याः कथंचिदपि दोषत्वस्य वक्तुमशक्यत्वाच्च ।

जाबालश्रुतेः सिद्धार्थानुवादकत्वेन निदाघजडभरतप्रभृतयः परमहंसा इत्यस्य परमहंससदृशा इत्यर्थकथनं तु साहसिकतामात्रनिबन्धनं, पैङ्गिरहस्यब्राह्मणे स्पष्टं विध्युपलम्भेन तत्सहकृतायामस्यां सादृश्यार्थकथनकदर्थनस्य प्राज्ञेन शङ्कितुमप्ययुक्तत्वात् द्विजा-

नामनाश्रमावस्थाननिषेधेन तेषां तुरीयाश्रमानधिकारे तदीयाश्रमस्य कुत्राप्यन्तर्भावयितुमशक्यत्वेन अनाश्रमित्वापत्तेश्च, जडभरतप्रभृतीनां पञ्चमाश्रमत्वमत्याश्रमित्वादिकं च यल्लोके कदाचिच्च शास्त्रे प्रसिध्यति तस्य तु तेषां नियतदेहाननुसन्धानेन अनियतवर्णाश्रमधर्मवत्त्वमात्र एव तात्पर्यमिति न ततस्तेषां कश्चिदतिरिक्त आश्रमः पञ्चमः सिध्यति । एतेन जाबालश्रुतिवाक्यस्यपरमहंसपदस्याहङ्कारममकाररराहित्यमात्रेण तादृशव्यपदेशसमर्थनमपि प्रत्यादिष्टं वेदितव्यम् । जाबालोपनिषदि एकस्यामेव पङ्क्तौ सहैवैकत्र पठितेषु भरतनिदाघरैवतकादिषु चर्चियेषु परमहंसशब्दस्य लाक्षणिकार्थावलम्बनेन तत्रैव च श्वेतकेतुदुर्वासःप्रभृतिषु ब्राह्मणेषु तस्य मुख्यार्थकथनेन च युगपद्वृत्तिद्व*यविरोधात् सर्वत्रैकरूप्येण वाऽहङ्कारममकाररराहित्यमात्र एव तात्पर्यकल्पने त्वकारणलक्षणावलम्बनस्यैव दोषतायाः सुव्यक्तत्वाच्च । भरतनिदाघादीनां राजर्षीणां विशिष्य संन्यासचिन्हाश्रवणं तु तेषां विशिष्य निश्वासादिप्रयत्नाश्रवणवद्वेवोपपद्यते । न हि ते मुखेन निशश्वसुरिति न श्रूयते चेत्तेषां निश्वासप्रयत्नस्तावता कथं सिध्यति अलोकसामान्यानामपि तेषां व्यवहारस्याऽसति बाधके लोकरीत्यैवोहनीयत्वात् ।

तस्माद्दुर्वाससा श्वेतकेतुना च सहपठितानां भरतनिदाघरैवतकादिराजर्षीणां पारमहंस्ये समोऽधिकारः केवलं चिदण्डैकदण्डकृत एव तु विशेष इत्यन्यत्र निरूपितमेव ।

गतिस्तुर्याश्रमे नास्ति बाहुजोरुजयोः क्वचित् ।
तुर्याश्रमे गतिः प्रोक्ता मुखजानां स्वयम्भुवा ॥

* यत्रैकपदस्य गमकानवतारे वृत्तिद्वयं न भवति, तत्रैकवाक्यस्यपदेष्वप्येकत्र लक्षणा परत्र च शक्तिरिति वैचित्र्यं विना फलं न भवतीति भावः ।

इत्येतदपि विशेषवाक्यानुसारेण चिदण्डनिषेधपरमेव न तु सामान्यतोन्यासनिषेधकं तस्य वचनान्तरेण साधितत्वात् ।

संन्यसेद् ब्राह्मणः सम्यग् वानप्रस्थोभवेन्नृपः ।
वानप्रस्थोभवेद्वैश्य एवं वर्णक्रमः स्मृतः ॥

इत्येतदपि ब्राह्मणानां चिदण्डसंन्यासविधायकं पूर्वोक्तवचनैकवाक्यतया तेषामेव तदधिकारित्वात्, इदमेव तु ब्राह्मणः सम्यगित्यनेन विवक्षितं सम्यक्त्वं यन्मुख्यचिदण्डाधिकारित्वं, क्षत्रविशोर्वानप्रस्थाश्रमाद्यधिकारित्वाभिधानं तु न तयोस्तुरीयानधिकारिताख्यापनपरं तयोस्तुरीयाश्रमस्य वचनान्तरसिद्धत्वात् । किं तु यथाभूतार्थाख्यानमात्रपरम् अत एव छन्दोगगृह्ये । वेदमधीत्य त्वयाणः चत्वार आश्रमाः । इति पठन्ति गृह्यसूत्रकाराः, अत्र च त्रिर्द्रुं स्वाध्यायेोपयुज्यत इति न्यायेन चातुराश्रम्याधिकारितावच्छेदकं वेदाध्ययनमिति सिध्यति । मलिनं ते वपुः स्नाया इत्यादौ वपुर्मालिन्यस्येव स्नानाधिकारितावच्छेदकत्वं, ततश्च यानुद्दिश्य वेदाध्ययनं विहितं त एव वेर्णिकाश्चातुराश्रम्येऽधिकारिण इत्यर्थादुक्तं भवति, संवदन्ति चामुमेवाधिकारम् ।

ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्वनं कृती ।
संन्यसेद्वासनाशान्तः सर्वभूतदयापरः ॥
ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ।

इत्यादिस्मृतयः पुराणवचनानि च ॥

अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितोयज्ञैर्मनो मोक्षे निवेशयेत् ॥
अनधीत्य गुरोर्वेदाननुत्पाद्य तथाऽऽत्मजान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥

इति स्मृतिवचनयुगलमप्यन्वयव्यतिरेकद्वारा मोक्षाश्रमे ऽध्ययनाद्यधिकारिणामेव कृतर्णापाकरणानामधिकारित्वं द्रढयति । जायमानोह वै ब्राह्मणस्त्रिभिरिति ऋणानुशासनवाक्ये च ब्राह्मणपदस्योपलक्षकतया निर्विवादतया ऋणापाकरणाधिकारिणामेव च मोक्षाश्रमावलम्बनाधिकारितया द्विजातित्रयस्य संन्यासोधर्म्य इति सिध्यति । न च प्रपन्नानां महाभारतादिषु यथोचितस्वाश्रमकर्मनिष्ठा*नां मोक्षश्रवणान्न मोक्षपदेन संन्यासग्रहणं युज्यत इति वाच्यम् । यतोऽस्तु विनाऽपि संन्यासं मोक्षस्तथापि न्यासे मुमुक्षुमात्रस्यैवाधिकारितया मुमुक्षायाश्च ऋणत्रयापाकरणपूर्विकाया एवोपयोगितया ऋणत्रयापाकरणस्य च द्विजात्यधिकारिकतया द्विजातीनामेव मोक्षाश्रमाधिकारित्वसिद्धिः । एवं च क्षत्रविशोरपि सलिङ्ग एव संन्यासः सिध्यति निषेधवाक्यानां तु त्रिदण्डपरतेति बहुधोपपादितम् । क्षत्रविशोः स्मृतिषु विशिष्य त्रिदण्डनिषेधात् । यत्तु क्षत्रविशोरलिङ्गसंन्यासेऽप्यसंतुष्यद्भिर्मदनपारिजातकारैर्ब्राह्मणाः प्रव्रजन्तीति श्रुतौ ब्राह्मणोद्देशेन प्रव्रज्याविधानादुद्देश्यविशेषणस्यावश्यं विवक्षणीयतया ब्राह्मणेतरस्य नाधिकारः प्रव्रज्यायामिति क्षत्रियादीनामलिङ्गोऽपि न्यासो न सिध्यतीत्युक्तम् ।

तत्रेदं विचार्यते पैङ्गिरहस्यब्राह्मणे जडभरतमुद्दिश्य पारमहंस्यविधिदर्शनात्, जाबालश्रुतौ च श्वेतकेत्वादिभिर्ब्रह्मर्षिभिः सहैव निदाघजडभरतादिराजर्षीणामपि पारमहंस्याम्नानात्पैङ्गिस्यविधिवाक्यस्य अवश्यं निदाघादिसंग्राहकतायामविप्रतिपत्तेर्त्रैवर्णिकव्यक्तित्वेन क्षत्रियस्य संन्यासो धर्म्य इत्यवश्यमास्थेयमन्यथा विधिवैरूप्यकल्पनाप-

* मोक्षकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते । इति ।

तेरिति, ब्राह्मणाः प्रव्रजन्तीति श्रुतौ चाजहत्स्वार्थवृत्त्या ब्राह्मणपदस्य द्विजात्युपलक्षकत्वेऽपि उद्देश्यविशेषणस्य ब्राह्मणत्व*स्यापरित्यागेन न काचिदुपप्लवसम्भावनेति युक्तः क्षत्रियस्य सलिङ्गसंन्यासः ।

न च पारमहंस्यस्यालिङ्गतयाऽपि सम्भाव्यमानत्वेन सिद्धेऽपि क्षत्रियस्य पारमहंस्याधिकारे सलिङ्गसंन्यासस्तावतापि क्षत्रियस्य न सिध्यतीति वाच्यम् । दत्तात्रेयदुर्वासःप्रभृतीनां परमहंसानां जडभरतादिपङ्क्तौ पठितानां श्रुतिस्मृतिषु दण्डाद्याम्नानात् तथा चारुणिश्रुतिः परमहंसमुद्दिश्य दण्डमाच्छादनं कौपीनं परिगृहेत् शेषं विसृजेत् । इति । ततश्च सिद्धः क्षत्रियस्य सलिङ्गसंन्यासः ।

वस्तुतस्तु ब्राह्मणाः प्रव्रजन्तीति श्रुतौ ब्राह्मणपदस्याजहत्स्वार्थवृत्तिकल्पनामपेक्ष्य पैङ्गिरहस्यारुणिश्रुत्याद्युपरोधोगुरुतरदोष इति ब्राह्मणपदस्योपलक्षणतापक्ष एव युक्तो वाक्यविरोधे पदस्य जघन्यवृत्तिकल्पनाया एव युक्तत्वात् ।

यदि त्वन्तःप्रविश्य परीक्ष्येत तदा ब्राह्मणपदेन क्षत्रियवैश्ययोर्बोधे जघन्यवृत्तिकल्पनाऽपि न भवति वृद्धव्यवहारस्यैव प्रयोगे शरणीकरणीयत्वात्, अस्ति च क्षत्रियवैश्ययोर्ब्राह्मणपदेन वैदिको व्यवहारस्तथा हि शुक्लयजुर्वेदिनां शतपथब्राह्मणम् । अथाद्धा जायते यो ब्राह्मणो यो यज्ञाज्जायते तस्मादपि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयाद् ब्राह्मणो हि जायते यो यज्ञाज्जायते, इति ।

एवं च ब्राह्मणपदेनाविप्रतिपन्नवैदिकव्यवहारयोगिनोः क्षत्रविशोरिह प्रव्रज्याविधायकश्रुतौ ग्रहणं युक्तमेव वैदिकव्यवहारस्य सर्वापेक्षया बलवत्त्वात् । यथाहुर्वृद्धाः ।

---

* जहत्स्वार्थलक्षणायामेवोद्देश्यविशेषणपरित्यागोनाजहत्स्वार्थायामिति भावः ।

गौण्या लक्षणया वापि वाक्यशेषेण वा पुनः ।
वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् ॥ इति,

न च ब्राह्मणपदेन क्षत्रविशोर्ग्रहणे व्यवहारसाङ्कर्यप्रसङ्गो दोषायेति वाच्यम् । यतो वर्णत्वव्याप्यविप्रत्वरूपधर्मावच्छिन्नबुबोधयिषास्थले ब्राह्मणपदेन क्षत्रादिव्यावृत्तधर्मावच्छिन्नस्य तात्पर्यबलाद् बोधेऽपि तात्पर्यग्राहकमानान्तरसमवधानासमवधानाभ्यामेकस्मादपि ब्राह्मणपदात्तादृशबोधाबोधयोरुपगमेनातिप्रसङ्गशङ्कायाः सर्वथाऽनुदयात् । एवमेव तु भवतापि जायमानो ह वै ब्राह्मण इति श्रुतौ ब्राह्मणपदेन वर्णत्रयं विवक्ष्यते तत्र ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः इति वाक्यशेषे ब्रह्मचर्यादिभिर्ऋणत्रयापाकरणप्रतीतेर्ब्रह्मचर्यादिषु च त्रैवर्णिकानां सर्वेषामविशेषेणाधिकारित्वात् ।

यथा वा पूर्वस्मिन् काण्डे प्रोद्गातॄणां फलचमसभक्षणाभिधानेऽपि तत्र गमकान्तरसद्भावेन होत्रादीनामपि फलचमसभक्षणाधिकारित्वसिद्धान्तस्तत्रत्यस्य प्रोद्गातृपदस्य होत्रादिसाधारण्येनार्थबोधकत्वादेवं पूर्वोक्तजाबालपैङ्गिरहस्यारुणिश्रुत्याद्युपष्टम्भबलादिहापि ब्राह्मणपदं शतपथब्राह्मणाभिहितसंस्कारावच्छिन्नब्राह्मणपरमिति तेनाञ्जस्येनैव ब्राह्मणपदाद् द्विजातिमात्रावगमो नैव कथमपीषदपि शङ्काविषयस्त्रयीविद्यवृद्धानाम् ।

न च शतपथब्राह्मणे 'अथैनं देवेभ्य आवेदयति दीक्षितोऽयं ब्राह्मणः' इति वाक्येन यागार्थं दीक्षितस्य यजमानस्य देवेभ्यो दीक्षितत्वावेदनं बोध्यते तत्र क्षत्रियवैश्यकर्तृकयागे देवेभ्यो दीक्षितत्वावेदनमन्त्रे ब्राह्मणत्वजात्यवच्छिन्नवाचकं ब्राह्मणपदं न प्रयोक्तव्य-

मित्येव प्राप्नोति । नाप्यूहेन तत्र क्षत्रियादिपदप्रयोगः, ऊहस्याप्रामाणिकत्वादितिकिंकर्तव्यताव्यामोहसमुपस्थितौ यो यज्ञाज्जायतइत्यर्थवादबलोपेतविधिना तत्र क्षत्रियवैश्ययोरपि ब्राह्मणपदेन मान्त्रिकव्यवहार इति व्यवस्थाप्यते तथा च न तद्दृष्टान्तावष्टम्भेन सर्वत्र तथा वक्तुं पार्यते तथा सति व्यवहारसाङ्कर्यप्रसङ्गात्, प्रकृते तु ब्राह्मणाः प्रव्रजन्तीति श्रुतिर्जातिब्राह्मणमुपादाय विहितविधेयेति कृतकृत्या नाधिकमाकाङ्क्षितुं क्षमेति तद्दृष्टान्तेन कथं राजन्यवैश्यावधिकुर्यातां पारिव्राज्ये इति वाच्यम् । पैङ्गिरहस्यब्राह्मणे जडभरतमुद्दिश्य पारमहंस्यविधेरेव क्षत्रियादेरधिकारावगमकतया वातरशनन्यायावतारस्य समुचितत्वात् । अत एव तु जाबालाः ॥

तत्र परमहंसा नाम संवर्तकारुणिश्वेतुकेतुदुर्वासऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयः इति मुक्ताप्रवालन्यायेन ब्राह्मणक्षत्रियान् एकस्मिन्नेव वाक्ये परमहंसानामनन्ति, न च तेषां पारमहंस्यं न मुख्यं विधिविहितं किन्तु गौणमिति वक्तुं शक्यं तथा सति मुख्यपरमहंसकथाया एव जगति समुच्छेदात् । विना बाधकावतारं तादृशकल्पनायाः श्रुत्यक्षरोपमर्दकत्वापाताच्च । न च तत्पङ्क्तिपठितस्य श्वेतकेतोर्ब्रह्मचर्यादेः श्रुतत्वेन प्रामाणिकत्वेऽपि संन्यासस्याश्रवणात् पारमहंस्यं गौणमिति वाच्यम् । पारमहंस्यश्रवणस्यैव गमकत्वात् । न हि वत्सतरीजिघांसया गौर्वितीर्यते न हि ब्राह्मणाः प्रव्रजन्तीति श्रुतिस्थब्राह्मणपदस्य मुख्यत्वं संरक्षणीयमिति श्रुत्यन्तरस्थपारमहंस्यं गौणमिति कोविदकल्पना । न च विनिगमकविरहादेव पारमहंस्यं गौणं ब्राह्मणपदन्तु मुख्यार्थमिति वैपरीत्यं कुतो न स्यात् । न हि पारमहंस्यस्य मुख्यत्वे कंचन विशेषमालोचयाम इति तु दुर्धिषणैकचोद्यम् ।

पारमहंस्यस्य गौणत्वमुपकल्प्य सर्वत्रोपमर्दापेक्षया अणुरपि विशेषोऽध्यवसायकर इति न्यायेन ब्राह्मणपदे अजहत्स्वार्थवृत्तिकल्पने लाघवस्यैव विनिगमकत्वात् । गौण्यां हि सर्वथा स्वार्थपरित्यागः अजहत्स्वार्थायां तु न लेशतोऽपि स्वार्थत्यागः किं त्वधिकपरिग्रहमात्रमिति विशेषस्य सुव्यक्तत्वात् । न हि लक्षणेत्येव साम्यं तथा सति तत्पुरुषलक्षणापेक्षया बहुव्रीहिलक्षणाया अप्यविशेषप्रसङ्गात् । तस्माच्छत्रपथन्यायेनात्र ब्राह्मणपदं द्विजमात्रपरमिति साधु समर्थितं भवति । तस्मात्प्राचामभिमतो ब्राह्मणपदस्योपलक्षणतापक्षो मुख्य इत्यध्यवस्यामः ।

उपलक्षणतापक्षमूलक एव च ब्राह्मणेतरयोः क्षत्रियवैश्ययोस्त्रिदण्डनिषेधविधिरन्यथा ब्राह्मणस्यैव न्यासाधिकारित्वेन इतरयोस्तत्प्रापकप्रमाणविरहादेव संन्यासानधिकारित्वसिद्धौ त्रिदण्डनिषेधविधिरपार्थक एव स्यान्न ह्यत्यन्ताप्राप्तौ निषेधः । इतरथा तु शूद्रस्यापि त्रिदण्डो निषिद्धो न । उपलक्षणत्वे तु अधिकारिस्वरूपनिर्दिदिक्षया ब्राह्मणग्रहणे कृते क्षत्रियवैश्ययोरपि द्विजातितया कामं त्रिदण्डैकदण्डलक्षणसंन्यासप्राप्तौ गौण एकदण्डसंन्यासो विधीयते मुख्यस्तु त्रिदण्डसंन्यासोऽनधिकारान्निषिध्यते । साक्षात्कृतानेकशतशाखा मन्वादयो हि शाखान्तरे स्फुटं पठ्यमानं क्षत्रियादेस्त्रिदण्डनिषेधमुपलभ्य ब्राह्मणाः प्रव्रजन्तीति श्रुतेः क्षत्रियादेरेकदण्डलक्षणप्राव्राज्यविधायकतामवधृत्य त्रिदण्डनिषेधं सस्मरुरिति स्वास्थ्यं सर्वविधिनिषेधवाक्यानां, परत्रापि च मैत्रायण्यादिश्रुतिषु पठ्यमाना एकदण्डविधयः क्षत्रियादीनेवावलम्बन्ते त्रिदण्डग्रहणासमर्थान् वृद्धानातुरान् काणान् कुणान् समुपस्थितसंक*टानपरांश्च

* अङ्गहीनानां न्यासनिषेधपरवाक्यानि तूत्कटवैराग्यविरहे योज्यानि ।

तथाविधान् । त्रिदण्डपरित्यागपूर्वकैकदण्डग्रहणपराः श्रुतिस्मृतयोऽप्येतद्विषया एव, अथवा पूर्वस्मिन् वयसि गृहीतत्रिदण्डोऽपि जरसा जीर्यच्छरीरस्त्रिदण्डनियताचाराशक्तोवृद्धादिस्त्रिदण्डमपहाय एकदण्डपरिग्रहायानुमन्यते तादृशवाक्यैः । प्राधान्यं चैकदण्डे चतुर्थाश्रमसंरक्षणलक्षणमेव त्रिदण्डैकदण्डधारणकल्पयोः संपदापत्कालिकतायाः स्मृतिषु स्पष्टमुद्घुष्यमाणत्वात् । क्वचित्त्वेकदण्डपदेन ज्ञानात्मकैकदण्ड इत्यादिकं बहुतरमिहास्माभिस्तत्रतत्रोपपादितमनुसंधेयमिति किमिहास्थाने मतिकर्दमेन ।

एवं च प्रथमप्रतीतजातिब्राह्मणोद्देशेन प्रव्रज्याविधेश्चारितार्थ्यें ब्राह्मणपदस्य चरमप्रतीतयौगिकार्थाख्यानं रूढिप्रौढिम्नैव पराहतमित्याद्युपालम्भदानं ब्राह्मणपदस्योपलक्षणतापक्षे ब्राह्मणाः प्रव्रजन्तीति जाबालश्रुतिस्थब्राह्मणपदस्योपरोधाभिधानम् औदुम्बरीस्पर्शनसर्ववेष्टनश्रुतिस्मृत्योः साजात्यं पुरस्कृत्याच क्षत्रियादेर्न्यासबोधकसूत्रपुराणेतिहासानां सर्वेषामप्रामाण्यसमर्थनमित्यादिप्रयत्नजातं मदनपारिजातकृतां न केवलं मीमांसानध्ययनमेवावेदयति किन्तु स्वरूपतः श्रुतिस्मृत्याद्यनभिज्ञतामपीति सुधियो विभावयन्तु । यच्च त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति छन्दोगसूत्रस्यायमर्थः त्रयाणां वर्णानां यथोचितं चत्वार आश्रमा इति औचित्यं च श्रुतिविरोधाद् ब्राह्मणस्यैव तुर्याश्रमाधिकारविधौ ।

त्रैवर्णिकानां संन्यासोविद्यते नात्र संशयः ।
शिखायज्ञोपवीतानां त्यागपूर्वैकदण्डयुक् ॥

इति ब्रह्माण्डपुराणमपि छन्दोगसूत्रसमानार्थकमिति मदनपारिजातकारास्तदिदमपि तेषां मर्कटस्य मुकुरे मुखावलोकनकल्पं

भ्रान्तिवर्द्धनमेव श्रुतिविरोधस्यासत्त्वे यथोचितमित्याद्यध्याहारस्य सूत्रस्थस्य वेदमधीत्येत्येतस्याधिकारिनिर्देशपरस्यासङ्गत्यापत्तेश्च, वेदाध्ययनं हि चातुराश्रम्याधिकारितावच्छेदकतया निर्दिष्टं तच्च न त्वत्पक्षे समञ्जसम्, अध्ययनवतोऽपि क्षत्रियवैश्ययोस्तुरीयेऽनधिकारात् । त्रैवर्णिकानां संन्यास इति ब्रह्माण्डवचनस्य तु यथोचितमित्यध्याहारेऽपि न सङ्गतिस्तस्य 'विद्यते नात्र संशय'—इत्यसंशयाख्यानमुखेन क्षत्रियवैश्ययोरेव विशिष्य संन्यासस्य धर्म्यत्वाभिधानपरत्वात् । अन्यथा ब्राह्मणस्य संन्यासः सुप्रसिद्ध इत्यसंशयोक्तिरपार्थिकेति सुव्यक्तमेव । यदपि ।

वैराग्योत्पत्तिमानेव संन्यासे परियुज्यते ।
रागवान्न तु विप्रोऽपि वेदवेदाङ्गवित्तमः ॥

इति ब्रह्मवैवर्तवचनस्य वेदवेदाङ्गवित्तमोऽपि विप्रो रागवाँश्चेत्संन्यासे न परियुज्यते इत्यन्वयमाख्याय एवं च विप्रस्य विरक्तस्यैवाधिकारोऽभिहितो भवेन्न क्षत्रियादेरित्युपसंजहार पारिजातस्तदपि निरुक्तरीत्या क्षत्रियादेः संन्यासस्य धर्म्यत्वसिद्धौ वचनस्य वैवर्ण्येन क्लेशमात्रावहं न त्वर्थसाधकमिति किं तत्र निराकरणसंनाहेनेत्युपरम्यते ।

यच्च ।

ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः ।
ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ॥

इति स्मृतौ प्रव्रज्याशब्दस्य संन्यासे रूढस्यापि वानप्रस्थाश्रमावलम्बनार्थकत्वं तस्यापि वैराग्यहेतुकत्वादिति पारिजातस्तदपि प्रलापान्नातिरिच्यते । रूढ्यनादरकारणविरहात् । ऋणत्रयापाकरणा-

धिकारिणां ब्रह्मचर्यविशां स्पष्टमभिहिते प्रव्रज्ये श्रुत्यनुगृहीते प्रव्रज्यादिलक्षणावलम्बनस्य महाभ्रान्तिहेतुकत्वाच्च ।

यच्च यद्वा ब्राह्मणः स्ववृत्तावजीवन् क्षत्रियवृत्तिमाश्रितः । तयाऽप्यजीवन् वैश्यवृत्तिं ततश्च तामापदं निस्तीर्यापि न वर्णान्तरवृत्तिं परित्यजति किंतु तत्रैव वृत्ताववस्थितस्तदा तत्तत्क्षत्रियादिवृत्तिः क्षत्रिय इति वैश्य इति च व्यपदिश्यते शास्त्रानभ्यनुज्ञानकालेऽपि क्षत्रियादिवृत्तिनिरतत्वात्ततः सोऽपि प्रव्रजेद् गृहादिति प्रव्रज्याधिकारं दर्शयति अत एव ब्राह्मणः क्षत्रियोवाऽथ वैश्यो वा इति वचने अथ—शब्द उपात्तः, ब्राह्मण एवानन्तरं क्षत्रवृत्त्याश्रयणात् क्षत्रियः अथ स एव वैश्यवृत्त्या वैश्य इत्यानन्तर्यप्रतिपादनादयमर्थो लभ्यते । एतेन ।

ब्राह्मणः क्षत्रियोवैश्यस्ततोगच्छेद्वनं कृती ।

इत्येतदपि व्याख्यातम् । एवं च मनुदत्तात्रेयादिवचनान्यप्यानुकूल्यं नेयानि इति बभ्राम पारिजातस्तद्यथा ब्राह्मणः क्षत्रियइति स्मृतिस्थं ब्राह्मणपदं क्षत्रियाचारब्राह्मणपरं वैश्यपदं च वैश्याचारब्राह्मणपरमित्यर्थनिरूपणे मुख्यब्राह्मणालाभेन न्यूनताप्रसङ्गः । एकस्य ब्राह्मणपदस्य तूभयार्थकत्वे युगपद्वृत्तिद्वयप्रसङ्गः । किंच संन्यासविधौ वैराग्यवतामेव वैराग्योत्पत्तिमानेव संन्यासे परियुज्यते इत्यादिस्मृत्याऽधिकारबोधनेन तेषां च सतां विप्राणां क्षत्रिय*वैश्यवृत्तितायाः असम्भवेन कथमिदं सङ्गच्छतामभिधानमिति विवेकिन एव विवेचयन्तु । किंचानापद्यपि ये न त्यजन्ति क्षत्रियादिवृत्तिं तेऽत्र भवता ब्राह्मणा दुर्वृत्ताः क्षत्रियादिपदेन बोधनीया न च तेषामङ्ग-

* न हि संन्यासोपयोगिवैराग्यभाजोपि विप्राः क्षत्रियवैश्यवृत्तय इति सम्भवति ।

ङ्कारममकाररााहित्यसम्भवः स्मृतौ च निर्ममोनिरहङ्कृतिरित्युच्यते न चैव स्वधर्मच्युतोऽपि निर्ममोनिरहङ्कृतिरपीति च युज्यते, द्वितीयस्मृतावपि ततो गच्छेद्वनं कृतीति कृतित्वोपादानान्न वचादिवृत्तिर्ब्राह्मण एव वचादिरिति वक्तुं शक्यम् । तस्माद्दत्तात्रेयदुर्वासःश्वेतकेतुप्रभृतिभिः श्रुतिषु सहपठितानां जडभरतनिदाघरैवतकप्रभृतीनां राजर्षीणां पारमहंस्ये साधारण्येन सलिङ्गेऽधिकारसिद्धौ कैमुतिकसिद्धोऽपरत्रापि संन्यासेऽधिकार इति तदुपरोधः सुरगुरोरप्यशक्य इति मदनपारिजातकृतां सर्वोऽप्येष पूतिकूष्माण्डायितो ग्रन्थः । किंच विष्णुपुराणे मन्वादिवचनेषु च ब्राह्मणपदेनोपक्रम्य द्विजपदेनोपसंहारो-ब्राह्मणपदस्य द्विजात्युपयाहकताबोधक इति द्विजातिमात्रस्याधिकारोन्यासे सिध्यति । उपसंहारबलेनोपक्रमस्य नेतव्यतया द्विजातिमात्राधिकारबोधकमनूपसंहारेण उपक्रमस्यब्राह्मणपदस्य नेतव्यत्वात् ।

यद्यप्यसञ्जातविरोधितयोपक्रमस्यैव प्राबल्येन सिद्धान्ते उपक्रमानुरोधेनोपसंहारो नेतव्य इति प्राप्नोति तथाऽपि ।

एतद् द्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत् कृतकृत्यो हि द्विजोभवति नान्यथा ॥
अनेन क्रमयोगेन परिव्रजति योद्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥

इति मनुवचनयोर्द्विजन्मसाफल्यं न्यासेनाभिधाय ब्राह्मणस्य विशेषत इत्युक्त्या द्विजातिमात्रस्य स्पष्टमधिकारसिद्ध्या तद्बलोपेतस्योपसंहारस्य हीनबलस्याप्युपक्रमबाधकत्वं, हीनबलस्यापि बलवत्प्रमाणोपेतस्य बलवत्तमतायाः प्रबला अपि बाध्यन्ते निर्बलैः पार्थिवाश्रितैः । इति मीमांसकैरप्यभ्युपेतत्वात् ।

एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति । इति वाजसनेयकब्राह्मणस्थब्राह्मणपदं तु वाजसनेयकब्राह्मणे*क्तरीत्यैव ब्राह्मणक्षत्रियवैश्यपरम् । तद्यथा, यो ब्राह्मणो यो यज्ञाज्जायते तस्मादपि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयाद् ब्रह्मणो हि जायते यो यज्ञाज्जायते इति, इयमेव च व्यवस्था—

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् । इति,

एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ॥

इति चोपक्रमोपसंहारयोर्मनूक्तब्राह्मणपदस्येति सर्वमनुकूलमनाकुलं च ।

दत्तात्रेयादिवाक्यानि तु त्रिदण्डनिषेधपराणि न चात्र आचक्ष्महे क्षत्रियविशोस्त्रिदण्डाधिकारितां किन्त्वेकदण्डाधिकारिताम् । पारिजातस्य शेषः क्षत्रियादेस्तुरीयानधिकारपरो ग्रन्थस्तु पूर्वमेवास्माभिर्बहुधा विहतिं नीत इति न किंचिदवशिष्यते । तस्मात्पारिजातकृतां कीदृशोऽयत्यग्रन्थ इति विवेचनीयं विद्वद्भिरेवानाकुलमतिभिरिति विरमामो विस्तरात् ॥

यदपि केश्चिन्मानवधर्मशास्त्रं व्याचक्षाणैः । षष्ठाध्याये ।

प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ॥ ३८ ॥

इति । तत्रैव चाध्याये ।

एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ।

पुण्योऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ॥ ९७ ॥

* उपक्रमोपसंहारयोरुपक्रमानुरोधेनोपसंहारो नेतव्य इति श्रीसांप्रदायिकाः । उपसंहारानुरोधेनोपक्रमो नेतव्य इति शाङ्कराः ।

इति च श्लोके उपक्रमोपसंहारयोर्ब्राह्मणपदोपादानान्नाधिकारः क्षत्रियादेर्न्यासे इत्युक्तं, तथाऽपि न ते मनुमर्मार्थविदः प्रकरणानुग्रहज्ञानविरहात्तथा हि अस्मिन् प्रकरणे ब्राह्मणपदं द्विजमात्रतात्पर्यकमन्यथा ।

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ ७० ॥

इति षष्ठेऽध्याये प्राणायामत्रयमभिहितं ब्राह्मणजातेरेव परमतपस्त्वेनोक्तं स्यादिति द्विजमात्रस्य सर्वबाह्याभ्यन्तरमलक्षालनहेतुत्वेन तस्य शास्त्रान्तरेषु सर्वत्राभिधानं विरुध्येत । अत एव त्विह प्रकरणे ।

यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ॥ ४० ॥
आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ॥ ४१ ॥
उपेक्षकोऽसङ्कुसुमो मुनिर्भावसमाहितः ॥ ४३ ॥
अनेन क्रमयोगेन परिव्रजति यो द्विजः ॥ ८५ ॥
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ॥ ९१ ॥
वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥ ९४ ॥

इति च क्षत्रियादिसाधारणद्विजसंग्रहाय मुनिद्विजादिपदमभ्यास्यन्मध्ये मनुः । ततश्च तात्पर्यग्राहकलिङ्गषट्के उपक्रमोपसंहारयोः संभूयैकलिङ्गरूपतया क्षत्रियादेर्न्यासबोधकप्रमाणान्तरोपष्टब्धस्यास्य मानवाभ्यासस्योपक्रमाद्यपेक्षया बलवत्त्वेन क्षत्रियादेर्न्यासोऽञ्जसैव मनुवाक्यात् सिध्यति ।

अत एव तु जाबालादिश्रुतिस्थब्राह्मणपदार्थस्फुटीकरणाय ।
दशलक्षणकं धर्ममनुतिष्ठन् समाहितः ।
वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥ ९४ ॥

इति द्विजपदघटितं विधिवाक्यान्तरं मनुः पपाठ । अन्यथा ब्राह्मणस्य संन्यासः पूर्वमेवावेदित इति किं पौनःपुन्याभिधानम् । एतावानेव परं विशेषो यत्क्षत्रियस्त्रिदण्डं नार्हति किं त्वेकदण्ड-मिति किमाम्रेडनेन । जाबालादिश्रुत्यभिहितसंन्यासस्य क्षत्रियादि-साधारण्येऽपि त्रिदण्डैकदण्डलक्षणवैलक्षण्यस्य स्फोरणार्थमेव मनो-र्वाक्यद्वयेन संन्यासाभिधानमित्यपि मनुमर्मविदां सुज्ञानम् ।

अथ केचन परेऽपि ब्राह्मणस्यैवाश्रमचतुष्टयाधिकारमुपवर्ण-यन्ति तदुपष्टम्भकतयोदाहरन्ति च श्रुतिस्मृतीतिहासपुराणवाक्यानि, तथा हि वाजसनेयकब्राह्मणम् । एतं वै तमात्मानं विदित्वा ब्राह्म-णाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षा-चर्यं चरन्ति इति, मनुरपि ।

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।
इत्युपक्रम्य एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ।

इत्युपसंजहार । तदिहोपक्रमोपसंहाराभ्यां ब्राह्मणस्यैवाश्र-मचतुष्टयाधिकारः सिध्यति अत एवापरत्रापि मनुः ।

मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति ।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः ॥

इति क्षत्रियादिवारणाय द्विजोत्तमपदमुपात्तवान्, नारदोऽपि—

प्रथमादाश्रमाद्वापि विरक्तो भवसागरात् ।
ब्राह्मणो मोक्षमन्विच्छंस्त्यक्त्वा सङ्गान् परिव्रजेत् ॥ इति

योगियाज्ञवल्क्योऽपि ।

चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः ।
क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोः ॥ इति,

वामनपुराणमपि ।

चत्वार आश्रमाश्चैते ब्राह्मणस्य प्रकीर्त्तिताः ।
गार्हस्थ्यं ब्रह्मचर्यं च वानप्रस्थ्यं त्रयो*ऽऽश्रमाः ॥
क्षत्रियस्यापि कथिता य आचारा द्विजस्य हि ।
ब्रह्मचर्यं च गार्हस्थ्यमाश्रमद्वितयं विशः ॥
गार्हस्थ्यमुचितं चैकं शूद्रस्य क्षणदाचर! ॥ इति,

अत्र चौचित्याभिधानेन ज्येष्ठाश्रमत्रयस्य समन्त्रकतया तदनधिकारिणः शूद्रस्यैकाश्रम्यं न्यायसिद्धमित्युच्यते । यद्यपि विवाहोऽपि समन्त्रकस्तथापि विशिष्य शूद्रस्यामन्त्रकविवाहाभिधानमिति तस्यामन्त्रकः स सिध्यतीति तात्पर्यम् । एवमेव तु काषायदण्डादिलिङ्गधारणं क्षत्रियवैश्ययोर्निषिद्धमित्यामनन्ति स्मृतिकाराः ।

मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ।
बाहुजातोरुजातानां नायं धर्मो विधीयते ॥ इति,

बौधायनोऽपि ।

ब्राह्मणानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ।
राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः ॥ इति,

तस्माद् ब्राह्मणस्यैव ब्रह्माश्रमाधिकारः सिध्यतीति, तदिदं श्रुतिस्मृतीतिहाससूत्रपुराणवचनानां पाठतोऽर्थतश्चानाकलननिबन्धनम् । तथा हि पैङ्गिरहस्यब्राह्मणे जडभरतं क्षत्रियमुद्दिश्य । यदि मृत्योः परं शान्तमनामयं शाश्वतं पदमिच्छुरसि तत्परमहंसो भव । अत्र भवेति विधिप्रत्ययघटितबलवद्वैदिकलिङ्गोपेतैर्वक्ष्यमाणैरुक्तैश्च प्रमाणैः स्फुटं तुरीयाश्रमस्य त्रैवर्णिकमात्राधिकारिकत्वसिद्धिः ।

* आर्षः पाठः ।

यथाऽऽह ।

ऋणत्रयमपाकृत्य निर्ममो निरहङ्कृतिः ।
ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ॥

इति स्मृतिः ।

त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति सूत्रम् ।

त्रैवर्णिकानां संन्यासो विद्यते नात्र संन्यासः ।
शिखायज्ञोपवीतानां त्यागपूर्वकदण्डभाक् ॥

इति ब्रह्माण्डपुराणम् ।

ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्वनं कृती ।
संन्यसेद्भवबन्धनाशाय सर्वभूतदयापरः ॥ इति च स्मृतिः

वंशानुकीर्तनप्रस्तावे द्वादशाध्याये कौर्मे च ।

अथास्मिन्नन्तरेऽपश्यत्समायान्तं महामुनिम् ।
श्वेताश्वतरनामानं महापाशुपतोत्तमम् ॥
भस्मसन्दिग्धसर्वाङ्गं कौपीनाच्छादनान्वितम् ।
तपसा दर्शितात्मानं शुक्लयज्ञोपवीतिनम् ॥
समाप्य संस्तवं शम्भोरानन्दाश्रुविचक्षणः ।
ववन्दे शिरसा पादौ प्राञ्जलिर्वाक्यमब्रवीत् ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मे साक्षान्मुनीश्वराः ।
योगीश्वरोऽद्य भगवान् दृष्टो योगविदांवरः ॥
अहो मे सुमहद् भाग्यं तपांसि सफलानि मे ।
किं करिष्यामि शिष्योऽहं तव मां पालयानघ ! ॥
सोऽनुगृह्याथ राजानं सुशीलं शीलसंयुतम् ।
शिष्यत्वे परिजग्राह तपसा क्षीणकल्मषम् ॥

सांन्यासिकं विधिं कृत्स्नं कारयित्वा विचक्षणः ।
ददौ तदैश्वरं ज्ञानं स्वशाखाविहितं व्रतम् ॥
अशेषवेदसारं तत्पशुपाशविमोचनम् ।
अत्याश्रम इति ख्यातं ब्रह्मादिभिरनुष्ठितम् ॥ इति,

एवं पृथुपौत्रस्य सुशीलस्य क्षत्रियस्य श्वेताश्वतरमुनिना कृत्स्नसांन्यासिकविध्यनुष्ठापनपरम् । कार्त्स्न्यं चात्र बाह्याभ्यन्तरभेदभिन्नं दण्डकमण्डलुशमदमादिस्वरूपम् ।

ब्रह्मवैवर्त्तपुराणं च ।

वैराग्योत्पत्तिमानेव संन्यासे परियुज्यते ।
रागवान्न तु विप्रोऽपि वेदवेदाङ्गवित्तमः ॥ इति,

अत्र रागवतोविप्रस्यानधिकारख्यापनमुखेन विप्रोऽपीत्यपिना क्षत्रियादेरधिकारोन्यासे आञ्जस्येन सिध्यति । एवम् ।

एतद् द्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत्कृतकृत्यो हि द्विजोभवति नान्यथा ॥

इति सांन्यासिकप्रकरणस्था स्मृतिर्दण्डग्रहणेन द्विजन्मसाफल्यं प्रमापयन्ती ब्राह्मणस्य विशेषतोऽधिकारं कथयन्ती च क्षत्रियादेश्चतुर्थाश्रमाधिकारं स्फुटमेव साधयति । एवमेव तु ।

प्रव्रज्याऽवसिता यत्र त्रयो वर्णा द्विजातयः ।
निर्वासं कारयेद्विप्रं दास्यं क्षत्रियवैश्ययोः ॥ इति

प्रव्रज्याभ्रष्टानां ब्राह्मणक्षत्रियविशां मध्ये ब्राह्मणस्य निर्वासनं क्षत्रविशोश्च दास्यं ब्रुवती कातीयस्मृतिर्भवति त्रयाणामप्यविशेषेण तुरीयाश्रमग्रहणे प्रमाणम् ।

अत एव तु त्रयाणामविशेषेणाधिकारबुबोधयिषया ।

संनिरुध्येंद्रियग्रामं रागद्वेषौ प्रहाय च ।
भयं हृत्वा च भूतानाममृतीभवति द्विजः ॥

इति याज्ञवल्क्यो द्विजपदं प्रायुङ्क्त ।

धर्मविवृतौ ।

ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्वनं कृती ।
संन्यसेद्वासनाशान्तः सर्वभूतदयापरः ॥

इति स्मृतिः ।

ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः ।
ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ॥
अग्नीनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत् ।
योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायणः ॥
एवं वनाश्रमे तिष्ठंस्तपसा दग्धकिल्विषः ।
चतुर्थमाश्रमं गच्छेत्संन्यस्य विधिना द्विजः ॥

इति कौर्मनारसिंहे अपि पुराणे भवतः प्रमाणम् । वस्तुतस्तु संन्यासप्रकरणे ब्राह्मणपदघटितासु सर्वास्वपि श्रुतिस्मृतिषु यो ब्राह्मणो यो यज्ञाज्जायते तस्मादपि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयाद् ब्रह्मणो हि जायते यो यज्ञाज्जायते । इति शतपथब्राह्मणोदितं कर्मब्राह्मण्यमेव विवक्षितं, न च तच्छूद्राद्यतिप्रसक्तं तेषां वैदिके कर्मण्यध्ययनविधिसिद्धवेदवैधुर्यादेवानधिकारात् । युक्तं चैतत्स्वाश्रमविहितकर्मानुष्ठानेनान्तःकरणकषायपरिपाके संन्यासौपयिकब्राह्मण्यस्य क्षत्रियविट्सु सर्वद्विजेषूत्पादसम्भवात् । तस्मादिहान्यत्रैव ब्राह्मणाद् ब्राह्मण्यां विधिपरिणीतायामुत्पाद्यमानत्वलक्षणं

ब्राह्मण्यं न विवेचितुं शक्यम् । एवमेव तु गुणनिबन्धनब्राह्मण्यमभ्रप्रयन् नहुषं प्रति युधिष्ठिरः ।

सत्यं ज्ञानं क्षमाशीलमानृशंस्यं तपो घृणा ।
दृश्यन्ते यत्र राजेन्द्र! स ब्राह्मण इति स्मृतः ॥
यत्रैतन्न भवेन्नूनं तं शूद्रमिति निर्दिशेत् । इति ।

वह्निपुराणेऽपि ।

न जातिर्न कुलं राजन्! न स्वाध्यायः श्रुतं न च ।
कारणानि द्विजत्वस्य वृत्तमेव हि कारणम् ॥
किं कुलं वृत्तहीनस्य करिष्यति दुरात्मनः ।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥
नैकमेकान्ततो ग्राह्यं पठनं हि विशांपते! ।
वृत्तमन्विष्यतां तात! रक्षोभिः किं न पठ्यते ॥
बहुना किमधीतेन नटस्येव दुरात्मनः ।
तेनाधीतं श्रुतं वापि यः क्रियामनुतिष्ठति ॥
कपालस्थं यथा तोयं श्वदृतौ च यथा पयः ।
दूष्यं स्यात्स्थानदोषेण वृत्तहीनं तथा श्रुतम् ॥
चतुर्वेदोऽपि दुर्वृत्तः शूद्रादल्पतरः स्मृतः ।
तस्माद्विद्धि महाराज! वृत्तं ब्राह्मणलक्षणम् ॥

इत्येवमादि तत्रतत्र श्रुतिस्मृतिपुराणादिषु विविधमेव प्रयोजनभेदेन ब्राह्मण्यमाम्नायते ।

केचित्तु संन्यासाधिकारबोधकश्रुतिस्मृत्यादिवाक्यस्थं ब्राह्मणपदं द्विजातिमात्रोपलक्षकमत एव तु बहुलं तेषुतेषु वचनेषु वर्णत्रयसाधारण्यसंपादनाय द्विजपदप्रयोगः । अत एव तु ।

द्वितीयमायुषो भागमुषित्वा तु गृहे द्विजः ।
तृतीयमायुषो भागं गृहमेधी वने वसेत् ॥
उत्पाद्य धर्मतः पुत्रानिष्ट्वा यज्ञैश्च शक्तितः ।
दृष्ट्वाऽपत्यस्य चापत्यं ब्राह्मणोऽरण्यमाविशेत् ॥

इति यमस्मृतौ ब्राह्मणग्रहणं त्रैवर्णिकोपलक्षणार्थम् उषित्वा तु गृहे द्विज इत्युपक्रमानुसारादिति पाराशर्यां माधवाचार्या अपि । एवमेव तु ।

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥

इति स्मृतिस्थं विप्रपदमपि त्रैवर्णिकोपलक्षकमित्यप्यविप्रतिपन्नं, तथा च यथा जायमानो हि ब्राह्मणस्त्रिधा ऋणवाँजायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी । इति श्रुतिस्थं ब्राह्मणपदं त्रैवर्णिकोपलक्षकम् ऋणत्रयस्य त्रैवर्णिकसाधारण्यादेवं ब्राह्मणाः प्रव्रजन्तीत्यादिसांन्यासिकविधिष्वपि ।

संमतश्चायमर्थः सुरेश्वराचार्याणामेकदण्डिनामपि यथोक्तं तैर्बृहदारण्यकवार्त्तिके ।

ब्राह्मणग्रहणं चात्र द्विजानामुपलक्षणम् ।
अविशिष्टाधिकारित्वात्सर्वेषामात्मबोधने ॥
त्रयाणामविशेषेण संन्यासः श्रूयते श्रुतौ ।
यदोपलक्षणार्थं स्याद् ब्राह्मणग्रहणं तदा ॥ इति,

मिताक्षराकारोऽपि ब्राह्मणपदस्योपलक्षणतापक्षमातस्थे । अन्ये तु त्रैवर्णिकानां प्रकृतत्वात् त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति सूत्रकारवचनाच्च द्विजातिमात्रस्याधिकार-माहुः । इति ब्रुवन् ।

तदेवं त्रैवर्णिकानां ब्रह्मक्षत्रविशामस्ति धर्म्यः संन्यासः । न चैवं सति क्षत्रविशोः संन्यासनिषेधपराणां पूर्वोक्तस्मृतीनां का गतिरिति शङ्क्यम् ।

सुखजानानामयं धर्मो वैष्णवं लिङ्गधारणम् ।
बाहुजातोरुजातानां त्रिदण्डं न विधीयते ॥

इति विशेषवचनेन क्षत्रविशोः संन्यासविधायकस्मृतिसूत्र-पुराणानुरोधेन त्रिदण्डधारणस्यैव प्रतिषिद्धत्वात् ।

सुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ।
बाहुजातोरुजातानां नायं धर्मो विधीयते ॥

इति स्मृत्यन्तरेऽपि नायं धर्मो विधीयते इत्यनेन त्रिदण्ड-धारणलक्षण एव धर्मो निषिषेधयिषितो न तु सामान्यतोदण्डमात्रमे-कदण्डधारणस्य क्षत्रविशोः पूर्वोक्तब्रह्माण्डपुराणादिवचनेन स्पष्टमव-गतेः । एतेन क्षत्रविशोः संन्यासनिषेधकवाक्यानां काषायदण्डधा-रणलक्षणलिङ्गनिषेधपरत्वाख्यानेन व्याख्यानं पाराशरीये माधवाचा-र्याणामपि सर्वथा हेयमेव । अथवा परमतोपन्यासमात्रं तन्न तु स्वाभिमतमिति ज्ञेयम् ।

सांन्यासिकं विधिं कृत्स्नं कारयित्वा विचक्षणः ।
ददौ तदैश्वरं ज्ञानं स्वशाखाविहितं व्रतम् ॥

इत्यादिपूर्वोक्तकौर्मवचनैः कात्स्न्येन पृथुपौत्रे सुशीले श्वेता-

श्वतरमुनिना सांन्यासिकविध्यनुष्ठापनाभिधानेन निषेधवाक्यानां विशिष्य निषिद्धचिदण्डपरताया एव न्याय्यत्वात् । अलिङ्गसंन्यासस्य शूद्रमात्राधिकारिकत्वेन चत्रविशोरशास्त्रीयत्वाच्च ।

यच्च स्मृतिकाराणां पुराणाचार्याणां च ।

चत्वारो ब्राह्मणस्योक्ता आश्रमा: श्रुतिचोदिता: ।
क्षत्रियस्य त्रय: प्रोक्ता द्वावेको वैश्यशूद्रयो: ॥

इत्यादि विशिष्य वर्णभेदेनाश्रमविशेषानुष्ठानस्य धर्म्यत्वपरिगणनं तदपि तेषुतेषु वर्णेषु नाश्रमान्तरस्याधर्म्मत्वाभिधानाय किन्तु वर्णभेदेन सत्त्वरजस्तम:प्रकृतिकतायाः प्रायो बहुवैचित्र्येण स्वस्वप्रकृत्यनुसारेण तत्तदाश्रमाणां तत्तद्वर्णेषु स्वनुष्ठानत्वमात्रतात्पर्येणैव । अत एव शान्तिपर्वणि राजधर्मप्रस्तावे वर्णाश्रमधर्मकथनावसरे त्रिषष्टितमाध्याये ब्राह्मणस्य विशेषतो वर्ज्यान्यभिधाय

तस्माद्धर्मो विहितो ब्राह्मणस्य दम: शैाचमार्जवं चापि राजन् !
तथा विप्रस्याश्रमा: सर्व एव पुरा राजन् ब्रह्मणा वै निसृष्टा: ॥
य: स्याद्दान्त: सोमपश्चार्यशील: सानुक्रोश: सर्वसहो निराशी: ।
ऋजुर्मृदुरनृशंस: क्षमावान् स वै विप्रो नेतर: पापकर्मा ॥

इति चाभिधाय ।

शूद्रं वैश्यं राजपुत्रं च राजन् ! लोका: सर्वे संश्रिता धर्मकामा: ।
तस्माद्वर्णान् शान्तिधर्मेष्वसक्तान् मत्वा विष्णुर्नेच्छति पाण्डुपुत्र ! ॥

इति युधिष्ठिरं प्रति भीष्म आह । अयमिहार्थ: तत्तदाश्रमधर्मानुष्ठानकामा ब्राह्मणा: स्थानपदेन स्थानिनिर्देशाल्लोकपदं लोकस्थपरमिति देवा विवक्ष्यन्ते, ततश्च सर्वाश्रमनिष्ठा ब्राह्मणास्तत्तल्लोकस्थदेवाश्च शूद्रं वैश्यं क्षत्रियं चापेक्षन्ते न हि ब्राह्मणा:

देवाश्च एतान् विना किमपि कर्तुं पारयन्ते ज्येष्ठाश्रमिभिरेतैरेव तेषां निर्वाहसम्भवात् ।

अत एव तु दण्डग्रहणनियते पारमहंस्ये धर्मावतारस्य युधिष्ठिरस्यासीत्सुदृढः संकल्पस्तथाऽपि चात्रधर्ममेवासेविष्ट स न । तु संन्यास्यदिति महाभारते स्मर्यते यथा ।

अथवैकोऽहमेकाहमेकैकस्मिन्वनस्पतौ ।
चरन् भैक्ष्यं मुनिर्मुण्डः क्षपयिष्ये कलेवरम् ॥ १ ॥
पांसुभिः समभिच्छन्नः शून्यागारप्रतिश्रयः ।
वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ॥ २ ॥
न शोचं न प्रहृष्यंश्च तुल्यनिन्दात्मसंस्तुतिः ।
निराशीर्निर्ममो भूत्वा निर्द्वन्द्वो निष्परिग्रहः ॥ ३ ॥
आत्मारामः प्रसन्नात्मा जडान्धबधिराकृतिः ।
अकुर्वाणः परैः काञ्चित्संविदं जातु कैरपि ॥ ४ ॥
जङ्गमाजङ्गमान्सर्वानविहिंसँश्चतुर्विधान् ।
प्रजाः सर्वाः स्वधर्मस्थाः समः प्राणभृतः प्रति ॥ ५ ॥
न चाप्यवहसन्कंचिन्न कुर्वन् भ्रुकुटीः क्वचित् ।
प्रसन्नवदनो नित्यं सर्वेन्द्रियसुसंयतः ॥ ६ ॥
अपृच्छन् कस्य चिन्मार्गं प्रव्रजन्नेव केनचित् ।
न देशं न दिशं काञ्चिद्गन्तुमिच्छन् विशेषतः ॥ ७ ॥
गमने निरपेक्षश्च पश्चादनवलोकयन् ।
ऋजुप्रणिहितो गच्छंस्त्रसस्थावरवर्जकः ॥ ८ ॥
स्वभावस्तु प्रयात्यग्रे प्रभवन्त्यशनान्यपि ।
द्वन्द्वानि च विरुद्धानि तानि सर्वाण्यचिन्तयन् ॥ ९ ॥

अल्पं वा स्वादु वा भोज्यं पूर्वालाभेन जातुचित् ।
अन्येष्वपि चरँल्लाभमलाभे सप्त पूरयन् ॥ १० ॥
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीतपात्रसंचारे काले विगतभिक्षुके ॥ ११ ॥
एककालं चरन्भैक्ष्यं त्रीनथ द्वे च पञ्च वा ।
स्नेहपाशं विमुच्याहं चरिष्यामि महीमिमाम् ॥ १२ ॥
अलाभे सति वा लाभे समदर्शी महातपाः ।
न जिजीविषुवत्किंचिन्न मुमूर्षुवदाचरन् ॥ १३ ॥
जीवितं मरणं चैव नाभिनन्दन्न च द्विषन् ।
वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः ॥ १४ ॥
नाकल्याणं न कल्याणं चिन्तयन्नुभयोस्तयोः ।
याः काश्चिज्जीवता शक्याः कर्त्तुमभ्युदयक्रियाः ॥ १५ ॥
सर्वास्ताः समभित्यज्य निमेषादिव्यवस्थितः ।
तेषु नित्यमसक्तश्च त्यक्तसर्वेन्द्रियक्रियः ॥ १६ ॥
अपरित्यक्तसंकल्पः सुनिर्णिक्तात्मकल्मषः ।
विमुक्तः सर्वसङ्गेभ्यो व्यतीतः सर्ववागुराः ॥ १७ ॥
न वशे कस्यचित्तिष्ठन्सधर्मा मातरिश्वनः ।
वीतरागश्चरन्नेवं तुष्टिं प्राप्स्यामि शाश्वतीम् ॥ १८ ॥
तृष्णया हि महत्पापमज्ञानादस्मि कारितः ।
कुशलाकुशलान्येके कृत्वा कर्माणि मानवाः ॥ १९ ॥
कार्य्यकारणसंश्लिष्टं स्वजनं नाम बिभ्रति ।
आयुषोऽन्ते प्रहायेदं क्षीणप्राणं कलेवरम् ॥ २० ॥
प्रतिगृह्णाति तत्पापं कर्त्तुः कर्मफलं हि तत् ।
एवं संसारचक्रेऽस्मिन् व्याविद्धे रथचक्रवत् ॥ २१ ॥

समेति भूतग्रामोऽयं भूतग्रामैश्च कार्य्यवान् ।
जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतम् ॥ २२ ॥
अपारमिव चास्वस्थं संसारं त्यजतः सुखम् ।
दिवः पतत्सु देवेषु स्थानेभ्यश्च महर्षिषु ॥ २३ ॥
को हि नाम भवेनार्थी भवेत्कारणतत्त्ववित् ।
कृत्वा हि विविधं कर्म तत्तद्विविधलक्षणम् ॥ २४ ॥
पार्थिवैर्नृपतिः स्वल्पैः कारणैरेव बध्यते ।
तस्मात्प्रज्ञामृतमिदं चिरान्मां प्रत्युपस्थितम् ॥ २५ ॥
तत्प्राप्य प्राप्रये स्थानमव्ययं शाश्वतं ध्रुवम् ।
एतया सततं धृत्या चरन्नेवंप्रकारया ॥ २६ ॥
जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतम् ।
देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः ॥ २७ ॥ इति,

तदनेन प्रबन्धेन स्पष्टं ब्राह्मणस्येव क्षत्रियस्यापि चतुर्थाधिकारिता सति तीव्रवैराग्ययोगे संन्यासनियतसर्वधर्मोपेता सिध्यति । प्रकृतमनुसरामः देवाश्चापि यज्ञभुज इति तानेव त्रीन् वर्णान् गृहिणोऽपेक्षन्ते तान् विना तेषां क्षणमात्रमप्यनिर्वाहात् । तथाऽऽह मनुः तस्माज्ज्येष्ठाश्रमोगृही । इति तस्मात् । यत एते गृहिणो वर्णास्ततः शान्तिधर्मेषु शान्तिप्रधानवानप्रस्थसंन्यासाद्याश्रमेषु । असक्तान् स्वभावतोऽप्रसक्तान् मत्वा विष्णुस्सर्वलोकपालनगृहीतभारस्तेषां गृहस्थाश्रमातिरिक्तं वानप्रस्थादि नेच्छति नानुमन्यते लोकभरणभङ्गभियेति तात्पर्यार्थः । यदि क्षत्रियवैश्यशूद्रा अपि प्रसक्ताः शान्त्याश्रमेषु तर्हि लोकयात्रैव न स्यादिति तु परमतात्पर्यम् । अत एव त्विहैव ।

अल्पं वा स्वादु वा भोज्यं पूर्वालाभेन जातुचित् ।
अन्येष्वपि चरँल्लाभमलाभे सप्त पूरयन् ॥ १० ॥
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीतपात्रसंचारे काले विगतभिक्षुके ॥ ११ ॥
एककालं चरन्भैक्ष्यं त्रीनथ द्वे च पञ्च वा ।
स्नेहपाशं विमुच्याहं चरिष्यामि महीमिमाम् ॥ १२ ॥
अलाभे सति वा लाभे समदर्शी महातपाः ।
न जिजीविषुवत्किंचिन्न मुमूर्षुवदाचरन् ॥ १३ ॥
जीवितं मरणं चैव नाभिनन्दन्न च द्विषन् ।
वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः ॥ १४ ॥
नाकल्याणं न कल्याणं चिन्तयन्नुभयोस्तयोः ।
याः काश्चिज्जीवता शक्याः कर्तुमभ्युदयक्रियाः ॥ १५ ॥
सर्वास्ताः समभित्यज्य निमेषादिव्यवस्थितः ।
तेषु नित्यमसक्तश्च त्यक्तसर्वेन्द्रियक्रियः ॥ १६ ॥
अपरित्यक्तसंकल्पः सुनिर्णिक्तात्मकल्मषः ।
विमुक्तः सर्वसङ्गेभ्यो व्यतीतः सर्ववागुराः ॥ १७ ॥
न वशे कस्यचित्तिष्ठन्सधर्मा मातरिश्वनः ।
वीतरागश्चरन्नेवं तुष्टिं प्राप्स्यामि शाश्वतीम् ॥ १८ ॥
तृष्णया हि महत्पापमज्ञानादस्मि कारितः ।
कुशलाकुशलान्येके कृत्वा कर्माणि मानवाः ॥ १९ ॥
कार्य्यकारणसंश्लिष्टं स्वजनं नाम बिभ्रति ।
आयुषोऽन्ते प्रहायेदं क्षीणप्राणं कलेवरम् ॥ २० ॥
प्रतिगृह्णाति तत्पापं कर्त्तुः कर्मफलं हि तत् ।
एवं संसारचक्रेऽस्मिन् व्याविद्धे रथचक्रवत् ॥ २१ ॥

समेति भूतग्रामोऽयं भूतग्रामेण कार्य्यवान् ।
जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतम् ॥ २२ ॥
अपारमिव चास्वस्थं संसारं त्यजतः सुखम् ।
दिवः पतत्सु देवेषु स्थानेभ्यश्च महर्षिषु ॥ २३ ॥
को हि नाम भवेनार्थी भवेत्कारणतत्त्ववित् ।
कृत्वा हि त्रिविधं कर्म तत्त्रिविधलक्षणम् ॥ २४ ॥
पार्थिवैर्नृपतिः स्वल्पैः कारणैरेव बध्यते ।
तस्मात्प्रज्ञामृतमिदं चिरान्मां प्रत्युपस्थितम् ॥ २५ ॥
तत्प्राप्य प्रार्थये स्थानमव्ययं शाश्वतं ध्रुवम् ।
एतया सततं धृत्या चरन्नेवंप्रकारया ॥ २६ ॥
जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतम् ।
देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः ॥ २७ ॥ इति,

तदनेन प्रबन्धेन स्पष्टं ब्राह्मणस्येव क्षत्रियस्यापि चतुर्थाधिकारिता सति तीव्रवैराग्ययोगे संन्यासनियतसर्वधर्मोपेता सिध्यति । प्रकृतमनुसरामः देवाश्चापि यज्ञभुज इति तानेव त्रीन् वर्णान् गृहिणोऽपेक्षन्ते तान् विना तेषां क्षणमात्रमप्यनिर्वाहात् । तथाऽऽह मनुः तस्माज्ज्येष्ठाश्रमो गृही । इति तस्मात् । यत एते गृहिणो वर्णास्ततः शान्तिधर्मेषु शान्तिप्रधानवानप्रस्थसंन्यासाद्याश्रमेषु । असक्तान् स्वभावतोऽप्रसक्तान् मत्वा विष्णुस्सर्वलोकपालनगृहीतभारस्तेषां गृहस्थाश्रमातिरिक्तं वानप्रस्थादि नेच्छति नानुमन्यते लोकभरणभङ्गभियेति तात्पर्यार्थः । यदि क्षत्रियवैश्यशूद्रा अपि प्रसक्ताः शान्त्याश्रमेषु तर्हि लोकयात्रैव न स्यादिति तु परमतात्पर्यम् । अत एव त्विहैव ।

लोके चेदं सर्वलोकस्य न स्याच्चातुर्वर्ण्यं वेदवादाश्च न स्युः ।
सर्वाश्चेज्याः सर्वलोकक्रियाश्च सद्यः सर्वे चाश्रमस्था न वै स्युः ॥

यमवलम्बमानेषु चातुर्वर्ण्यं वेदवादा यागा लौकिक्यः क्रियाः अष्टादशव्यवहारपदादिरूपाः किमु बहुना सर्वे चाश्रमस्था न वै स्युः आश्रमस्थानां जन्मग्रह एव चेद् गृहिणां प्रसादेन तर्हि आश्रमस्थाभावे कुत्राश्रमकथाऽपि ततश्च ।

देहेन्द्रियमनः प्राणाञ्जनानामसृजत्प्रभुः ।
आत्मार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥

इति श्रीमद्भागवतोक्तं जगदिदमनन्तविविधोच्चावचात्मकं सिसृक्षोर्भगवतः सृष्टेःप्रयोजनमेवोच्छिन्द्यात् । स्याच्च जन्माभावे अनिर्मोक्ष इति बहु व्याकुलीस्यात् । तस्माद् ब्राह्मणानामेव प्रायस्तुरीयाश्रमाद्यधिकारिता । न तु क्षत्रियवैश्यादीनामनधिकारः संन्यासे, यथोक्तमिहैवानन्तरश्लोके ।

यश्च त्रयाणां वर्णानामिच्छेदाश्रमसेवनम् ।
चातुराश्रम्यदृष्टांश्च धर्मांस्तान् शृणु पाण्डव ! ॥

अयमर्थः त्रयाणां क्षत्रविट्छूद्राणां वर्णानां मध्ये यः कश्चन जायमानं हि यं पुरुषं प्रपश्येन्मधुसूदनः । इत्युक्तरीत्या भगवदङ्गीकृतः पुरुषधौरेयः आश्रमसेवनं चातुराश्रम्यसेवनं कर्तुमिच्छेत् । चातुराश्रम्यदृष्टान् चातुराश्रम्ये अनुष्ठेयत्वेनोक्तान् धर्मान् कर्तुमिच्छेदिति पूर्वेणान्वयः । ततश्च क्षत्रविट्शूद्रेषु यथाऽधिकारं यो न्यसितुमिच्छेतस्याधिकारं त्वं शृणु इत्यर्थः ।

यथाऽऽह भीष्मो धर्मविदांवरः ।
शुश्रूषोः कृतकार्यस्य कृतसन्तानकर्मणः ।
अभ्यनुज्ञातराजस्य शूद्रस्य जगतीपते ! ॥
अल्पान्तरगतस्यापि दशधर्मगतस्य वा ।
आश्रमा विहिताः सर्वे वर्जयित्वा निराशिषम् ॥
भैक्ष्यचर्यां ततः प्राहुस्तस्य तद्धर्मचारिणः ।
तथा वैश्यस्य राजेन्द्र ! राजपुत्रस्य चैव हि ॥
कृतकृत्यो वयोऽतीतो राज्ञः कृतपरिश्रमः ।
वैश्यो गच्छेदनुज्ञातो नृपेणाश्रमसंश्रयम् ॥
वेदानधीत्य धर्मेण राजशास्त्राणि चानघ ! ।
सन्तानादीनि कर्माणि कृत्वा सोमं निषेव्य च ॥
पालयित्वा प्रजाः सर्वा धर्मेण वदतांवर ! ।
राजसूयाश्वमेधादीन् मखानन्यांस्तथैव च ॥
आनयित्वा यथापाठं विप्रेभ्यो दत्तदक्षिणः ।
संग्रामे विजयं प्राप्य तथाऽल्पं यदि वा बहु ॥
स्थापयित्वा प्रजापालं पुत्रं राज्ये च पाण्डव ! ।
अन्यगोत्रप्रशस्तं वा क्षत्रियं क्षत्रियर्षभ ! ॥
अर्चयित्वा पितॄन् सम्यक् पितृयज्ञैर्यथाविधि ।
देवान् यज्ञैर्ऋषीन् वेदैरर्चयित्वा तु यत्नतः ॥
अन्तकाले च संप्राप्ते य इच्छेदाश्रमान्तरम् ।
सोऽनुपूर्व्याऽऽश्रमान् राजन् ! गत्वा सिद्धिमवाप्नुयात् ॥
राजर्षित्वेन राजेन्द्र ! भैक्षचर्यां न सेवया ।
अपेतगृहधर्मोऽपि चरेज्जीवितकाम्यया ॥ इति,

अनेन ग्रन्थेन स्पष्टं न्यासः सिध्यति, अयं पुनर्विशेषो यच्छूद्रस्यालिङ्गः काषाय-दण्डरहितः पुराणेतिहासादिद्वारा आत्मश्रवणौपयिकः संन्यासः, क्षत्रविशोस्तु पूर्वोक्तरीत्या सलिङ्ग एकदण्डकमण्डल्वादिसहितः भैक्ष्यन्तु सर्वेषां समानमात्मधारणेन श्रवणौपयिकत्वात् । अयं चापरो विशेषो यत्क्षत्रियस्य नानुष्ठानापेक्षा दण्डग्रहणे । विशस्तु क्षत्रियानुष्ठानमावश्यकं दण्डग्रहे । शूद्रस्य चालिङ्गोऽपि न्यासः क्षत्रियाद्यनुष्ठानेनैव सिध्यतीति, अत्र शूद्रप्रमुखसंन्यासाभिधानेन क्षत्रविशोः संन्यासस्य कैमुतिकसिद्धत्वमप्यावेद्यते भीष्मेण वदतांवरेणेत्यपि सुसूक्ष्ममीक्ष्यताम् ।

अयं चापरोविशेषो यन्मुमुक्षोर्ब्राह्मणस्य यथा श्रवणेऽतिशयाधानहेतुत्वेन संन्यासानुष्ठानमपेक्ष्यते न तथा क्षत्रादीनां, यथा इहैवाह समनन्तरं भीष्मः ।

न चैतन्नैष्ठिकं कर्म त्रयाणां भूरिदक्षिण ! ।

त्रयाणां क्षत्रविट्शूद्राणामेतत् संन्यासरूपं कर्म न नैष्ठिकम् । न नित्यं किन्तु सर्वथा वैराग्ये सत्येव तेषामधिकारो ब्राह्मणानां त्वल्पवैराग्यभाजामप्यधिकारः अत एव क्षत्रियादयो हंसपरमहंसयोरेवाधिकारिणो न तु कुटीचकबहूदकयोस्तयोरल्पवैराग्ययोगिपुरुषाधिकारकत्वात्, सति तु गृहस्थाश्रमे वेदान्तश्रवणस्य सर्वथा व्यवधाने कुटीचकबहूदकयोरपि क्षत्रियादयो भवन्त्यधिकारिणो नान्यथेति तु परमार्थः ।

यदि क्षत्रियस्य न्यासो न नित्यस्तर्हि किं तदस्ति यन्नित्यमाराध्यं क्षत्रियस्येति युधिष्ठिरजिज्ञासायामाह भीष्मः ।

चतुर्णां राजशार्दूल ! प्राहुराश्रमवासिनाम् ।
याह्वायत्तं क्षत्रियैर्मानवानां लोकश्रेष्ठं धर्ममासेवमानैः ।
सर्वे धर्माः सोपधर्मास्त्रयाणां राज्ञो धर्मादिति वेदाच्छृणोमि ॥
यथा राजन् ! हस्तिपदे पदानि संलीयन्ते सर्वसत्त्वोद्भवानि ।
एवं धर्मान् राजधर्मेषु सर्वान् सर्वावस्थं संप्रलीनान्निबोध ॥
अल्पश्रमानल्पफलान् वदन्ति धर्मानन्यान् धर्मविदो मनुष्याः ।
महाश्रयं बहुकल्याणरूपं क्षात्रं धर्मं नेतरं प्राहुरार्याः ॥
सर्वे धर्मा राजधर्मप्रधानाः सर्वे वर्णाः पाल्यमाना भवन्ति ।
सर्वस्त्यागो राजधर्मेषु राजँस्त्यागं धर्मं चाहुरग्र्यं पुराणम् ॥
मज्जेत् त्रयी दण्डनीतौ हतायां सर्वे धर्माः प्रक्षयेयुर्विबुद्धाः ।
सर्वे धर्माश्चाश्रमाणां हताः स्युः क्षात्रे त्यक्ते राजधर्मे पुराणे ॥
सर्वे त्यागा राजधर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु चोक्ताः ।
सर्वा विद्या राजधर्मेषु युक्ताः सर्वे लोका राजधर्मे प्रविष्टाः ॥
यथा जीवाः प्राकृतैर्वध्यमाना धर्मश्रुतानामुपपीडनाय ।
एवं धर्मा राजधर्मैर्वियुक्ताः सञ्चिन्वन्तो नाद्रियन्ते स्वधर्मम् ॥ इति,

अयमिहार्थः—धर्मतः प्रजाः पालयतां राज्ञां तत्तद्वर्णधर्मरक्षकतया तत्तदाश्रमधर्मरक्षकतया च सर्ववर्णाश्रमधर्मभाजः सर्ववर्णाः सर्वाश्रमाश्च क्षत्रिया इति किं तेषामुत्कटवैराग्ययोगं विना आश्रमान्तरगवेषणया एवमेव तु ।

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः ।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ॥

इत्यष्टमेऽध्याये मनुरमन्यत, अत एव त्विह ।

सर्वे धर्माः सोपधर्मास्त्रयाणां राज्ञो धर्मादित्युक्तम् ।

धर्मादिति ल्यब्लोपे पञ्चमी, ततश्च राज्ञो धर्ममपेक्ष्य त्रयाणां ब्रह्मविट्शूद्राणां ये धर्मास्ते क्षत्रियस्य सोपधर्मा उपसर्जनीभूता यतः स सर्वधर्मरक्षकतया स्वधर्मेण प्रधानेन सह सर्वधर्मभागित्यर्थः । अत एव त्विह भीष्मेण अन्यधर्माणामल्पाश्रयत्वमल्पफलत्वं चाभिधाय क्षात्रधर्मस्य महाश्रयत्वं बहुकल्याणरूपत्वं चोक्तम् ।

महाश्रयं बहुकल्याणरूपं क्षात्रं धर्मं नेतरं प्राहुरार्याः । इति,

न्याय्यं चैतत् क्षात्रधर्मोपघाते त्रयीधर्मविलोपेन सर्वधर्मविप्रलोपसम्भवात् । इदमेवाभिप्रेत्योक्तम्—

मज्जेत् त्रयी दण्डनीतौ हतायां सर्वे धर्माः प्रक्षयेयुर्विबुद्धाः । इत्यादि, तस्मात् स्मृतिपुराणादिषु । क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोः । इति यदाश्रमाभिधानं न तत्परिसंख्यानाय इतोऽन्ये तेषामाश्रमा न भवन्तीत्यभिप्रायेण किन्तु ब्रह्मणा परमेश्वरेण तेषामन्ये प्रजापालनादयो धर्मा अनुष्ठेयत्वेन निर्दिष्टा इति परमवैराग्ययोगं विना तैस्त एवोपासितव्या न तु सत्त्वबहुलपुरुषानुष्ठेयाः संन्यासादय इति तात्पर्यम् । तस्माच्छ्रुतिस्थस्य मानवशास्त्रस्थस्य च ब्राह्मणपदस्य संन्यासोपयिकब्राह्मण्यवत्परतया त्रैवर्णिकोपलक्षकतया वा संन्यासेन द्विजोत्तमः । इति स्मृतिस्थस्य द्विजोत्तमशब्दस्य च द्विजेषु यः सत्त्वबाहुल्यादिविशिष्टस्तत्परतया च सर्वेषां विधिनिषेधशास्त्राणामर्थवत्तया साधु प्रसाधिताः क्षत्रियादीनां संन्यासान्ता आश्रमा धर्म्या इति ।

अयमत्र श्रुतिस्मृत्याद्यभिमतः सुव्यवस्थितार्थः सम्भवत्स्वाहजिकसत्त्वसम्पत्तिकानां ब्राह्मणानां मुख्यस्त्रिदण्डपक्षः । सम्भव-

त्साहचिह्नरत्नोपिप्लुतिकानां प्रजानुरञ्जननिर्भराणां राजन्यानां विशां च तीव्रवैराग्ये एकदण्डः, युगान्तरे स्त्रीणामप्येकदण्डः । स्त्रीणां चैके इति बोधायनेन प्रव्रज्यास्मरणात् । ये तु पुनर्ब्राह्मणा अप्यपक्वकषाया विप्लुतप्रकृतयस्ते पुनरेकदण्ड एवाधिक्रियन्ते । ये तु क्षत्रियाः वैश्या द्विजस्त्रियोऽपि च क्षालितान्तःकरणकषायाः परिपक्वमतयो भगवन्निष्ठास्तेऽपि च त्रिदण्डाधिकारिणः, अत एव महाभारते शान्तिपर्वणि तत्रतत्र सुलभाजनकसंवादादौ त्रिदण्डिमहिमनिर्देशपुरस्सरं क्षत्रजातीयस्त्रीणामपि त्रिदण्डधारणाधिकृतिरवगम्यते तद्यथा ।

तया जगदिदं सर्वमटन्त्या मिथिलेश्वरः ।
तत्रतत्र श्रुतो मोक्षे कथ्यमानस्त्रिदण्डिभिः ॥

इति स्पष्टमेव मोक्षकथाप्रधानेभ्यस्त्रिदण्डिभ्यो जनकनामश्रवणस्य सुबहुमानास्पदत्वाम्नानम् । एवमेव तु तत्रैव प्रकरणे जनकराजोऽपि कथाप्रस्तावेन सुलभामाह ।

सुखी सोऽहमवाप्तार्थः समलोष्टाश्मकाञ्चनः ।
मुक्तसङ्गः स्थितो राज्ये विशिष्टोऽन्यैस्त्रिदण्डिभिः ॥

इति स्वस्यान्यैस्त्रिदण्डिभिर्वैशिष्ट्यं बहुमानास्पदमिति मेने ।

त्रिदण्डिषु अवाप्तसमस्तार्थतायाः परमात्मतत्त्वज्ञानेन सुखितायाः समलोष्टाश्मकाञ्चनतया मुक्तसङ्गत्वस्य च सौलभ्यसंभवात् । कदाचित्तु वैराग्यपरिपाकभाजां देहात्माध्यासविधुराणां केषांचिन्मान्यतमानां त्रिदण्डग्रहणानन्तरं तस्य त्यागेऽप्यनुमन्यते । अत एव महाभारते सुलभाजनकमहाराजौ समुद्दिश्य भीष्मः परमधर्ममर्मज्ञोयुधिष्ठिरमाह ।

तदेकस्मिन्नधिष्ठाने संवादः श्रूयतामयम् ।
छत्रादिषु विमुक्तस्य मुक्तायाश्च त्रिदण्डके ॥ इति,

अथ राजचिह्नैश्छत्रादिभिर्विमुक्तो जनकमहाराजः । त्रिदण्डविनिर्मुक्ता तु सुलभा, ततश्च त्यागस्य ग्रहणपूर्वकत्वेन सुलभायाः क्षत्रियकुमारिकाया अपि विशिष्टाधिकारबलेन त्रिदण्डपरिग्रहस्तत्परित्यागश्चेति द्वयं स्फुटं सिध्यति अन्यथा मुक्तायाश्च त्रिदण्डके इत्यभिधानं कथं सङ्गच्छताम् । न हि विशिष्टाधिकारिण्यास्तस्या आन्तरत्रिदण्डविनिर्मुक्तिकथनं सम्भाव्येतापि येन तथार्थमभिधायैवानर्थकथनेन कृतकार्यः स्याः ।

एतेन पराशरस्मृतिभाष्ये माधवाचार्याणां सर्वे चैव त्रिदण्डिनः इत्यत्रिस्मृतेर्वाग्दण्डमनोदण्डकर्मदण्डात्मकान्तरदण्डपरत्वेन अत्रिस्मृत्यर्थकदर्थनमप्यपास्तम् । सर्वत्र स्मृतीतिहासपुराणादौ महात्मनामान्तरत्रिदण्डिनां वहिरपि धर्म्ययष्टित्रयस्य धार्यत्वाभिधानात् । अत एवं पितामहः ।

परः परमहंसस्तु तुर्याख्यः श्रुतिरब्रवीत् ।
यमैश्च नियमैर्युक्तो विष्णुरूपी त्रिदण्डधृक् ॥ इति,

न चेहापि त्रिदण्डपदेन वाग्दण्डादित्रयं सुग्रहं तथा सति बाह्यान्तरेन्द्रियनिग्रहरूपाणां यमनियमानां यमैश्च नियमैर्युक्त इत्यनेनैवाभिधाने पौनरुक्त्यापातात् ।

न च तत् त्रिदण्डपदार्थस्वरूपनिरूपणपरमेवाभिधानमितिवाच्यम् । तथा सति यमैश्चेति चकारासाङ्गत्यप्रसङ्गात् । नियमापेक्षया यमेषु चकारार्थसङ्गमनं तु दुर्धिषणतामेवावेदयेत् । तथा सति नियमैश्चेति वक्तव्ये प्रथमत एव यमैश्चेति चकारोपादानवैयर्थ्यात् । विस्तरेण चैतदुपपादितमिहैवान्यत्र स्वावसरे इत्युपरम्यते ।

यदपि वैष्णववैष्णवत्रिदण्डस्य स्मार्तत्वाख्यानमुखेन कुटीचकबहूदकमात्रपरत्वसमर्थनं तत्तु श्रुतिस्मृतिवचनानां स्वरूपतोऽर्थ-

तस्चानवबोधविजृम्भितं मैत्रायणीयश्रुतौ इन्द्रस्य वज्रोऽसीति त्रीन् वैणवान् दण्डान् दक्षिणे पाणौ धारयेदेकं वेत्यादिना स्पष्टमेव श्रुतौ वैणवत्रिदण्डस्य धार्यत्वाभिधानेन स्मार्तत्वोक्तेरबोधोपहतत्वात् । यच्च त्रिदण्डस्य कुटीचकबहूदकधार्यत्वाभिधानं तत्तु युक्तमेव हंसपरमहंसपर्यन्तानां न्यासिनामेककण्ठेन हारीतदत्तात्रेयपितामहैः ।

वृत्तिभेदेन भिन्नास्च नैव लिङ्गेन ते द्विजाः ।
लिङ्गं तु वैणवं तेषां त्रिदण्डं सपवित्रकम् ॥

इत्येकलक्षणाभिधानेन वैणववैष्णवत्रिदण्डस्य मुख्यत्वेनाख्यानात्, अत एव तु दक्षः सर्वानेव चतुर्थाश्रमिणो लिलक्षयिषुरेकदण्डस्य ब्रह्मचारिलक्षणत्वमभिधाय वैणवत्रिदण्डस्य न्यासिसामान्यलक्षणतां चाख्याय ।

यस्यैतल्लक्षणं नास्ति स पाखण्डी न चाश्रमी ।

इति वैणवत्रिदण्डलक्षणवैधुर्ये पाखण्डित्वमाचक्षाणश्चतुर्थाश्रमित्वव्यतिरेकमबूबुधन्न चाश्रमीति सुस्फुटमभिब्रुवन् । एतेन तत्र परमहंसा नाम त्रिदण्डजलपवित्रयज्ञोपवीतशिक्यान्तर्वासधारिणः । इति पराशरस्मृतेरदर्शनेनाप्रामाण्यसमर्थनं तद्घूकानवलोकनेन भास्करासत्त्वसमर्थनप्रायं त्वदीयग्रन्थेष्वेव त्वया प्रमाणत्वेनाङ्गीकृतासु पञ्चषासु स्मृतिषु चतुर्णामपि न्यासिनां वैणवत्रिदण्डस्य धार्यत्वाभिधानेन परमहंसस्य तद्धार्यत्वसिद्धेर्विदुषामकौतस्कुतास्पदत्वात् ।

त्वदभिमताः स्मृतयो हि न केवलं परमहंसानां त्रिदण्डधारणमात्रं विदधते किं त्वतादृशां पाखण्डित्वाख्यानेन अनाश्रमित्वमपीति किमस्ति मूलं येन पराशरस्मृतेः परमहंसस्य त्रिदण्डविधायिकायाः अप्रामाण्यं समूहसे । प्रत्यक्षश्रुतिविरुद्धार्थाभिधायि-

त्वेनाप्रामाण्यशङ्कनमपि मितमतित्वमेवाविदयेदिति न तदपि प्राचु-तापरिचायकं तासां तदतात्पर्यकत्वस्यास्माभिस्तत्रतत्र बहुधोप-पादित्वात् ।

किंच यथा न हिंस्यात्सर्वाभूतानि नानृतं वा वदेत् क्वचि-दिति श्रुतिः सर्वभूतहिंसां सर्वथाऽनृतभाषणं च प्रतिषेधन्ती वार्ध्रीणस-मात्स्य-हारिण-औरभ्र-शाकुन-च्छाग-पार्षतैणरौरव-वाराह-शाश-मांसैः पितॄणां कालविशेषनियतां* तृप्तिं बोधयन्ती-भिर्मान्वादिस्मृतिभिर्विषयविशेषे व्यवस्थाप्यते । सङ्कोच्य व्यव-स्थाप्यते च ।

विवाहकाले रतिसम्प्रयोगे प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थेऽप्यनृतं वदेत्पञ्चानृतान्याहुरपातकानि ॥

इति स्मृत्यनुरोधेन अनृतपञ्चकातिरिक्तानृतभाषणे चानृतव-दनवर्जननिषेधश्रुतिः । न हि श्राद्धे एतैरामिषैः पितॄणामेतावती तृप्तिरिति बोधिका श्रुतिर्मन्वाद्यतिरिक्तप्रेर्दृष्टा श्रुता वा, न वाऽनृत-पञ्चकातिरिक्तानृतभाषणप्रत्यवायव्यवस्थापनपरा श्रुतिरुपलब्धा कर्णा-कर्णिकतयाऽऽकर्णि वा अनृषिणा, तथाऽपि स्मृतिः श्रुत्यर्थव्यवस्था-पनेन श्रुतिं निषेवते एवेत्यङ्गीक्रियते एवमेव परमहंसानामेकदण्डं चोदयन्त्यः श्रुतयः स्मृतिभिर्विषयविशेषे व्यवस्थाप्यन्ते एवमेव च ।

उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते ।
एकमेव यतीनां स्यादिति शास्त्रविनिर्णयः ॥

इत्यादि स्मृत्यनुसारेण बहिःसूत्रं त्यजेदित्यादिश्रुत्यर्थोऽपि व्यवस्थाप्य इति क्वास्ति विरोधगन्धोऽपि येन स्मृतेरप्रामाण्यमाशङ्क्येत

* अत्रत्यं विस्पष्टमर्थमहिंसासंदर्भे निरूपयिष्यामः ।

श्रुत्यर्थे परतन्त्रदृष्टीनामस्माकं स्मृत्यनुसारेणैव श्रुत्यर्थस्य वक्तव्यतया नाणुमपि विरोधमीक्षामहे येन स्मृतिरनपेक्षणीया स्यात् । श्रुत्यर्थव्यवस्थापनं हि स्मृतीतिहासपुराणानां परमं कृत्यमन्यथा मन्दमतीनां श्रुत्यर्थावगतिरेव न सिद्ध्येद् यथाऽऽह भगवान् व्यासः ।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ इति,

एतेन परमहंसस्य शिखासूत्रादिसत्त्वबोधकस्मृतीतिहासपुराणानामनवलोक्यैवार्थं प्रत्यक्षश्रुतिविरोधाद् बुद्धादिस्मृतितुल्यत्वमुत्प्रेक्षमाणा एकदण्डिनः *कल्पतरुकारप्रभृतयोऽपि दूरपरास्ताः । श्रुतिमुपसेवमानासु स्मृतिषु† विरोधस्यैवाभावात् । न ह्यविरोधे बाध्यबाधकभावं कश्चिदाचक्षीत । तस्माच्छ्रुत्यर्थव्यवस्थापनतात्पर्येण प्रवृत्तासु सतीषु तपस्विनीषु स्मृतिषु आत्मौपम्येन मिथ्यैव श्रुतिव्यभिचरितार्थाभिधानदुश्चरित्रसमुद्भावनम् ।

किंच यदि परमहंसस्य शिखासूत्रकर्मादित्यागस्त्रिदण्डादित्यागश्च यथाश्रुतार्थानुरोधेन मन्येत तर्हि अनुष्ठानभूयिष्ठे त्रिदण्डे कोऽनुषज्येत । जनो हि स्वभावतः कर्मपराङ्मुखवृत्तिरलसो नास्तिकश्चेति स्वनुष्ठाने एकदण्डे शिखासूत्रादित्यागपुरस्सरे एव प्रवर्तेत । अत एव तु पौराणिकाः परमहंसशिरोमणेर्जडभरतस्योपवीतं स्मरन्ति ।

तथा हि पुराणाचार्यो व्यासः श्रीमद्भागवते ।
कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः ।
कस्यासि कुत्रत्य इहासि कस्मात्क्षेमाय नश्चेदसि नोत शुक्लः ॥

* अत्रत्यमवशिष्टं स्नेहपूर्तिमहानिबन्धे वक्तव्यमित्युपेक्षामहे ।
† स्मृत्यनपेक्षाधिकरणं तु पृथगर्थमिति भावः ।

इति, अयमर्थः । निगूढोविशेषतोऽनभिलक्षितवर्णाश्रमाचारस्त्वं कोवा विचरसि, द्विजानां दत्तात्रेयादीनां मध्ये त्वं कतमोऽवधूतः स्वरूपसंदेहेऽपि द्विजत्व तु न संदेहः, यतः सूत्रमुपवीतं बिभर्षि। एतेनावधूतानां दत्तात्रेयादीनामपि शिखासूत्रादिसिद्धिः । अतो विशेषतो ब्रूहि त्वं कस्य पुत्रोऽसि कुतत्यः किंदेशवास्यसि । इहास्मिन् स्थानेऽपि कस्माद्धेतोरागतोऽसि । यः कोऽपि भवेयं किमनेन तव प्रश्नसंरम्भेणेत्यत आह । क्षेमायेति । नोऽस्माकं क्षेमाय चेदिह प्राप्तोऽसि तर्हि किं शुक्रः शुद्धसत्त्वमूर्तिः कपिलोऽसि शुद्धसत्त्वमूर्त्तयो भागवता हि गृहमागत्यापि गृहिणोऽनुगृह्णन्ति किमु मध्ये मार्गे मिलितस्यानुग्रहपारवश्यसम्भावनेति रहूगणोऽज्ञातभरतरहस्यो भगवन्तं भरतमिदमाह । स्फुटमिदमेतेन यत्कण्ठमावेष्ट्य फूत्कुर्वन्तं कृष्णसर्पं ये न द्विषन्ति न चापनयन्ति सन्तस्ते कथमुपवीतमेवाकस्माद् विष्णुद्विषाणा वा ऽपनयेयुरिति, किन्तु न तेऽभिमानभाजो गृहस्था इवोपवीते यथा हि गृहस्थाः श्लक्ष्णयज्ञोपवीताः परिमृष्टसुपुष्टदेहा भवन्त्यभिमानभाजो न तथा भरताद्या ब्रह्मदृष्टयो भागवताः । अत एव तु वैष्णवे पुराणरत्ने भगवता पराशरेणापि भगवन्तं भरतमुद्दिश्य ।

आत्मनोऽधिगतज्ञानोदेवादीनि महामुने! ।
सर्वभूतान्यभेदेन स ददर्श महामतिः ॥ इति सस्मरे ।

तस्मात्सत्यपरमहंसानां जडभरतादीनां कण्ठेऽपि चेदुपवीतं तर्हि देहात्माभिमानभाजां कृत्रिमपरमहंसानां त्रिदण्डत्यागमात्रेण वा एकदण्डग्रहणमात्रेण वा शिखायज्ञोपवीतत्यागेन कर्ममात्रद्वेषेण वा जडभरतादिदृष्टान्तावष्टम्भेन पारमहंस्यं नाटयतां कर्मत्यागमात्रेण साध्वनुष्ठितं पारमहंस्यमिति सन्तोऽभिदधतोऽपि सङ्कुचन्ति ।

तस्माच्छिखासूत्रादिमन्तस्त्रिदण्डा ब्राह्मणेषु मुख्याः परमहंसाः । क्षत्रिय-वैश्येषु तु एकदण्डा एव मुख्याः परमहंसाः । ते च ब्राह्मण-क्षत्रियाः संन्यस्यन्तः कृतत्रेतादिषु युगेषु यत्यादिपदेन व्यपदिष्टा अभूवन् न तु तेषामननुरूपेण स्वामिपदेन ।

दण्डिनः स्वामिन इति न वाच्याः ।

इदानीन्तनानामनिपुणमतीनां गृहस्थानां यतिषु महात्मसु वीतसर्वरागेषु संसारिकपदार्थजातेष्वहम्ममाभिमानसम्बन्धगन्धशून्येष्वकिञ्चनेषु स्वामिपदव्यवहारस्तु तेषां महात्मनामननुरूपो वैरूप्यावह एव सर्वथा, ये हि सर्वमवहेल्य गृहापत्यकलत्राणि तृणाय मन्यमानास्समुपेक्षमाणाश्च वस्तुतो निःस्वाः पर्य्यव्राजिषुः ते कथं स्वामिनो भवन्ति यथाऽऽह विश्वेश्वरपद्धतौ भगवानत्रिः ।

कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम् ।
पादुके चापि गृह्णीयात्कुर्य्यान्नान्यस्य संग्रहम् ॥
यदि वा कुरुते रागादधिकस्य परिग्रहम् ।
नरकं रौरवं गत्वा तिर्य्यग्योनिषु जायते ॥
कौपीनं युगलं कन्था दण्ड एकः परिग्रहः ।
यतेः परमहंसस्य नाधिकं तु विधीयते ॥
शीर्णानि चामलान्येव चेलानि ग्रथितानि तु ।
कृत्वा कन्थां बहिः सोऽपि धारयेद्धातुरञ्जिताम् ॥ इति,

स्पष्टमिदमेतेन यत्कन्थादण्डपरिग्रहा महात्मानो यतयो निष्परिग्रहा न स्वामिनो भवितुमर्हन्ति नापि कृतस्वात्मसमर्पणानां गृहस्थानाम्भक्तिनिबन्धनोऽपि तादृशव्यवहारस्तेषु सम्भवी तदीयाग्रममानहानिहेतुत्वात्स्वामिपदव्यवहारस्य, एवञ्च ते निःस्वा भिक्षव

आत्मनिष्ठा यतयस्संन्यासिनश्चतुर्थाश्रमिण इत्यादिस्वस्वरूपानुरूपं शास्त्रीयं व्यपदेशमर्हन्तीति निरूपकाः ।

ये पुनर्लिप्समाना धनिकाननुविवृत्सवः, विवृत्सवो व्यवहारेषु देशाद्देशान्तरम्भृशमटन्तो नाटयन्ति चतुर्थाश्रमं केवलं दण्डमादाय दृष्टादृष्टाभीष्टसिद्ध्यर्थम्प्रयतमाना मिष्टमिष्टमश्नन्तो रसानपि षडुपभुज्य तृप्तिमनाप्नुवन्तो नवस्वपि रसेषु व्यसनिनः सपरिग्रहाः चिप्रवृत्तयस्ते काममभिधीयन्तां स्वामिन इति तेषां तादृशव्यपदेशस्य स्वानुरूप्यनिबन्धनत्वादिति ।

वस्तुतस्तु स्वामिन्नैश्वर्य्ये । अ० ५ । पा० २ । सू० १२६ ॥

इति यतेरननुरूपार्थादैश्वर्य्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच्प्रत्ययः पाणिनिनापि सस्मरे । तस्माद्गृहस्था धनधान्यापत्यकलत्रवन्तो वपुष्मन्तः श्रोत्रियाः ये ब्राह्मणक्षत्रियाः शास्त्रानुसारिवृत्तयश्चातुर्वर्ण्यव्यवस्थापकास्ते स्वामिन इति प्रविविञ्चते विवेचकाः ॥

अथोपनिषद्भ्यः स्मृतिभ्योऽन्यान्तरेभ्यश्च श्रुतिस्मृतिवचनानि समाहृत्य यतिधर्मान् प्रस्तुमः ।

तत्र बोधायनः—

उषः काले समुत्थाय शौचं कृत्वा यथाविधि ।
दन्तान् विमृज्य चाचम्य पर्ववर्ज्जं यथाविधि ॥
स्नात्वा चाचम्य विधिवत्तिष्ठन्नासीन एव वा ।
बिभ्रज्जलपवित्रं वाऽऽप्यदसूत्रं करद्वये ॥
तद्वत् पवित्रे गोवालैः कृते दुष्कृतनाशने ।
उदये विधिवत् सन्ध्यामुपास्य त्रिकजप्यवान् ॥
मित्रस्य चर्षणीत्याद्यैरुपस्थाय परित्रिभिः ।
पूर्ववत् तर्पयित्वाऽथ जपेत् सम्यक् समाहितः ॥ इति,

मनुरपि ।

एक एव चरेन्नित्यं सिद्ध्यर्थमसहायकः ।
सिद्धिमेकस्य सम्पश्यन् न जहाति न हीयते ॥ इति,

एकस्यासहायस्य विचरतो रागद्वेषादि-प्रतिबन्धाभावात् ज्ञानलक्षणां सिद्धिं निश्चिन्वन् तां सिद्धिं न जहाति तस्यां सिद्धावप्रत्यूहेन प्रवर्त्तते प्रवृत्तश्च तस्याः सिद्धेर्न हीयते किन्तु पारं गच्छति । यदा तु द्वितीय-तृतीयपुरुषसहायवान् विचरेत्तदा रागद्वेषसम्भवादुक्तसिद्धेर्हीयते ।

अत एव दक्षः—

एकोभिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतम् ।
त्रयो ग्रामः समाख्याता ऊर्द्ध्वन्तु नगरायते ॥
नगरन्तु न कर्त्तव्यं ग्रामोऽपि मिथुनं तथा ।
एतत्त्रयं प्रकुर्व्वाणः स्वधर्म्माच् च्यवते यतिः ॥
राजवार्त्ता हि तेषाञ्च भिक्षावार्त्ता परस्परम् ।
स्नेह-पैशुन्य-मात्सर्य्ये सन्निकर्षान्न संशयः ॥ इति,

यदा तु श्रवणादि-सम्पत्त्यभावादात्मज्ञानसिद्धौ स्वयमशक्तः स्यात् तदा तत्र शक्तेन द्वितीयेन सह विचरेत् । यथाऽऽह श्रुतिः । वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी यतिश्चरेत् द्वौ वा । चरेतामित्यर्थः । एकाकी विचरेत् सर्व्वभूतेभ्यो हितमाचरेत् । तदाह याज्ञवल्क्यः ।

सर्वभूतहितः शान्तः त्रिदण्डी सकमण्डलुः ।
एकारामः परिव्रज्य भिक्षार्थं ग्राममाविशेत् ॥ इति,

हिताचरणं नाम हिंसाऽननुष्ठानमात्रं न पुनरुपकारेषु प्रवृत्तिः । हिंसाऽनुग्रहयोरनारम्भः । इति गोतमस्मरणात् । अत एवाहिंसादीनाहात्रिः ।

अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ।
भावशुद्धिर्हरेर्भक्तिः सन्तोषः शौचमार्जवम् ॥
आस्तिक्यं ब्रह्मसंस्पर्शः स्वाध्यायः समदर्शनम् ।
अनौद्धत्यमदीनत्वं प्रसादः स्थैर्य्यमार्दवे ॥
सस्नेहो गुरुशुश्रूषा श्रद्धा क्षान्तिर्दमः शमः ।
उपेक्षा धैर्य्यमाधुर्य्ये तितिक्षा करुणा तथा ॥
ह्रीस्तपो ज्ञानविज्ञाने योगोलघ्वशनं धृतिः ।
स्नानं सुरार्च्चनं ध्यानं प्राणायामो बलिः स्तुतिः ॥
भिक्षाऽटनं जपः सन्ध्या त्यागः कर्म्मफलस्य च ।
एष स्वधर्म्मो विख्यातो यतीनां नियतात्मनाम् ॥ इति,

प्रव्रज्यां कृत्वाऽपि गुरोः समीपे ब्रह्मज्ञानपर्य्यन्तं निवसेत् । तदुक्तं लिङ्गपुराणे ।

आश्रमत्रयमुक्तस्य प्राप्तस्य परमाश्रमम् ।
ततः संवत्सरस्यान्ते प्राप्य ज्ञानमनुत्तमम् ॥
अनुज्ञाप्य गुरुञ्चैव चरेद्धि पृथिवीमिमाम् ।
त्यक्तसङ्गो जितक्रोधो लघ्वाहारोजितेन्द्रियः ॥
पिधाय बुद्ध्या द्वाराणि ध्यानेनैकमना भवेत् ॥ इति,

मत्स्यपुराणेऽपि—

गुरोरपि हिते युक्तः स तु संवत्सरं वसेत् ।
नियमेष्वप्रमत्तस्तु यमेषु च सदा भवेत् ॥
प्राप्य चान्ते ततश्चैव ज्ञानयोगमनुत्तमम् ।
अविरोधेन धर्म्मस्य चरेत पृथिवीं यतिः ॥ इति,

संवत्सरमित्युपलक्षणं यावज्ज्ञानं तावन्निवसेत् गुरुसमीपवासस्य ज्ञानार्थत्वात् । पृथिवीविचरणे विशेषमाह कण्वः—

एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥ इति,

मत्स्यपुराणेऽपि—

अष्टौ मासान् विहारः स्याद्यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासान् वार्षिकान् निवसेत् पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।
न दोषो भविता तत्र दृष्टं शास्त्रं पुरातनम् ॥ इति,

चातुर्मास्यनिवासे दृष्टमपि प्रयोजनमाह मेधातिथिः—

संरक्षणार्थं जन्तूनां वसुधातलचारिणाम् ।
आषाढादींश्च चतुर आमासान् कार्त्तिकाद् यतिः ॥
धर्म्माढ्ये जलसम्पन्ने ग्रामान्ते निवसेच्छुचिः । इति,

अन्यानपि यतेर्हेयानुपादेयाँश्च धर्म्मान् संगृह्याह स एव—

श्रद्धया परयोपेतः परमात्मपरायणः ।
स्थूलसूक्ष्मशरीरेभ्यो मुच्यते दशषट्कवित् ॥
त्रिदण्डं कुण्डिकां कन्थां भैक्षभाजनमासनम् ।
कौपीनाच्छादनं वासः षडेतानि परिगृहेत् ॥
स्थावरं जङ्गमं बीजं तैजसं विषयायुधम् ।
षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत् ॥
रसायनं क्रियावादं ज्योतिषं क्रयविक्रयम् ॥
विविधानि च शिल्पानि वर्ज्जयेत् परदारवत् ।
भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् ॥
कर्त्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ।
नटादिप्रेक्षणं द्यूतं प्रमदां सुहृदं तथा ॥

भक्ष्यं भोज्यमुदक्यां च षण् न पश्येत् कदाचन ।
स्कन्धावारे खले सार्थे पुरे ग्रामे च सद्गृहे ॥
न वसेत यतिः षट्सु स्थानेष्वेतेषु कर्हिचित् ।
रागं द्वेषं मदं मायां दम्भं मोहं परात्मसु ॥
षडेतानि यतिर्नित्यं मनसाऽपि न चिन्तयेत् ।
मञ्चकं शुक्लवस्त्रं च स्त्रीकथां लौल्यमेव च ॥
दिवास्वापश्च यानञ्च यतीनां पतनानि षट् ।
संयोगञ्च वियोगञ्च वियोगस्य च साधनम् ॥
जीवेश्वरप्रधानानां स्वरूपाणि विचिन्तयेत् ।
आसनं पात्रलोपश्च सञ्चयाः शिष्यसंग्रहः ॥
दिवा स्वापो वृथा जल्पो यतेर्बन्धकराणि षट् ।
एकाहात्परतो ग्रामे पञ्चाहात् परतः पुरे ॥
वर्षाभ्योऽन्यत्र तत्स्थानमासनं तदुदाहृतम् ।
उक्तानां यतिपात्राणामेकस्यापि न संग्रहः ॥
भिक्षोर्भैक्षभुजश्चापि पात्रलोपः स उच्यते ।
गृहीतस्य चिदण्डादेर्द्वितीयस्य परिग्रहः ॥
कालान्तरोपभोगार्थं सञ्चयः परिकीर्तितः ।
शुश्रूषालाभपूजाऽर्थं यशोऽर्थं वा परिग्रहः ॥
शिष्याणां न तु कारुण्यात् सस्नेहः शिष्यसंग्रहः ।
विद्या दिवा प्रकाशत्वादविद्या रात्रिरुच्यते ॥
विद्याऽभ्यासे प्रमादो यः स दिवा स्वाप उच्यते ।
आध्यात्मिकीं कथां मुक्त्वा भैक्षचर्य्यां सुरस्तुतिम् ॥
अनुग्रहप्रदः प्रश्नो वृथा जल्पः स उच्यते ।
अजिह्वः षण्डकः पङ्गुरन्धो बधिर एव च ॥

मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः ।
इदं मृष्टमिदं नेति योऽश्नन्नपि न सज्जति ॥
हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते ।
सद्योजातां यथा नारीं तथा षोडशवार्षिकीम् ॥
शतवर्षाञ्च यो दृष्ट्वा निर्व्विकारः स षण्डकः ।
भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च ॥
योजनान्न परं याति सर्वथा पङ्गुरेव सः ।
तिष्ठतो व्रजतो वाऽपि यस्य चक्षुर्न दूरगम् ॥
चतुर्युगद्वयं त्यक्त्वा परिव्राट् सोऽन्ध उच्यते ।
हिताहितं मनो रामं वचः शोकावहं यतिः ॥
श्रुत्वा यो न शृणोतीव बधिरः स प्रकीर्तितः ।
सान्निध्ये विषयाणां यः समर्थोऽविकलेन्द्रियः ॥
सुप्तवद्वर्त्तते नित्यं स भिक्षुर्मुग्ध उच्यते ॥ इति ।

भिक्षाऽटनविधिमाह मनुः—

एककालं चरेद् भैक्ष्यं न प्रसज्येत विस्तरे ।
भैक्षप्रसक्तो हि यतिर्विषयेष्वपि सज्जते ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवर्जिते ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥ इति,

मीयन्ते—इति मात्रा विषयास्तेषां सङ्गाद्विनिर्गतो यतस्ततो न हर्ष-विषादौ कार्य्यौ । यमोऽपि—

स्नात्वा शुचिः शुचौ देशे कृतजप्यः समाहितः ।
भिक्षार्था प्रविशेद्ग्रामं रागद्वेषविवर्ज्जितः ॥

चरेन्माधूकरं भैक्षं यतिर्म्लेच्छकुलादपि ।
एकान्नं न तु भुञ्जीत बृहस्पतिसमो यतिः ॥
मेध्यं भैक्षं चरेन्नित्यं सायाह्ने वाग्यतः शुचिः ।
एकवासा विशुद्धात्मा मन्दगामी युगान्तदृक् ॥
यथालब्धं तथाऽश्नीयादाज्यसंस्कारवर्ज्जितम् ।
भैक्षं माधूकरं नाम सर्वपातकनाशनम् ॥ इति,

बोधायनोऽपि—

विधूमे सन्नमुसले व्यङ्गारे भुक्तवर्ज्जिते ।
काले पराह्णभूयिष्ठे भिक्षाऽटनमथाचरेत् ॥
ऊर्द्ध्वं जान्वोरधो नाभेः परिधायैकमम्बरम् ।
द्वितीयमान्तरं वासः पात्री दण्डी च वाग्यतः ॥
सव्ये चादाय पात्रन्तु त्रिदण्डं दक्षिणे करे ।
उपतिष्ठेत सूर्य्यन्तु ध्यात्वा चैकत्वमात्मना ॥
उक्त्वा विराजनं मन्त्रमाकृष्णेन प्रदक्षिणम् ।
कृत्वा पुनर्जपित्वा च ये ते पन्थान इत्यपि ॥
योऽसौ विष्णवाख्य आदित्ये पुरुषोऽन्तर्हृदि स्थितः ।
सोऽहं नारायणो देव इति ध्यात्वा प्रणम्य तम् ॥
भिक्षापात्रादिशुद्ध्यर्थमवमुच्याप्युपानहौ ।
ततो ग्रामं व्रजेन्मन्दयुगमात्रावलोककः ॥
ध्यायन् हरिञ्च तच्चित्त इदं च समुदीरयेत् ।
विष्णुस्तिर्यगधोर्द्ध्वं मे वैकुण्ठो विदिशन्दिशम् ॥
पातु मां सर्वतो रामो धन्वी चक्री च केशवः ।
अभिगम्य गृहाद्भिक्षां भवत्पूर्व्वं प्रचोदयेत् ॥

गोदोहमात्रं तिष्ठेच्च वाग्यतोऽधो मुखस्ततः ।
दृष्ट्वा भिक्षां दृष्टिपूतां दातुश्च करसंस्थिताम् ॥
त्रिदण्डं दक्षिणे त्वङ्गे ततः सन्धाय बाहुना ।
उत्पाटयेच्च कवचं दक्षिणेन करेण सः ॥
पात्रं वामकरे क्षिप्त्वा श्लेषयेद् दक्षिणेन तु ।
प्राणयात्रिकमन्नन्तु भिक्षेत विगतस्पृहः ॥ इति,

भैक्षस्य पञ्चविधत्वमाहोशना—

माधूकरमसन्क्लृप्तं प्राक्प्रणीतमयाचितम् ।
तात्कालिकोपपन्नञ्च भैक्षं पञ्चविधं स्मृतम् ॥
मनःसङ्कल्परहितान् गृहांस्त्रीन् सप्त पञ्चकान् ।
मधुवदाहरणं यत्तु माधूकरमिति स्मृतम् ॥
शयनोत्थापनात् प्राग् यत् प्रार्थितं भक्तिसंयुतैः ।
तत्प्राक्प्रणीतमित्याह भगवानुशना मुनिः ॥
भिक्षाऽटनसमुद्योगात् प्राक् केनापि निमन्त्रितम् ।
अयाचितं हि तद्भैक्षं भोक्तव्यं मनुरब्रवीत् ॥
उपस्थाने च यत्प्रोक्तं भिक्षार्थं ब्राह्मणेन ह ।
तात्कालिकमिति ख्यातं तदत्तव्यं मुमुक्षुणा ॥
सिद्धमन्नं भक्तजनैरानीतं यन्मठं प्रति ।
उपपन्नं तदित्याहुर्मुनयो मोक्षकाङ्क्षिणः ॥ इति,

भिक्षान्नं प्रशंसति यमः—

यश्चरेत् सर्ववर्णेषु भैक्षमभ्यवहारतः ।
न स किञ्चिदुपाश्नीयादापो भैक्षमिति स्थितिः ॥
अब्बिन्दुं यः कुशाग्रेण मासि मासि चयं पिबेत् ।
न्यायतो यस्तु भिक्षाशी पूर्व्वोक्तात्तु विशिष्यते ॥

तप्तकाञ्चनवर्णेन गवां मूत्रेण यावकम् ।
पिबेद् द्वादशवर्षाणि न तद्भैक्षं समं भवेत् ॥
शाकभक्षाः पयोभक्षा येऽन्ये यावकभक्षकाः ।
सर्वे भैक्षभुजस्तस्य कलां नार्हन्ति षोडशीम् ॥
न भैक्षं परपाकान्नं न च भैक्षं प्रतिग्रहः ।
सोमपानसमं भैक्षं तस्माद्भैक्षेण वर्तयेत् ॥ इति,

अथ सर्ववर्णेष्वित्यापद्विषयम् । अत एव बौधायनोऽपि—

ब्राह्मणक्षत्रियविशां मेध्यानामन्नमाहरेत् ।
असम्भवे तु पूर्वस्याप्याददीतोत्तरोत्तरम् ॥
सर्व्वेषामप्यभावे तु भक्षद्वयमनश्नता ।
भैक्षं शूद्रादपि ग्राह्यं रक्ष्याः प्राणा विजानता ॥ इति,

न च भिक्षां लब्धुमुल्कापाताद्युत्पातकथनं ग्रहदौःस्थ्यादिकथनमन्यं वा कञ्चिदुपाधिं सम्पादयेत् । तदाह बौधायनः ।

न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ इति,

वर्ज्यमन्नमाहात्रिः ।

हितं मितं सदाऽश्नीयाद्यत्सुखेनैव जीर्य्यति ।
धातुः प्रकुप्यते येन तदन्नं वर्जयेद्यतिः ॥
उदक्या चोदितं चान्नं द्विजान्नं शूद्रचोदितम् ।
प्राण्यङ्गे चापि संक्लृप्तं तदन्नं वर्जयेद्यतिः ॥
पित्रर्थे कल्पितं पूर्वमन्नं देवा*दिकारणात् ।
वर्जयेतादृशीं भिक्षां परबाधाकरीं तथा ॥ इति,

* भगवन्नारायणातिरिक्तदेवार्पितान्नपानादिनिषेधोऽयम् ।

परबाधाप्रसक्तिमेवाभिप्रेत्य मनुराह

न तापसैर्ब्राह्मणैर्वा वयोभिरथवा श्वभिः ।
आकीर्णं भिक्षुकैर्वाऽन्यैरागारमुपसंव्रजेत् ॥ इति,

यस्तु भिक्षां दातुं शक्तोऽपि नास्तिक्यान्न प्रयच्छति तद्गृहं वर्जयेदित्याह बोधायनः—

भिक्षां न दद्युः पञ्चाहं सप्ताहं वा कदाचन ।
यस्मिन् गृहे जना मौर्ख्यात् त्यजेच्चाण्डालवेश्मवत् ॥ इति,

अनिन्द्यगृहस्य वर्ज्जने बाधमाह स एव—

साधुं चापतितं विप्रं यो यतिः परिवर्जयेत् ।
स तस्य सुकृतं दत्त्वा दुष्कृतं प्रतिपद्यते ॥ इति,

यस्तु दरिद्रः श्रद्धालुतया स्वयमुपोष्यापि भिक्षां प्रयच्छति तस्य भिक्षा न ग्राह्या । तदुक्तं स्मृत्यन्तरे

आत्मानं पीडयित्वाऽपि भिक्षां यः संप्रयच्छति ।
सा भिक्षा हिंसिता ज्ञेया नादद्यात्तादृशीं यतिः ॥ इति,

भिक्षार्थं बहुषु गृहेषु पर्य्यटितुमलसम्प्रत्याह बोधायनः—

एकत्र लोभाद् यो भिक्षुः पात्रपूरणमिच्छति ।
दाता स्वर्गमवाप्नोति भोक्ता भुञ्जीत किल्बिषम्—इति,

यतिपात्रं विविनक्ति मनुः—

अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥
अलाबुं दारुपात्रं वा मृन्मयं वैणवं तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥ इति ।

यमोऽपि—

हिरण्मयानि पात्राणि कृष्णायसमयानि च ।
यतीनां तान्यपात्राणि वर्ज्जयेत्तानि भिक्षुकः ॥

बौधायनोऽपि—

स्वयमाहृतपर्णेषु स्वयं शीर्णेषु वा पुनः ।
भुञ्जीत न वटाश्वत्थकरञ्जानान्तु पर्णके ॥
कुम्भीतिन्दुकयोर्वाऽपि कोविदारार्कयोस्तथा ।
आपद्यपि न कांस्ये तु मलाशी कांस्यभोजनः ॥
सौवर्णे राजते ताम्रमये वा त्रपुसीसयोः—इति,

भोजननियममाह स एव । भिक्षाचर्य्यादुपावृत्तो हस्तौ पादौ च प्रक्षाल्याचम्यादित्यस्याग्रे निवेदयन्नुदुत्यं चित्रमिति ब्रह्मयज्ञानमिति च उद्वयं तमसस्परिति च जपित्वा भुञ्जीत इति । नृसिंहपुराणेऽपि—

ततो निवर्त्य तत्पात्रं संस्थाप्याचम्य संयमी ।
चतुरङ्गुलेषु प्रक्षाल्य ग्रासमात्रं समाहितः ॥
सर्व्वव्यञ्जनसंयुक्तं पृथक्पात्रे निवेदयेत् ।
सूर्य्यादिदेवभूतेभ्यो दत्त्वाऽन्नं प्रोक्ष्य वारिणा ॥
भुञ्जीत पर्णपुटके पात्रे वा वाग्यतो यतिः ।
भुक्त्वा पात्रं यतिर्नित्यं क्षालयेन्मन्त्रपूर्व्वकम् ॥
न दुष्येतस्य तत्पात्रं यज्ञेषु चमसा इव ।
अथाचम्य निरुद्धासुरुपतिष्ठेत भास्करम् ॥
जपध्यानविशेषेण दिनशेषं नयेद्बुधः ।
कृतसन्ध्यस्ततो रात्रिं नयेद्देवगृहादिषु ॥

हृत्पुण्डरीकनिलये ध्यात्वाऽऽत्मानमकल्मषम् ।
यतिर्धर्म्मरतः शान्तः सर्व्वभूतसमो वशी ॥
प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्त्तते—इति,

कूर्म्मपुराणेऽपि

आदित्ये दर्शयित्वाऽन्नं भुञ्जीत प्राङ्मुखो यतिः ।
हुत्वा प्राणाहुतीः पञ्च ग्रासानष्टौ समाहितः ॥
आचम्य देवं ब्रह्माणं ध्यायीत परमेश्वरम् ।
प्राग्रात्रेऽपररात्रे च मध्यरात्रे तथैव च ॥
सन्ध्यास्वह्नि विशेषेण चिन्तयेन्नित्यमीश्वरम्—इति,

अथान्ये यतिधर्म्माः ।

तत्राहात्रिः ।

अतः परं प्रवक्ष्यामि आचारो यो यतेः स्मृतः ।
अभ्युत्थानप्रियालापैर्गुरुवत्प्रतिपूजनम् ॥
यतीनां व्रतवृद्धानां स्वधर्म्ममनुवर्तिनाम् ।
विष्णुरूपेण वै कुर्य्यान्नमस्कारं विधानतः ॥ इति,

मनुरपि—

कृत्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्द्देशं भृतको यथा ॥
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज् जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥

अतिवादाँस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥

क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत् ॥

अध्यात्मरतिरासीनो निरपेक्षो निरामयः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥

संरक्षणार्थं भूतानां रात्रावहनि वा सदा ।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥

इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥ इति,

ब्रह्मचर्याद्याश्रमिषु विशेषमाह मदनपारिजाते अङ्गिराः

गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि ।
शौचवच्छोधनं कुर्युरर्वाग् ब्रह्मनिदर्शनात् ॥ इति,

ब्रह्मनिदर्शनादर्वाग् ब्रह्मसाक्षात्कारात्पूर्वमित्यर्थः, अथ शौचवच्छोधनं कुर्युरित्युक्तं तत्र शौचे विशेषमाह अङ्गिराः ।

एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् ॥ इति,

अयमर्थः—यथा शौचमाश्रमिणां गृहस्थापेक्षयाऽधिकं तथा तेषां प्रायश्चित्तमपि पादवृद्ध्याऽभिवर्द्धते ।

नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथञ्चन ।
एतैः सर्वैः सुनिष्पन्नो यतिर्भवति नेतरः ॥ इति,

वृहस्पतिरपि—

न किञ्चिद्भेषजादन्यदद्याद्वा दन्तधावनात् ।
विना भोजनकालन्तु भक्षयेदात्मवान् यतिः ॥
नैवाददीत पाथेयं यतिः किञ्चिदनापदि ।
पक्कमापत्सु गृह्णीयाद्यावदन्नोपभुज्यते ॥
न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः ।
न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् ॥ इति,

नाध्येतव्यमित्येतत् कर्म्मकाण्डादिविषयम् । अन्यथा उपनिषदमावर्तयेत्—इति श्रुतिर्बाध्येत—न श्रोतव्यमित्येतद् ब्रह्ममीमांसाव्यतिरिक्त-विषयम् । श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति तन्मीमांसाया विहितत्वात् उपपन्नश्च तीर्थोपवासाध्ययन-व्याख्यान-तात्पर्य्य-निषेधः निवृत्तिधर्म्मप्रधानत्वात् कैवल्याश्रमस्य । यतः स एवाह—

यस्मिन् वाचः प्रविष्टाः स्युः कूपे प्राप्ताः शिला इव ।
न वक्तारं पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥
यस्मिन् कामाः प्रविशन्ति विषयेभ्योऽपसंहृताः ।
विषया न पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥
यस्मिन् क्रोधः शमं याति विफलः सम्यगुत्थितः ।
आक्रोशेऽस्थिर्यया चिप्रः स कैवल्याश्रमे वसेत् ॥
यस्मिन् क्षान्तिः शमः शौचं सत्यं सन्तोष आर्जवम् ।
आकिञ्चन्यमदम्भश्च स कैवल्याश्रमे वसेत् ॥
वृथाप्रलापी यो न स्यान्न लोकाराधने रतः ।
नान्यविद्याऽभियुक्तश्च स कैवल्याश्रमे वसेत् ॥

अतीतान्न स्मरेद्भोगाँस्तथैवानागतानपि ।
प्राप्ताँश्च नाभिनन्देत स कैवल्याश्रमे वसेत् ॥
अन्धवन्मूकवत् पङ्गुवधिरक्लीबवच्च यः ।
आस्ते व्रजति यो नित्यं स कैवल्याश्रमे वसेत् ॥

उक्तधर्म्मोपेतं यतिं प्रशंसति दक्षः—

सञ्चितं यद्गृहस्थस्य पापमामरणान्तिकम् ।
निर्दहिष्यति तत्सर्व्वमेकरात्रोषितो यतिः ॥
संन्यसन्तं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः ।
एष मे मण्डलं भित्त्वा परं स्थानं प्रयास्यति ॥

तदेवं संक्षेपतो यतिधर्म्मा निरूपिताः ।

गृहस्थोऽर्हति प्रणवमुपासितुम् ।

संन्यासिनां जप्यमन्त्रेषु भगवन्नारायणपरा द्वादशाष्टाक्षरोङ्कारादिमन्त्राः प्रधानतमास्तत्र मितमतयः केचन प्रणवोपासनां गृहस्थादेर्नानुमन्यन्ते तदयुक्तं तथा हि छान्दोग्ये ओमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथोपासनायाः सामान्येनैवाभिधानात्सर्वाश्रमिण एव त्रैवर्णिका भवन्त्यधिकारिणः प्रणवोपासने; अत एव त्विहैव प्रकरणे आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते इति यजमानकामावाप्तिहेतुत्वमुद्गीथोपासनाया अभिधीयते, न हि यजमानार्थमुपासना संन्यासिनः सम्भवति, अत एव त्विह आप्ता इत्यनभिधाय आपयिता इति प्रयोजकणिजन्तप्रयोगपुरस्कारः । एवमेव त्विह—आपयिता ह वै कामानां यजमानस्य भवति य एतदक्षरमेवाप्तिगुणवदुद्गीथमुपास्ते इति शङ्कराचार्या अपि प्राहुः । अत एव स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्, तस्य वाचकः प्रणवः, तज्जपस्तदर्थभावनम्, इति योगविसूत्र्याऽपि प्रणवोपासना

आश्रमविशेषनैरपेक्ष्येण त्रैवर्णिकानां बोध्यते—प्रणवेन परं ब्रह्म ध्यायीत नियतो यतिः इत्यादिवचनेषु यतिपदं प्रायिकत्वाभिप्रायं तस्य त्यक्तसर्वपरिग्रहस्य ब्रह्मानुचिन्तनैकतानचित्ततायाः सुसम्भवात् अत एव ।

व्यक्ताव्यक्ते च पुरुषस्तिस्रो मात्राः प्रकीर्त्तिताः ।
अर्द्धमात्रापरं ब्रह्म ज्ञेयमध्यात्मचिन्तकैः ॥

इत्यादिपुराणवाक्येषु सामान्यतोऽध्यात्मचिन्तकैरित्येवोक्तं न तु यतिभिरिति प्रणवपुरःसरोपासनायाः सर्वाश्रमस्थत्रैवर्णिकसाधारणत्वात् अत एव ।

तस्मादोमित्युदाहृत्य यज्ञदानतपः*क्रियाः ।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥

अत्र ब्रह्मवादिनामित्युक्तम्, न हि यज्ञदानयोर्भिक्षवोऽधिकुर्वते, यथा हि श्रीरामकृष्णादिशब्दानामविकलसर्वसम्पत्सम्पन्नभगवद्वतारनिर्देशकत्वं तथाऽवतारिनिर्देशकत्वं प्रणवे, तेन च परमप्रियप्रणवपदेनावतारी भगवान् प्रसीदति यथाऽऽहुः पुराणाचार्याः ।

अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः ।
तस्योङ्कारः स्मृतो नाम तेनाहूतः प्रसीदति ॥ इति,

स्वयं भगवानपि ओन्तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । इति प्रणवस्यावतारिनिर्देशकत्वलक्षणवैलक्षण्यं पुरस्कुर्वाण एव त्रैविध्यमभिदधौ, अन्यथा परःसहस्रनाम्नोऽनन्तस्य तिस्रोऽभिधा इत्यतिकदर्थितमेवापद्येत ।

* तपस्क्रिया इति तूचितम् ।

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥

इति गीतासु यः प्रयातीत्यादिसामान्यनिर्देशपुरस्कारेण गीताचार्यस्य गृहस्थादिद्विजसाधारण्यं तात्पर्यविषयीभूतमिति न सुगुप्तम् । अत एव त्वन्यथापीतिहासपुराणेषु ब्राह्मणक्षत्रियाणां गृहस्थवानप्रस्थाद्यवस्थानां प्रणवोपदेष्टृत्वमुपदेश्यत्वं च श्रूयते इति कृतं नो विस्तरेण ।

उक्तानां ब्रह्मचर्य्यादीनां संन्यासान्तानां चतुर्णामाश्रमाणां प्रत्येकमवान्तरभेदाश्चतुर्व्विधाः । तदुक्तं महाभारते—

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः एकैकस्य चतुर्विधाः ॥ इति,

तच्च चातुर्विध्यं कात्यायनस्मृतेर्व्याचक्षते । ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाश्चत्वार आश्रमाः षोडशभेदा भवन्ति । तत्र ब्रह्मचारिणश्चतुर्विधा भवन्ति गायत्रो ब्राह्मः प्राजापत्यो बृहन्निति । उपनयनादूर्द्ध्वं त्रिरात्रमक्षारलवणाशी गायत्रीमधीते स गायत्रः । अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्य्यं चरेत् प्रतिवेदं द्वादश द्वादश वा यावद्ग्रहणान्तं वा वेदस्य स ब्राह्मः । स्वदारनिरतः ऋतुकालगामी सदा परदारवर्ज्जितः स प्राजापत्यः । आप्रायणाद् गुरोरपरित्यागी स नैष्ठिको बृहन्निति । गृहस्था अपि चतुर्विधा भवन्ति वार्त्ताकवृत्तयः शालीनवृत्तयो यायावरा घोरसंन्यासिकाश्चेति । तत्र वार्त्ताकवृत्तयः कृषिगोरक्षवाणिज्यमगर्हितमुपयुञ्जानाः शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते । शालीनवृत्तयो यजन्तो न याजयन्तोऽधीयाना नाध्यापयन्तो ददतो न प्रतिगृह्णतः शत-

संवत्सराभिः क्रियाभिर्य्यजन्त आत्मानं प्रार्थयन्ते । यायावरा यजन्तो याजयन्तोऽधीयाना अध्यापयन्तो ददतः प्रतिगृह्णन्तः शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते । घोरसंन्यासिका उद्धृत परिपूताभिरद्भिः कार्य्यं कुर्वन्तः प्रतिदिवसमास्तृतोञ्छवृत्तिमुपयुञ्जानाः शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते । वानप्रस्था अपि चतुर्विधा भवन्ति वैखानसा औदुम्बरा वालखिल्याः फेनपाश्चेति । तत्र वैखानसा अकृष्टपच्योषधिवनस्पतिभिर्ग्रामवहिष्कृताभिरग्निपरिचरणं कृत्वा पञ्चयज्ञक्रियां निर्वर्तयन्त आत्मानं प्रार्थयन्ते । औदुम्बरा वदरनीवारश्यामाकैरग्निपरिचरणं कृत्वा पञ्चयज्ञक्रियां निर्वर्तयन्त आत्मानं प्रार्थयन्ते । वालखिल्या जटाधराश्चीरचर्मवल्कलपरिवृताः कार्त्तिक्यां पौर्णमास्यां पुष्पफलमुत्सृजन्तः शेषानष्टौ मासान् वृत्त्युपार्जनं कृत्वाऽग्निपरिचरणं कृत्वा पञ्चमहायज्ञक्रियां निर्वर्तयन्त आत्मानं प्रार्थयन्ते । फेनपा जीर्णपर्णफलभोजिनो यत्र तत्र वा वसन्तः । परिव्राजका अपि चतुर्विधा भवन्ति, कुटी*चरा बहूदका हंसाः परमहंसाश्चेति । कुटीचराः स्वपुत्रगृहेषु भैक्ष्यचर्यां चरन्त आत्मानं प्रार्थयन्ते । बहूदकास्त्रिदण्डकमण्डलुजलपवित्रपादुकाऽऽसनशिखायज्ञोपवीतकाषायवेषधारिणः साधुवृत्तेषु ब्राह्मणकुलेषु भैक्षं चरन्त आत्मानं प्रार्थयन्ते । हंसा एकदण्डधराः शिखायज्ञोपवीतधारिणः कमण्डलुहस्ता ग्रामैकरात्रवासिनो नगरे तीर्थेषु पञ्चरात्रम् एकरात्रं द्विरात्रं कृच्छ्रचान्द्रायणादि चरन्त आत्मानं प्रार्थयन्ते । परमहंसा नाम एकदण्डधराः मुण्डाः कन्था–कौपीनवाससो व्यक्ताव्यक्तलिङ्गा अनुन्मत्ता उन्मत्तवदाचरन्तस्त्रिदण्डकमण्डलुशिक्यपद्मजलपवित्रपादु-

* कुटीचका इति पाठान्तरम् ।

काऽऽसन–शिखायज्ञोपवीतत्यागिनः शून्यागारदेवगृहवासिनो न तेषां धर्म्मो नाधर्म्मो वा न सत्यं नापि चानृतं सर्वसहाः सर्वसमाः समलोष्टाश्मकाञ्चनाः यथोपपन्नचातुर्वर्ण्यं भैक्षचर्य्याञ्चरन्त आत्मानं मोक्षयन्ते ॥ इति, अथापरे धर्माः, ।

भिक्षां सत्कृत्य योदद्याद्विष्णुरूपाय भिक्षवे ।
कृत्स्नां वा पृथिवीं दद्यात्तस्य तुल्यं न तत्फलम् ॥

हारीतः–

सर्वेषामपराधानां यतिनिन्दा गरीयसी ।
यतिर्नारायणः साक्षात्तस्मात्तां परिवर्जयेत् ॥

बौधायनः–

यतावागते स्वागतमित्युक्त्वाऽभ्युत्थायाऽऽसनं पादशौचमभ्यञ्जनं च दत्त्वा कुशलमभिभाष्योपासीत । काले त्वन्नं भैक्षमुपाहरेत् स तस्योपचार इति ।

ब्रह्माण्डपुराणे–

काले वा यदि वाऽकाले श्राद्धं कुर्य्यादतन्द्रितः ।
पितॄणां तृप्तिकामस्तु यतीन्प्राप्य द्विजोत्तमः ॥ इति,

दक्षः–

विना मांसेन मधुना विना दक्षिणयाऽशिषा ।
परिपूर्णं भवेच्छ्राद्धं यतिषु श्राद्धभोजिषु ॥

स्कन्दपुराणे शिववाक्यम् ।

ब्रह्मा विष्णुश्च रुद्रश्च ससाध्या मरुतस्तथा ।
सकृद्भुक्तेन यतिना पितृदेवाः सवासवाः ॥
सर्वे ते तृप्तिमायान्ति दशवर्षाणि पञ्च च ।
जन्मकोटिसहस्रेषु पूजितस्तेन शङ्करः ॥

गृहे यस्य समायाति महाभागवतो यतिः ।
यतयः पूज्यमानास्तु सर्वे देवाः सुपूजिताः ॥
अवमाने कृते तेषां देवाः सर्वे ऽवमानिताः ।
सदोषं निर्गुणं वापि यतिः पुत्रं न कीर्तयेत् ॥
अज्ञानात्कीर्तयेद्यस्तु स याति नरकं ध्रुवम् ।
येनापमानितो भिक्षुस्तेनाहं चापमानितः ।
हरिब्रह्मादयो देवाः पितरो मुनिपुङ्गवाः ॥
तीर्थानि क्रतवः सर्वे भिक्षुके गृहमागते ।
यतिर्यस्य गृहस्थस्य सन्तुष्टो वसते गृहे ॥
तुष्टो भवति दैत्यारिर्यावदाभूतसंप्लवम् ।
ये नमन्ति यतिं दूराद् दृष्ट्वा काषायवाससम् ॥
राजसूयफलावाप्तिस्तेषां भवति पुत्रकाः ! ।
यतिरूपेण सर्वत्र विष्णुः पर्यटते महीम् ॥
भक्तानामनुकम्पायै महद्धर्मविवृद्धये ।
यदा कारयति स्नानं यतीनां यो द्विजोत्तमः ॥
स्नानजं लभते पुण्यं गङ्गायाः शतवार्षिकम् ।
कौपीनाऽऽच्छादने दण्डं वह्निर्वासश्च पादुकाः ॥
यो ददाति यथा शक्त्या पुण्यं तस्य वदाम्यहम् ।
दत्तं वाजिसहस्रन्तु मातङ्गानां शतत्रयम् ।
गोऽयुतस्य सहस्रस्य फलं प्राप्नोति मानवः ॥
कौपीनाच्छादनं पात्रं भिक्षुकेभ्यः प्रयच्छति ॥
वाजपेयसमं पुण्यं विष्णुमुद्दिश्य यत्कृते ।
ध्यानभिक्षुमतिक्रम्य यद्यन्यं भोजयेद्गृही ॥
तत्फलं समवाप्नोति सर्वं गोत्रं प्रतापयेत् ।

मुण्डं यतेन्द्रियं शान्तं ध्यानभिक्षुमकल्मषम् ॥
तान्नित्यं भोजयेच्छ्राद्धे दैवे पित्र्ये च कर्मणि ।
अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः ॥
दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत नित्यशः ।
पक्वान्नस्वामिको भिक्षुर्यदि तस्मै न दीयते ॥
चान्द्रायणेन शुद्धिः स्यादिति च स्मृतिशासनम् ।
यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ॥
तयोरन्नमदत्त्वा तु भुक्त्वा चान्द्रायणं चरेत् ।
लक्षलक्षाणि यो दद्याद् ब्राह्मणे वेदपारगे ॥
तथा तत्त्वविदे भिक्षां तयोस्तुल्यफलं भवेत् ।
संन्यासदिवसे यस्य यतिर्भैक्ष्यं समाचरेत् ॥
एवं स लभते श्रेष्ठं सफलं तस्य जीवितम् ।
द्वितीयदिवसेऽप्येवं तृतीयेऽप्येवमेव हि ॥
अतस्त्रिदिनमध्ये तु यतिर्भोज्यः प्रयत्नतः ।

पराशरः ।

अकृते वैश्वदेवे तु भिक्षुके गृहमागते ।
उद्धृत्य वैश्वदेवान्नं भिक्षुकं तु विसर्जयेत् ॥
यतिश्च ब्रह्मचारी च विद्यार्थी गुरुपोषकः ।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥
वैश्वदेवकृतं दोषं भिक्षुः शक्तो व्यपोहितुम् ।
न हि भिक्षुकृतं दोषं वैश्वदेवो व्यपोहति ॥
निवेशयेत्तु यः श्राद्धे पितृकर्मणि भिक्षुकम् ।
आकल्पकालिकी तृप्तिः पितृणामुपजायते ॥

बौधायनः ।

ब्रह्मनिष्ठे च संन्यस्ते पितर्युपरते श्रुते ।
सपिण्डीकरणं नैव कर्तव्यं तु सुतादिभिः ॥
सद्यःसंन्यसनादेव प्रेतत्वं नैव जायते ।
एकोद्दिष्टं न कर्तव्यं संन्यस्तानां कदाचन ॥

शौनकः ।

ब्रह्मीभूते च संन्यस्ते ताते च निधनं गते ।
न तस्य सूतकं कार्य्यं न च पिण्डादकक्रिया ॥
ब्रह्मीभूतस्य तस्याच कर्तव्यं नैव विद्यते ।
दशाहे तु व्यतिक्रान्ते पुत्रः कुर्याच्च पार्वणम् ॥
प्रत्यब्दं पार्वणं कुर्यादेष धर्मः सनातनः ।
द्वादशाहमनाध्यायं कुर्याच्छिष्यः समाहितः ॥
खननं वहनं स्पर्शं संस्कुर्वन् शुद्धिमिच्छति ।
स्नानमात्रेण लभते अश्वमेधं पदेपदे ॥
अपुत्रो लभते पुत्रं चिरंजीविनमुत्तमम् ॥
निषेकादिस्मशानान्ता विधयो ब्राह्मणाश्रिताः ।
तस्माद्यतेस्तु संस्कारं मन्त्रवित्कुरुते गृही ॥
यतिदेहं गृही स्पृष्ट्वा स्नानमात्रेण शुध्यति ।
अश्वमेधफलं सर्वं सम्प्राप्नोति पदेपदे ॥
असंस्कृतं विशीर्येत यत्र देशे कलेवरम् ।
धर्मलोपो भवेत्तत्र दुर्भिक्षं मरणादिकम् ॥

तथा चोक्तं पितृमेधपद्धतौ

सन्निकृष्टो यतेः पुत्रो यदि स्वपितृनाशनम् ।
कृत्वापि वपनं स्नात्वा शुद्धात्मा यतिसत्क्रियाम् ॥

कुर्यादिति शेषः ।

अषन्निकृष्टश्चेत्पुत्रः सिद्धिवार्तां पितुस्तदा ।
स्नात्वा वपनपूर्वं तु शुक्लायां तदनन्तरम् ॥
दशम्यामेव कुर्य्यात्तु नारायणबलिं ततः ।
पार्वणं सिद्धिदिवसे कुर्य्यादज्ञान एव चेत् ॥
पार्वणं शुक्लपक्षे तु द्वादश्यां मार्गशीर्षके ।
आराधनं ततः कुर्यात्त्रयोदश्यां यतेर्गुरोः ॥
गुरुबुद्ध्या यतीन् शिष्टान् ब्राह्मणान् पूजयेत्ततः ।
स्वगुरुं परमगुरुं परमेष्ठिगुरुं तथा ।
परात्परगुरुं चैव तत्तन्नाम्नाऽर्चयेत् क्रमात् ॥

उशना ।

यतौ मृते न वपनं नोदकं नैव च क्रिया ।
नाशौचं नैव शोकश्च बन्धूनां गोत्रिणामपि ॥
वृषोत्सर्गं न दाहं च विपन्ने स्याद्गुरौ यतौ ।
सपिण्डीकरणं तेषां न कर्त्तव्यं सुतेन तु ॥
एकोद्दिष्टं न कुर्वीत यतीनां तु कदाचन ।
मृते न दहनं कार्यं परमहंसस्य सर्वदा ॥
कर्त्तव्यं खननं तस्य नाशौचं नोदकक्रिया ।
अश्वत्थस्थापनं कार्यं तद्देशेऽध्वर्युणा मुने ! ॥
अश्वत्थः स्थापितस्तेन स्थापितो हि महेश्वरः ।
दर्शनात्स्पर्शनात्तस्य सर्वं नश्यति पातकम् ॥
कुटीचकं सम्प्रदहेद्बहूदकं जले क्षिपेत् ।
हंसं चैव तु निक्षिप्य परमहंसं विकीरयेत् ॥

बौधायनः ।

यतीनां प्रेतसंस्कारविधिं व्याख्यास्यामः । गृहस्थः शुद्धात्मा विशेषतः स्नपयित्वा गन्धपुष्पादिभिरलंकृत्य शिक्ये शरीरमारोप्य घोषितं जयशब्दैश्च दुन्दुभीनां स्वरैरपि । ग्रामात्प्राचीमुदीचीं च गत्वा शुद्धदेशं समाश्रयेत् । नदीतीरेऽश्वत्थवृक्षस्य ब्रह्मवृक्षस्याधस्ताद्देवयजनं दण्डायमानप्रमाणं खनित्वा लवणं प्रक्षिप्य दर्भान्संस्तीर्य गायत्र्या शरीरं प्रक्षाल्य पुरुषसूक्तेन स्नपयित्वा शङ्खेन प्रणवेन शतसंख्येन स्नाप्य षोडशोपचारैर्गन्धपुष्पैरलंकृत्य विष्णो हव्यं रक्षस्वेति शरीरकुण्डे निधाय इदं विष्णुर्विचक्रमे इति दक्षिणहस्ते दण्डं भङ्क्त्वा निधाय हंसः शुचिषदिति हृदयदेशे जपेत् । ब्रह्मजज्ञानमिति मूर्ध्नि देशे जपेत् पुरुषसूक्तं भ्रुवोर्मध्ये जपेत् । ॐभूमिर्भूमिमगान्मागान्मामध्यतरमप्यगात् । भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि सभिन्धतमिति मन्त्रेण मूर्धानं भिन्द्यात् अश्मना परशुना वा । ॐभूर्भुवः स्वरोमित्यभिमन्त्र्य दर्भैराच्छाद्य मध्ये लवणेन घनतरेण सव्याहृतिभिः प्रणवेन देवयजनं पूरयेत् । अग्निनाऽग्निः समिध्यते इत्यनुमन्त्रयेत् । न तत्र शेषसंस्कारोऽस्ति । अन्यथा ग्राम्यादिभक्षणेऽनावृष्टिर्भवति । तस्माद्भूमिं भृशं खात्वा मृदा ह्याऽऽच्छादयेद्भृशम् ।

सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च ।
न तस्य दहनं कार्य्यं नाशौचं नोदकक्रिया ॥
निदध्यात्प्रणवेनैव ध्यानभिक्षोः कलेवरम् ।
प्रोक्षणं खननं चैव सर्वया नैव कारयेत् ॥
यतीन् वहन् स्पृशँश्चैव स्नानमात्रेण शुध्यति ।
अश्वमेधफलं सर्वे प्राप्नुवन्ति पृथक्पृथक् ॥

एकोद्दिष्टं जलं पिण्डं नाशौचं प्रेतसंस्क्रिया ।
न कुर्यात् पार्वणादन्यद् ब्रह्मीभूताय कल्पते ॥

कपिलः ।

वृद्धो तीर्थे च संन्यस्ते ताते च पतिते तथा ।
येभ्य एव पिता दद्यात् तेभ्यो दद्यात्सुतः स्वयम् ॥
यतेः कार्या क्रिया यस्य यतौ ब्रह्मणि संस्थितः ।
ब्रह्मीभूतस्य यतेर्न दाहाद्याः कथञ्चन ॥

पुत्रादिभिः साधनावस्थस्य कुटीचकस्य त्वब्रह्मविदो दहनादिकः क्रियाकलापः कार्य एव कुतः ।

संनिकृष्टो यतौ तस्य पितर्युपरते सुतः ।
दहनं तस्य कर्तव्यं श्राद्धं पिण्डोदकक्रिया ॥

इति स्मृतेः ।

अनग्नेर्दहनं कार्यं पूर्वभिक्षोर्यथाविधि ।
विदुषस्तु न तत्कार्यं नैकोद्दिष्टादि कर्हिचित् ॥

पूर्वभिक्षुः कुटीचकः । बोधायनः

नारायणबलिं तस्य कुर्वीत द्वादशेऽहनि ।
कुर्याद्विष्णोर्महापूजां पायसं च निवेदयेत् ॥
अग्नौ हुत्वा तु तच्छेषं व्याहृतिभिः समाहितः ।
यतीन् गृहस्थान् साधून् वा निमन्त्र्य द्वादशावरान् ॥
अभ्यर्च्य गन्धपुष्पाद्यैर्मन्त्रैर्द्वादशनामभिः ।
सम्भोज्य हव्येनान्नेन दक्षिणां च निवेदयेत् ॥
त्रयोदश्यां द्विजश्रेष्ठमात्मसंज्ञं जितेन्द्रियम् ।
विष्णुं यथा तथाऽभ्यर्च्य पाद्याद्यैश्च विधानतः ॥

दद्यात्पुरुषसूक्तेन गन्धपुष्पादिकं क्रमात् ।
वस्त्रालङ्करणादीनि यथाशक्ति प्रदापयेत् ॥
उच्छिष्टसन्निधौ तस्य दर्भानास्तीर्य्य भूतले ।
ॐभूःस्वधाॐभुवःस्वधाॐस्वःस्वधेति बलीन् हरेत् ॥
एवं यः कुरुते विद्वान्नारायणबलिन्ततः ।
विष्णुलोकमवाप्नोति पुरुषो नात्र संशयः ॥

अथ द्विजेषु ब्रह्मचर्य्यं विनाऽऽश्रमान्तरावलम्बनासम्भवात् सर्वाश्रमप्रकृतिभूतब्रह्मचर्यधर्माः प्रसङ्गतो निरूप्यन्ते । तत्र दक्षो ब्रह्मचारिविषये आह ।

स्वीकरोति यदा वेदाँश्चरेद्वेदव्रतानि च ।
ब्रह्मचारी भवेत्तावदूर्द्ध्वं स्नातो भवेद् गृही ॥ इति,

योगीश्वरः ।

मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम् ।
भास्करालोकनाश्लीलपरिवादादि वर्जयेत् ॥

भास्करालोकने मनुना विशेषोऽभिहितः ।

नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

मनुः ।

वर्जयेन्मधुमांसं च गन्धं माल्यं रसान् स्त्रियः ।
शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनम् ॥
अभ्यङ्गमञ्जनं चाऽक्ष्णोरुपानच्छत्रधारणे ।
कामं क्रोधं च लोभं च नर्तनं गीतवादनम् ॥
द्यूतं च जनवादं च परिवादं तथाऽनृतम् ।
स्त्रीणां च प्रेक्षणालापमुपघातं परस्य वै ॥

एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित् ।

योगीश्वरः ।

दण्डाजिनोपवीतानि मेखलां चैव धारयेत् ।
ब्राह्मणेषु चरेद् भैक्षमनिन्द्येष्वात्मवृत्तये ॥
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ।
ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम् ॥
कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया ।
आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ॥
ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ।
ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ॥

अयमर्थः—ब्रह्मचारी अनापदि व्याध्याद्यभावे एकान्नं न भुञ्जीत, ब्राह्मणः पुनः श्राद्धेऽभ्यर्थितः सन् काममश्नीयात् व्रतमपीडयन् मधुमांसादिपरिहारेणेत्यर्थः । क्षत्रियादेर्ब्रह्मचारिणः श्राद्धभोजननिषेधार्थं ब्राह्मणग्रहणम्, राजन्यवैश्ययोश्चैव नैतत्कर्म प्रचक्षते इति स्मरणात् ।

मनुः ।

अध्येष्यमाणः स्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
प्राञ्जलिश्च कृतोऽध्याप्योलघुवासा जितेन्द्रियः ॥
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ॥
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ।
ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ॥
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते ।
प्राञ्जलिः पर्युपासीत पवित्रैश्चैव पावितः ॥

प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।

पाणिनीयशिक्षायाम् ।

हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् । इति,

चातुराश्रम्यावलम्बनपक्षे ब्रह्मचर्यगृहस्थाश्रमौ क्रमेणाऽऽलम्ब्य तृतीयं वानप्रस्थाश्रममवलम्बेत तत्कालस्तु शङ्खेनाभिहितः ।

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदाऽरण्यं समाश्रयेत् ॥

वानप्रस्थधर्माश्चाभिहिताः शङ्खेन—

पुत्रे दारान् विनिक्षिप्य तया चानुगतो वने ।
अग्नीनुपाचरेन्नित्यं वन्यमाहारमाहरेत् ॥
यदाहारो भवेत्तेन पूजयेत्पितृदेवताः ।
तेनैव पूजयेद्विद्वानतिथिं समुपागतम् ॥
ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान् समाहितः ।
स्वाध्यायं च तथा कुर्याज्जटाश्च विभृयात्तथा ॥
तपसा शोधयेन्नित्यं स्वकं चैव कलेवरम् ।
आर्द्रवासास्तु हेमन्ते ग्रीष्मे पञ्चतपास्तथा ॥
प्रावृष्याकाशशायी च एकाशी च सदा वसेत् ।
चतुर्थकालिको वा स्यात् षष्ठकालिक एव वा ॥
कृच्छ्रैर्वाऽपि नयेत्कालं ब्रह्मचर्यं च पालयेत् ।
एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत् ॥ इति,

इति संक्षेपतो वानप्रस्थधर्मनिरूपणम् ।

अथ प्रसङ्गतो वार्ताकवृत्त्यादिचतुर्विधभेदभिन्नानां गृहस्थानां साधारणधर्माः । तत्राह याज्ञवल्क्यः—

शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः ।
प्रातःसन्ध्यामुपासीत दन्तधावनपूर्वकम् ॥

आवश्यकीं शरीरचिन्तां दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः । इत्याद्युक्तविधिना निर्वर्त्य गन्धलेपक्षयकरमित्यादिनोक्तेन विधिना कृतशौचविधिर्द्विजः दन्तधावनपूर्वकं प्रातःसन्ध्यामुपासीत । दन्तधावनकाष्ठादिविधिश्च ।

कण्टकक्षीरवृक्षोत्थं द्वादशाङ्गुलसंमितम् ।
कनिष्ठिकाग्रवत् स्थूलं पर्वार्द्धकृतकूर्चकम् ॥
दन्तधावनमुद्दिष्टं जिह्वोल्लेखनिका तथा । इति,

अत्र वृक्षोत्थमित्युक्त्या तृणलोष्ठाङ्गुल्यादिनिषेधः फलति, ततश्च रोगेणावस्थया वा दन्तेषु अदृढिमानमुपेयिवत्सु औषधप्रयोगार्थमङ्गुलिप्रयोगो न दोषाय दन्तशुशोधयिषया त्वनुष्ठीयमानोऽङ्गुल्यादियोगः प्रत्यवायाय भवतीति, पलाशाश्वत्थादिकाष्ठनिषेधश्च स्मृत्यन्तरोक्तो वेदितव्यः ।

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ! ॥

इति दन्तधावनमन्त्रः । प्रातःसन्ध्यामनुष्ठाय आहवनीयादीनग्नीन् यथोदितविधिना समुपास्य किं कुर्यादित्याह याज्ञवल्क्यः—

हुत्वाऽग्नीन् सूर्यदैवत्यान् जपेन्मन्त्रान् समाहितः ।
वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च ॥

उदुत्यं जातवेदसमित्यादीन् सूर्यदैवत्यान् मन्त्रान् समाहितचित्तेन जपेत्, तदनन्तरं पूर्वोत्तरकाण्डभेदभिन्नमीमांसादिद्वारा

स्मृतियुक्तिनिरुक्तादिसाहाय्येन च वेदार्थान् ऐहिकामुष्मिकाद्यर्थसाधनभूतानारभ्य अध्यात्माधिगमसाधनपर्यन्तान् जानीयात् । शास्त्राणि विविधानि चेति चकारोऽनुक्तसमुच्चयार्थो यथाऽधिकारं सर्वेषामेव क्षत्रिय-वैश्यादीनां स्वाधिकाराविरोधेन शस्त्रास्त्रशिल्पवाणिज्यविविधयन्त्रकलानृत्यगीतवादित्रादिरूपैहिकार्थबोधकशास्त्राभ्यासं बोधयति, अत एव त्विह विविधानि चेति वैविध्यमभिहितम् । प्रायो धर्मशास्त्रेषु ब्राह्मणप्रामुख्येण धर्मादेशादाह योगीश्वरः-

उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये ।
स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा ॥

अयमर्थः-गृहस्थो ब्राह्मणश्चेदभिषेकादिगुणयुक्तं क्षत्रियं राजानमन्यं वा यथासम्भवं काञ्चनेश्वरं धनिकं वा निर्वाहार्थमुपेयात्-क्षत्रियादिस्तु स्वस्ववर्णानुसारेण निर्वाहोपायमालम्बेत । अत्रोपेयादित्युक्त्या आगन्तुकोपाधिनिबन्धनसांनिध्याभिधानेन नियतोपाधिकवेतननिमित्तकसेवनं प्रत्याख्याति, सेवायाः श्ववृत्तित्वेन न श्ववृत्त्या कदाचनेति द्विजमात्रस्य सेवावृत्तेरनानुरूप्यात् ।

ततो मध्याह्ने शास्त्रोक्तविधिना यथासम्भवं महानदीदेवखातादिषु स्नात्वा ऋग्यजुःसामसूक्तैर्देवान् स्वकुलेऽभ्यर्च्यत्वेनाभिमतान् हरिहरादीन् पितॄन्, चकारेण ऋषींश्च तर्पयेदर्चयेद् यथायथम्, अथ पूजाऽनुक्रमो ग्रन्थान्तरादवगन्तव्यः । तदनन्तरं कार्यमाह ।

वेदाथर्वपुराणानि सेतिहासानि शक्तितः ।
जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् ॥
बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः ।
भूतपित्रमरब्रह्ममनुष्याणां महामखाः ॥

बलिकर्म भूतयज्ञः, स्वधा पितृयज्ञः, होमो दैवयज्ञः, स्वाध्यायो ब्रह्मयज्ञः, अतिथिसत्क्रिया मनुष्ययज्ञः, एते पञ्च महायज्ञा द्विजानामावश्यका नित्यत्वात् । क्वाचित्कमेषां फलश्रवणं तु पावनत्वबुद्ध्यतिशयाधानाय, न तु फलाख्यानाय तेन नैषां काम्यत्वम् । तत्रैव विशेषमाह—

देवेभ्यश्च हुतादन्नाच्छेशाद् भूतबलिं हरेत् ।
अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निक्षिपेत् ॥

स्वगृह्योक्तविधिना वैश्वदेवहोमं कृत्वा तदवशिष्टान्नेन भूतेभ्यो बलिं हरेत् । अचान्नमित्युक्तिरदनीयमुपस्थापयतीत्यपक्वं व्युदस्यते । तदनन्तरं यथाशक्ति भूमावन्नं श्वचाण्डालवायसेभ्यो निक्षिपेत् । चशब्दः कृमिपापिरोगिपतितसमुच्चायकः । यथाऽऽहमनुः ।

शुनां च पतितानां च श्वपचां पापरोगिणाम् ।
वायसानां कृमीणां च शनकैर्निक्षिपेद् भुवि ॥ इति,

अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनस्मरणेन प्रातस्तनपाकादिव सायन्तनपाकादपि बलिवैश्वदेवं कुर्यात् । गृहस्थस्य कर्तव्यान्तरं चाह योगीश्वरः—

अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम् ।
स्वाध्यायं चान्वहं कुर्यान्न पचेदन्नमात्मने ॥

प्रत्यहमन्नं पितृभ्यो मनुष्येभ्यश्च यथाशक्ति देयम् । अन्नाभावे कन्दमूलफलादि । तस्याप्यभावे जलं देयम् । स्वाध्यायोमन्त्रब्राह्मणात्मकोवेदस्तं यथाशक्ति अधीयीत येनाधीतविस्मरणं न स्यादन्यथाऽधीतविस्मरणे प्रायश्चित्ती स्यात्, न चान्नं स्वहेतोःपचेत्किन्तु देवतोद्देशेन यथाह स्मृतिः न पचेदन्नमात्मार्थम् । भगवा-

नपि गीतासु भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् इति, । गृहस्थस्य शेषभोजनम् ।

बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः ।
सम्भोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम् ॥

स्ववासिनी या परिणीता सती पितृगेहे वसति सा । अवशिष्टं निगदव्याख्यातम् ।

आपोशनेनोपरिष्टादधस्तादश्नता तथा ।
अनग्नममृतं चैव कार्यमन्नं द्विजन्मना ॥

इदं च द्विजत्वनिबन्धनमिति उपनयनप्रभृति सर्वाश्रमसाधारणम् ।

अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः ।
अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः ॥

प्रातःकाले इव सायंकालेऽपि अतिथिरप्रणोद्यः अप्रत्याख्येयः । तथा चाह मनुः ।

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ।
सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च ॥
भोजयेच्चागतान् काले सखिसंबन्धिबान्धवान् ॥

भिक्षा च ग्राससम्मिता, ग्रासश्च मयूराण्डपरिमाणः ।

शातातपश्चाह ।

ग्रासमात्रा भवेद् भिक्षा पुष्कलं तच्चतुर्गुणम् ।
हन्तस्तु तैश्चतुर्भिः स्यादग्रं तत्त्रिगुणं भवेत् ॥ इति,

प्रतिसंवत्सरमर्चनीयानाह योगीश्वरः ।

प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः ।
प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः ॥

स्नातको विद्यास्नातकः, व्रतस्नातकः, विद्याव्रतस्नातकः, आचार्यः पार्थिवो राजा प्रियो मित्रं विवाह्यो जामाता । चकारः श्वशुरपितृव्यमातुलादीनां संग्राहकः । यथा सस्माराश्वलायनः ।

ऋत्विजो वृत्वा मधुपर्कमाहरेत् । स्नातकोपस्थिताय राज्ञे चार्याय च श्वशुरपितृव्यमातुलानां च ॥ इति,

अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः ।
मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः ॥
परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते ।
वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् ॥
अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेत् ।
अहःशेषं समासीत शिष्टैरिष्टैश्च बन्धुभिः ॥
उपास्य पश्चिमां सन्ध्यां हुत्वाऽग्नींस्तानुपास्य च ।
भृत्यैः परिवृतो भुक्त्वा नातितृप्याथ संविशेत् ॥
ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।
धर्मार्थकामान् स्वे काले यथाशक्ति न हापयेत् ॥
विद्याकर्मवयोबन्धुवित्तैर्मान्या यथाक्रमम् ।
एतैः प्रभूतैः शूद्रोऽपि वार्द्धके मानमर्हति ॥
वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् ।
पन्था देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः ॥

इदानीं वर्णविशेषे गृहस्थधर्मानाह ।

इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च ।
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा ॥

प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम् ।
कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम् ॥
शूद्रस्य द्विजशुश्रूषा तयाऽजीवन् वणिग् भवेत् ।
शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन् ॥
भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः ।
नमस्कारेण मन्त्रेण पञ्च यज्ञान्न हापयेत् ॥
सर्ववर्णाश्रमसाधारणधर्मांश्चाह योगीश्वरः ।
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ॥
वयोबुद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणाम् ।
आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा ॥

भारते भीष्मः ।

अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।
प्रजनं स्वेषु दारेषु शौचमद्रोह एव च ॥
आर्जवं भृत्यभरणं नवैते सार्ववर्णिकाः ।

व्यासः ।

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते चिरं तत्र न संवसेत् ॥

मार्कण्डेयपुराणे ।

जितामित्रो नृपो यत्र बलवान् धर्मतत्परः ।
तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतौ सुखम् ॥
यस्मिन् कृषीवला राष्ट्रे प्रायशो नातिभोगिनः ।
यत्रौषधान्यशेषेण वसेत्तत्र विचक्षणः ॥

प्रीयमाणो नरो यत्र प्रयच्छेद् गुरुयाचितम् ।
सुस्थचित्तो वसेत्तत्र कृतकृत्य इवात्मवान् ॥
दण्डो यत्राविनीतेषु सत्कारश्च कृतात्मसु ।
वसेत्तत्र वसेच्चैव धर्मशीलेषु साधुषु ॥

विष्णुः ।

वर्षातपादिषु च्छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥
नाधो न तिर्यगूर्द्धं वा निरीक्षन् पर्यटेद् बुधः ।
युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् ॥
न दुष्टं यानमारोहेद् भ्रष्टच्छायां न संश्रयेत् ।
नैकः सुप्याद्वनं गच्छेन्न तु शून्यगृहे वसेत् ॥
नासहायो व्रजेद्रात्रौ नोत्पथेन चतुष्पथे ।

वृहस्पतिः ।

सख्यं समाधिकैः कुर्यादुपेयादीश्वरं सदा ।
वैरं निर्हेतुकं वादं न कुर्यात्केनचित्सह ॥

वसिष्ठः ।

आहारनिर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्याः ।
वाग्बुद्धिगुप्तानि नयस्तथैव धनायुषी गुप्ततमे च कार्ये ॥

पैठीनसिः ।

अनिन्द्या ब्राह्मणा गावः सलिलं काञ्चनं स्त्रियः ।
पृथिवी च षडेतानि यो निन्दति स निन्दितः ॥

मार्कण्डेयपुराणे ।

वेददेवद्विजातीनां साधुसत्यतपस्विनाम् ।
गुरोः पतिव्रतायाश्च तथा यज्ञतपस्विनाम् ॥

परिवादं न कुर्वीत परिहासेऽपि पुत्रकाः ! ।
कुर्वतामविनीतानां श्रोतव्यं न कथञ्चन ॥

हारीतः ।

विवादं वर्जयेद्विप्रे सर्वेषां चैव सूचनम् ।
परिभोगं यथोक्तेषु मत्सरं पुत्रशिष्ययोः ॥

तथा च परत्र ।

तस्मान्नैव परिवदेद्यजन्तं याज्यमीश्वरम् ।
आदत्ते सुकृतं तेषां ये वै परिवदन्ति तम् ॥

मनुः ।

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ।
वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः ॥
मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥
न च वाचं वदेद् दुष्टां न दीनां न च कर्कशाम् ।

योगीश्वरः ।

देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियः ।
नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च ॥

मनुः ।

मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ।
सन्ध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ॥
उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च ।
श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः ॥
वैरिणं नोपसेवेत सहायं चैव वैरिणः ।
अधार्मिकं तस्करं च परस्यैव च योषितम् ॥

ब्रह्मचर्यं हि साधारणो धर्मः सर्ववर्णाश्रमाणान्तच्च चतुर्विधं कृष्णं, रक्तं, शुक्लं, विमलमिति ।

तत्र परदारवर्जनं नित्यं सर्वसाधारणं, स्वदाराभिगमनं कृष्णं, पर्ववर्जे च तदेव रक्तम् । ऋतुकालाभिगमनं शुक्लम्, ऊर्द्ध्वरेतस्त्वं विमलम्, एतानि चत्वार्यपि ब्रह्मचर्याणि यथाप्राप्तमनुष्ठितानि सफलानि अधिकारातिक्रमेणानुष्ठाने तु निरयहेतुतामापद्यन्ते ।

कृष्णे भौमाञ् जयेल्लोकान् मध्यमे रक्तकाञ्जयेत् ।
शुक्लेन तु जयेत्स्वर्गं विमलान्मोक्षमाप्नुयात् ॥ इति,

इति साधारणा धर्माः, गृहस्थधर्माश्च ।

सर्वेषामाश्रमस्थानां समाधिव्यतिरिक्तकाले स्वस्ववर्णधर्मानुष्ठानमावश्यकमन्यथा तु तेषां प्रत्यवाय एवेति सर्वशास्त्रनिष्कर्षः, अत एव सर्वोपनिषत्तात्पर्याख्यानरूपायाङ्गीतायाम्

कच्चिदेतच्छ्रुतं पार्थ ! त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनञ्जय ! ॥

इत्यतिस्निग्धचेतसा मातापितृसहस्रेभ्योऽप्यतिवत्सलेन गीतोपदेशापदेशेन सर्वजीवाभयप्रदानकामेन भवभयामयजीवातुना भगवता स्वोपदेशसार्थक्यं परीचिचिषमाणेन पृष्टे सत्यर्जुनेन ॥

नष्टोमोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ! ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥

इति भगवदुपदेशप्रसादेन मोहनाशस्मृतिलाभसंदेहापगमेषु जातेष्वपि भगवद्वचनानुगमनमभिदधे, अनुतष्ठे च क्षात्रधर्मः, अन्यथा तु काष्ठमौनमालम्ब्य तूष्णीमेवावास्थास्यत न तु कथं चिदपि प्रायतिष्यत, भगवानपि च

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच ॥

इति प्रतिजज्ञे, अन्यथा कर्मनिरपेक्षसाक्षात्कारात्मकज्ञानाहार्याप्रामाण्यज्ञानानास्कन्दितनिर्विशेषाद्वैतात्मज्ञानमात्रबलनिर्दग्धस्याज्ञानोपादानकस्यामुष्य विशरारोः संसारस्य स्वयं शीर्णतया किं भगवतः शरणीकरणं, कश्च सर्वपापप्रमोक्षणे वा अर्जुनस्याशोकत्वसंपादने वा भगवद्व्यापारः, ज्ञानैकप्रशम्यस्वभावत्वादज्ञानस्य । अयमिहोपदिदिक्षोर्जगद्गुरोराचार्यस्य भगवतो देवकीगर्भजन्मनो निगूढाभिसंधिः—सुवर्णायसनिगड़न्यायेन धर्माधर्मयोरुभयोरेव बन्धहेतुत्वस्याविशेषात्तयोर्द्वयोरेव भगवति समर्पणलक्षणस्त्यागस्त्वया करणीयोऽन्यथा संसारस्यानादितया ज्ञाताज्ञातानन्तकर्मणां भोगेन क्षपयितुमक्षमतया न ते मोक्षसम्भावनाऽपि, न ह्येकैकेनापि जन्मना कोटिशः क्षपितान्यपि कर्माण्यन्तमुपयान्ति, अनन्तानामन्तासंभवात् । तेषुतेषु जन्मसु क्रियमाणानामपि च कर्मणां भोगेन भयहेतुत्वावश्यम्भावे पङ्कात्स्वात्मानमुद्दिधीर्षोरस्थानयत्नस्य पुंसः पङ्कनिमज्जनन्यायेन प्रत्युत संसारदार्ढ्यमेवापादितं स्यादिति मोक्षकथाऽप्युदुम्बरपुष्पायितेति हन्त जीवानामुद्योगवैयर्थ्यमेवापन्नमिति, भगवति समर्पितानि तु तानि न प्ररोहाय यथोक्तमिहैव ।

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम् ॥ इति,

सर्वधर्मानिति ज्ञाताज्ञातकृतकरिष्यमाणक्रियमाणाखिलधर्माधर्मपरम्, अत एव अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामीति पापपदेन पुण्यं समग्रहीदाचार्यः, एवमेव तु सर्वधर्मानित्यत्र धर्मपदेन पापमपि

समसूसुचत्, मामिति पदेन सदादिपदनिर्दैश्यावतारिस्वरूपसंपन्नमखिलाविकलषाड्गुण्ययुतमवतारं मामित्यर्थैविवक्षा । एकमित्यनेन देवतान्तरव्यावृत्तिस्तेषां जीवकोटिनिविष्टतया स्वयं तरितुमक्षम इति न्यायेनाशरण्यत्वात्, अत एव यजन्त्यविधिपूर्वकमिति मुमुक्षोर्देवतान्तरयागस्यावैधत्वमाह । अहं त्वामित्युक्तिश्च सविशेषप्रविभिन्नानन्तात्मव्यक्तिबुबोधयिषया, मोक्षयिष्यामीति च एष एव साधु कर्म कारयतीति श्रुत्यर्थोपवृंहणमत एव ददामि बुद्धियोगं तं येन मामुपयान्ति ते । इति स्पष्टमाचष्टे स्वयम् । एतेन संसार–तन्निवृत्त्योस्सत्यत्वमपि सिध्यति । जात–जायमान–जनिष्यमाणानिष्टसम्भावनाजन्यो मानसो वृत्तिविशेषः शोकस्तदपनुनुत्सयाऽऽह मा शुच इति, भगवदर्पितानां भ्रष्टवीजकल्पकर्मणां नाङ्कुरकरणकल्पतेति कृतं शोककलिलेनेति विवक्षितोऽर्थः । ततश्च भक्तिरूपापन्नज्ञानं मोक्षमुख्योपाय इति सिध्यति, अत एव ।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥

इति ज्ञानपुरःसरीं भक्तिं पुरश्चकार भगवान् । गीताशास्त्रस्य चेदमेव गुह्यतममुपदेष्टव्यं सारस्वरूपमत एवेह ।

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥

इति प्रतिज्ञाय भक्तिः परमोपाय इत्युपदिदेश, गीतासु भक्तेरेवोपायभावस्य भगवता भृशमभिहितत्वाद् भूय इति, एतेनात्र शास्त्रे भक्तिरेवाभिहितेति न पाणिपिहितं प्रणिहितचेतसाम् ।

ये पुनरनृषयः कर्मनैरपेक्ष्येण ज्ञानमात्रान्मोक्षमामनन्तो बोधायनस्य परमर्षेर्मतनिराकरणाय यदृच्छावाक्यजातमुपाददाना उद्य-

च्छन्ते पूर्वापरगीतावाक्यविरोधमादर्शयितुं वैदिके कर्माङ्गकभक्तिभावापन्नज्ञानस्य मोक्षहेतुतासिद्धान्ते । ते पुनराहोपुरुषिकावलम्बनमात्रदृप्तिप्रवृत्ता इत्यतिस्पष्टतया निरूपणीयमस्माभिरस्मदीये गीतासन्दर्भे स्नेहपूर्तिमहानिबन्धे चेति कृतमिह तदीयनिराकरणवाग्विग्लापनजल्पितेन जिज्ञासुजनोपयुक्ततत्त्वनिरूपणमात्रप्रवृत्तानां नः ।

गायत्र्यैव न चाऽन्यया द्विजपदं तन्मन्त्रमीमांसया,
चातुर्वर्ण्यसपत्नयत्नशतकं विध्वंस्य तस्य स्थितिम् ।
तिष्ये* ऽपीत्यनुपाकृतोपनयनं सद्व्रात्यमीमांसया
तार्तीयीकतया† विवाहसमयं किञ्च व्यवातिष्ठिपम् ॥ १ ॥
इत्थं दुर्नय‡शोधनैः सुविहिते निष्कण्टके वैदिके
चातुर्वर्ण्यपदाभिधेऽध्वनि परं चत्वार एवाश्रमाः ।
शोध्यास्तत्र तुरीय एव गहनो दुर्वादिदुर्नीतिभि-
स्तन्निष्कण्टकताकृते कृतिरियं तुर्याऽपि पर्याप्यते ॥ २ ॥
आम्नायोदितधर्मधारणविधौ धैर्यावधूताशयं
वैदेही निरवद्यनित्यभगवत्पादाम्बुजोपाश्रिता ।
या श्री§र्मायिजनेन दुर्नयवता दुर्यातनां लम्भिता
सा रामेण विधूय तं पुनरपि क्षेमं प्रतिष्ठापिता ॥ ३ ॥
‖वैदेही निरवद्यनित्यभगवत्पादाम्बुजोपाश्रिता
श्री,स्तां प्रक्रियया विकृष्य सहसालङ्काक्षपण्योद्धृतेः ।

* तिष्ये कलौ ।

† तार्तीयीकतया तृतीयत्वेन तार्तीयिक्या तया मीमांसया वा ।

‡ नयो नीतिश्च न्यायः ।

§ यतीनां तु चतुर्गुणमित्यादिधर्मशास्त्रबोधितस्वधर्मानुष्ठाने कातरैर्मोक्षसंबन्धिनी या श्रीः संन्यासधर्मसंपत् नैष्कर्म्यवादेन विभ्रंशिता सा शोधितेत्यर्थः ।

‖ श्रीवैदेही देवी श्रीरामेण पुनः क्षेमं नीतेति च ध्वनिः स्वयमूहनीयोऽत्र ।

यैस्तत्तन्निरमायि मायिभिरहो मोक्षाध्वविध्वंसनं
तान् रामेण विधूय निर्भयपदं सा स्नेहपूर्त्या ऽञ्चिता ॥ ४ ॥
*एड्वर्डेति य एष सप्तमनृपः श्रीभारताधीश्वर-
स्तत्साम्राज्यपदाधिकारसमये तावत् समग्रन्थ्ययम् ।
ग्रन्थः, स्ताद्भगवत्कटाक्षसुधया तस्या ऽनिशं भावुकं
येना ऽज्ञानतमांसि लुम्पतु सदा विद्यानवद्योदयः ॥ ५ ॥

इति श्रीपरमपूरुषकृपासरित्पूरपरीवाहपूर्णपाचस्य सारस्वत-साम्राज्यदीक्षणविचक्षणस्य सत्संप्रदायाचार्यसर्वतन्त्रस्वतन्त्रपण्डित-स्वामिश्रीराममिश्रशास्त्रिणः सत्कृतिषु धर्ममर्ममीमांसासु तुरीया-श्रमनिर्णये क्रमागता तुरीयमीमांसा ॥

सन्तु नः शुभाशिषः पूर्वाचार्याः श्रियं श्रीधरं चारभ्यास्मदाचार्य-पर्यन्ता जगन्मङ्गलविग्रहा इति साञ्जलिपुटमभ्यर्थयामहे ॥

सं· १९५७ । फाल्गुनकृष्णपञ्चम्यां शुक्रे

श्रीः श्री श्रीः श्रीः श्रीः ॥

* Edward VII., King of Great Britain and Ireland, and Emperor of India.

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या